THE WORKS

OF

# Srī Sankaracharya

SRI

VANI VILAS

EDITION.

परिग्रहण सं०....10365..........
ग्रन्थालय, कें. उ. ति. शि. संस्थान
सारनाथ, वाराणसी

THE WORKS OF

# SRI SANKARACHARYA

VOLUME

3

SRI VANI VILAS PRESS

SRIRANGAM

# CONTENTS.


| | PAGE. |
|---|---|
| BRAHMASUTRA-BHASHYA. | |
| CHAPTER III. . . . | 559-760 |
| PADA 2. . . . . | 559 |
| PADA 3. . . . . | 615 |
| PADA 4. . . . . | 715 |
| CHAPTER IV. . . . | 761-862 |
| PADA 1. . . . . | 763 |
| PADA 2. . . . . | 797 |
| PADA 3. . . . . | 819 |
| PADA 4. . . . . | 845 |

## ॥ विषयाः ॥


| | पृष्ठम् |
|---|---|
| **ब्रह्मसूत्रभाष्यम्** | |
| अध्यायः ३. ... ... | ५५१—७६० |
| द्वितीयः पादः ... ... | ५५१ |
| तृतीयः पादः ... ... | ६१५ |
| चतुर्थः पादः ... ... | ७१५ |
| अध्यायः ४. ... ... | ७६१—८६२ |
| प्रथमः पादः ... ... | ७६३ |
| द्वितीयः पादः ... ... | ७९७ |
| तृतीयः पादः ... ... | ८११ |
| चतुर्थः पादः ... ... | ८४५ |

# BRAHMASUTRA BHASHYA

Volume

III

# ब्रह्मसूत्रभाष्यम्

तृतीयो भागः

॥ श्रीः ॥

# ॥ विषयानुक्रमणिका ॥

पृष्ठम्

## तृतीयोऽध्यायः


द्वितीयः पादः— तत्त्वं-पदार्थविवेकः ५६१–६१४

१. संध्याधिकरणम् ... ५६१—५६९

संगतिप्रदर्शनपूर्वकम् उद्देश्यं त्वं-पदार्थं विवेचयितुम्, 'अथ रथान्—' इति श्रुतिमवष्टभ्य तथ्यरूपां स्वप्नसृष्टिमुदाहृत्य मिथ्याप्रत्ययाः सर्वेऽपि सम्यञ्च इति प्रतिजानानां पूर्ववादिनां पक्षस्य उद्भावनम् ... ५६१

'य एष सुप्तेषु—' इत्यादिकाठकश्रुतिमवलम्ब्य प्राज्ञकर्तृकत्वं हेतूकृत्य स्वप्नसृष्टेः पारमार्थिकत्वसाधनम् ... ५६२

व्यापकविरुद्धोपन्यासेन वस्तुत्वं व्यावर्त्य मायामात्रत्वसिद्धान्तः ... ५६३

शुभाशुभफलान्वयव्यतिरेकाभ्यां शास्त्रेण च विरोधस्य परिहारः .. ५६५

स्वयंज्योतिष्ट्वविवेचनानुगुणं रथाद्यभाववचनमेव श्रुत्या व्याख्येयम्, रथादिसृष्टिवचनं तु भक्त्या ––इति विविच्य परोक्तनिरसनम् ... ५६६
प्राज्ञकर्तृकत्वस्य पराभिमतहेतोः असिद्धिबाधाभ्यामाभासीकरणम् ... ५६६
परमात्मांशस्य जीवस्य सत्यसंकल्पस्य सांकल्पिकी स्वप्ने रथादिसृष्टिः— इति शङ्कायाः, जीवस्य ज्ञानैश्वर्यतिरोधानमुपपाद्य परिहारः ... ५६७

२. **तदभावाधिकरणम्** ... ५७०—५७६

सुषुप्तिपरीक्षार्थं विषयोपन्यासः ... ५७०
नाडीपुरीतत्परमात्मनां सुषुप्तस्थानतया श्रूयमाणानाम् एकार्थानां विकल्पे ब्रह्मभावानियमात् कर्मणैवापवर्गं संभावयतां पूर्ववादिनां मतस्य उद्भावनम् ... ५७०
समुच्चयेन नाड्यादीनि स्वापाय उपसर्पतीति सिद्धान्तः ... ५७१
एकविभक्तिनिर्देशस्य अनैकान्तिकत्वप्रदर्शनम्... ५७१
सापेक्षश्रुत्यनुरोधेन निरपेक्षश्रुतिं नीत्वा समुच्चयबाधनिरसनम् ... ५७२
जीवस्याधेयत्वमभ्युपगतं परित्यज्य—ब्रह्मात्मत्वमेव जीवस्य सुषुप्ते ब्रह्माधारत्वम्, तदुपाधिक-

रणमात्राधारतया तु जीवस्य सुषुप्तारम्भाय ना-
डीपुरीतदाधारत्वम्—इति अतुल्यार्थतानिरू-
पणेन विकल्पविघटनम् ... ५७४
असत्यपवादे जीवस्यौत्सर्गिकं ब्रह्मतादात्म्यं न
सुषुप्ते अन्यथयितुं शक्यम्—इति विकल्पायोगे
युक्त्यन्तरम् .... ५७४
परमात्मातिरिक्तेषु स्थानेषु विशेषविज्ञानस्यावश्य-
कतया सुप्तेरनुपपत्तिः ... ५७४
गुणप्रधानभावेन समुच्चयः, न समप्रधानतयेति
निष्कर्षः ... ५७५
आत्मनः प्रबोधापादानतां स्वापाधिकारे शिष्य-
माणामुपन्यस्य सिद्धान्तदृढीकरणम् ... ५७५

३. **कर्मानुस्मृतिशब्दविध्यधिकरणम्** ५७६—५७९

जलबिन्दुन्यायेन सुप्त एव प्रतिबुध्यत इति न नि-
यन्तुं शक्यते— इति पूर्वपक्षः ... ५७६
कर्मशेषानुष्ठानदर्शनम् अनुस्मृतिं श्रुतिं कर्मविद्या-
विध्यनुपपत्तिं चोपन्यस्य सुप्तस्यैव पुनरुत्थान-
मिति नियमस्य समर्थनम् ... ५७६
उत्सूत्रं सिद्धान्तयुक्तिविशेषाणामुपन्यासः ... ५७७
विवेकहेतोः कर्मणोऽविद्यायाश्च सद्भावात् जीवस्य
ब्रह्माभेदाच्च जलबिन्दुन्यायस्य विघटनम् ... ५७९

४. मुग्धाधिकरणम् ५७९—५८१

प्रसिद्धावस्थानां मूर्छा अन्यतमेति पूर्वपक्षः ... ५७९

देहधारणाभावात् विषयमात्रानुपलब्धेश्च मुग्धस्य जाग्रतो वैलक्षण्यसमर्थनम् ... ५७९

निःसंज्ञकत्वात् प्राणोष्मणोर्भावाच्च स्वप्नमृतिभ्यां मूर्छाया भेदस्य प्रतिपादनम् ... ५८०

सुषुप्तमोहयोः प्रयोजनकारणलक्षणभेदेभ्यो भेदस्य समर्थनम् ... ५८०

अर्धेन सुषुप्तपक्षस्य भवति मुग्धत्वम्, अर्धेन अवस्थान्तरपक्षस्य इति सिद्धान्तः ... ५८१

५. उभयलिङ्गाधिकरणम् ... ५८२—५९६

तत्पदार्थनिरूपणारम्भे प्रतिज्ञा ... ५८२

उभयलिङ्गश्रुत्युपन्यासेन संशयबीजोद्घाटनम् ... ५८२

स्वत उपाधितो वा परस्य ब्रह्मणः उभयलिङ्गत्वानुपपत्तेर्निर्विशेषमेव प्रतिपत्तव्यम्— इति सिद्धान्तः ५८३

भिन्नाकारयोगो ब्रह्मणः शास्त्रीय इति शङ्कायाः— भेदस्य उपासनार्थत्वात् अभेदे तात्पर्यात् नेति निरसनम् ... ५८३

तत्प्रधानत्वं विनिगमकमाश्रित्य अनाकारब्रह्मावधारणम् ... ५८४

प्रकाशदृष्टान्तेन औपाधिकमाकारयोगमनाकारे-

ऽप्युपासनार्थं समर्थ्य आकारवद्विषयाणामपि श्रुतीनां गतिप्रदर्शनम् ... ५८५
निर्विशेषत्वानुकूलतया अन्यापोहमुखेन ब्रह्म दर्शयन्तीनां श्रुतिस्मृतीनाम् उपन्यासः ... ५८६
जलसूर्यकादिशास्त्रीयदृष्टान्तस्य प्रकृतानुकूलतया उपन्यासः ... ५८७
उक्तदृष्टान्तवैषम्यशङ्का, तत्प्रतिविधानं च ... ५८८
अनुप्रवेशश्रुत्युपन्यासेन उक्तदृष्टान्तदृढीकरणम् ५८९
निष्प्रपञ्चत्वपरतया सन्मात्रत्वपरतया च अधिकरणद्वयं कल्पयतां स्वयूथ्यानां मतस्योद्भावनम् ५८९
एवमधिकरणान्तरारम्भस्य सर्वथा वैयर्थ्यमिति तन्निरसनम् ... ५९०
आकारश्रुतीनामपि तदितराकारप्रविलयो गतिरिति मतमनूद्य ब्रह्मोपासनावाक्यानां पार्थग्यर्थ्यसमर्थनेन तन्निरसनम् ... ५९१
एकनियोगप्रतीतेः ब्रह्मोपासनावाक्यानामेकवाक्यतेत्यभिमानस्य— अचोदनातन्त्रत्वाद्ब्रह्मविज्ञानं प्रपञ्चप्रविलयं च अशक्यत्वात् अनुपपत्तेः अन्यथासिद्धत्वाच्च नियोगगोचरादपनीय शिथिलीकरणम् ... ५९२
प्रपञ्चपक्षे उच्छेदात्, ब्रह्मपक्षे अनियोज्यत्वात् जीवस्य नियोज्यताविघटनेन नियोगवार्ताया वार्तीकरणम् ... ५९४

नियोगाभ्युपगमेऽपि साध्यानुबन्धभेदादेकनियोगत्वमसिद्धमिति निगमनम् .... ५९५

६. प्रकृतैतावत्त्वाधिकरणम् ५९६—६०५

नेति नेतीति प्रतिषेधे संशयमुपन्यस्य, ब्रह्मापि ब्रह्मैव वा प्रतिषेध्यम् इति पक्षयोः सहेतुकमुपन्यासः ५९६

न ह्यनाश्रयः प्रतिषेधः शक्यः प्रतिपत्तुम्; न च ब्रह्मपरे शब्दे ब्रह्मणि प्रमाणे सति तत्प्रतिषेधोऽपि प्रमाणवान्; नापि वेदान्ता ब्रह्म प्रतिषेधायैव महता प्रयत्नेन प्रतिपादयन्ति— इति तयोः पक्षयोर्निरसनम् ... ५९७

प्रकृतैतावत्त्वं हि प्रतिषेधतीति सूत्रावयवविभजनम् ५९८

मूर्तामूर्तविषयतया भूतराशिवासनाराशिविषयतया कृत्स्नविषयप्रतिषेधपर्यवसायिवीप्सारूपतया च प्रतिषेधद्वयस्य नयनम् ... ५९९

'न ह्येतस्मादिति नेत्यन्यत्परमस्ति' इति वाक्यं एतस्मादित्यस्य आदिष्टादेशनपरामर्शितया वाक्यभेदेन वाक्यैक्येन च द्विधा योजयित्वा, तदनुरोधेन 'ततो ब्रवीति च भूयः' इत्यस्य अन्यत्परमस्तीत्येतद्विषयतया अथ नामधेयमित्येतद्विषयतया च विभजनम् ... ६००

अभावो न ब्रह्माभावे क्रमते अयोग्यत्वादित्यत्र श्रुतिस्मृतिभ्यां हेतोः साधनम् ... ६०१

श्रुतिस्मृतिभ्यां ब्रह्मणः संराधनग्राह्यताप्रदर्शनम् ६०१
संराध्यसंराधकभावे जीवप्राज्ञयोरहिकुण्डलवत् प्रकाशाश्रयवच्च भेदाभेदयोर्भाविकयोरेवाविरोधं मतान्तरं निरस्य चिदात्मन औपाधिकभेदभानेऽपि स्वत एकरसत्वमेवेति अद्वैतनिष्कर्षेण निगमनम् ... ६०२

७. पराधिकरणम् ... ६०५—६११

सेतून्मानसंबन्धभेदव्यपदेशानां व्याख्यानपुरःसरं ब्रह्मणोऽन्यत्तत्वमस्तीति पूर्वपक्षस्योद्भावनम् ... ६०५
सेतुव्यपदेशस्य विधारकत्वसामान्यपरतया परिहारः ६०७
उन्मानव्यपदेशस्य आध्यानार्थतया परिहारः ... ६०८
संबन्धभेदव्यपदेशयोरौपाधिकतया परिहारः ... ६०९
अन्यप्रतिषेधसमाश्रयण एव सर्वगतत्वमप्यात्मनः प्रामाणिकमुपपद्यते— इति उपसंहारः ... ६१०

८. फलाधिकरणम् ६११—६१४

उपपत्तेः श्रुतेश्च ईश्वर एव फलहेतुरिति सिद्धान्तेनोपक्रमः ... ६११
कर्मणो वा सूक्ष्मा काचिदुत्तरावस्था फलस्य वा पूर्वावस्था अपूर्वं नाम कल्प्यमानं विधिविषयस्य यागस्य फलोत्पादकत्वमुपपादयतीति जैमिनिमतस्योद्भावनम् ... ६१३

अपूर्वाग्रहं विहाय ईश्वरप्रसादोऽनुरुध्यताम्; कर्मापेक्षादपूर्वापेक्षाद्वा ईश्वरात् फलमिति सुविशदं भवेत्—इति बादरायणनिष्कर्षः ... ६१४

**तृतीयः पादः— गुणोपसंहारः ... ६१७—७१४**

**१. सर्ववेदान्तप्रत्ययाधिकरणम् ... ६१७—६२३**

निरुपाधिब्रह्मतत्त्वगोचरं विज्ञानं मन्वानस्य भेदाभेदचिन्तावताराक्षेपः ... ६१७

सोपाधिकब्रह्मप्राणादिविषयासु उपासनासु भेदाभेदविमर्श उपपन्न इति परिहारः ... ६१८

नामरूपधर्मविशेषपुनरुक्तिप्रभृतीनां भेदहेतूनामुपलम्भात् प्रतिवेदान्तं विज्ञानभेद इति पूर्वपक्षः ... ६१८

संयोगरूपचोदनाख्याविशेषात् विज्ञानानां सर्ववेदान्तप्रत्ययत्वमिति सिद्धान्तः ... ६१९

पञ्चाग्निविद्याप्राणसंवादादिषु उत्पत्तिगत एव गुणभेदो वैश्वदेवीवत् कथं न भिन्द्यात् इति विशेषाशङ्कायाः परिहारः ... ६२०

शिरोव्रतस्य स्वाध्यायधर्मत्वोपपादनेन विद्याभेदकत्वविघटनम् ... ६२१

प्रायदर्शनन्यायेन उपासनानामपि सर्ववेदान्तप्रत्ययत्वसिद्धिः—इत्युपसंहारः .... ६२२

२. उपसंहाराधिकरणम् ६२३—६२४

सर्ववेदान्तप्रत्ययत्वे सर्वविज्ञानानां गुणोपसंहारः फलमिति निर्णयः ... ६२३

३. अन्यथात्वाधिकरणम् ६२४—६२८

वेद्यभेदनिरूपणेन वाजिनां छन्दोगानां च उद्गीथविद्या अर्थवादसंज्ञासाम्येऽपि भिन्ना—इति निष्कर्षः ... ६२४

४. व्याप्त्यधिकरणम् ६२८—६३१

ओमित्येतदक्षरमित्यत्र सामानाधिकरण्ये अध्यासापवादैकत्वविशेषणपक्षाणां निरूपणम् ... ६२८

गौण्या लक्षणातो दुर्बलत्वात् निष्फलत्वात् पदान्तरवैयर्थ्याच्च अध्यासापवादैकत्वपक्षान् निरस्य विशेषणपक्षेण सिद्धान्तः ... ६२९

५. सर्वाभेदाधिकरणम् ... ६३१—६३३

प्राणसंवादे वसिष्ठत्वादिगुणानामनुक्तानामपि एकप्रधानसंबद्धानां कौषीतकिब्राह्मणगतेन एवंशब्देन परामृष्टुं योग्यत्वादुपसंहार इति निर्णयः ६३१

६. आनन्दाद्यधिकरणम् ६३३—६३५

वास्तवानां विधेयानां च गुणानां वस्तुधर्मतया च

अनुष्ठेयतया च अव्यवस्थाव्यवस्थे व्यवतिष्ठेते
—इति विवेचनम् ... ६३३

७. आध्यानाधिकरणम् ६३५—६३७

'इन्द्रियेभ्यः परा ह्यर्थाः' इत्यादिकाठकश्रुतौ सर्वेषामेव अर्थादीनां परत्वं प्रतिपिपादयिषितम्—
इति पूर्वपक्षः ... ६३५

इष्टप्रयोजनत्वात् आदरातिशयाच्च पुरुषपरत्वप्रतिपादनार्थोऽयं संदर्भ इति सिद्धान्तः ... ६३६

८. आत्मगृहीत्यधिकरणम् ... ६३७—६४३

'आत्मा वा इदमेक एव' इत्यादितैत्तिरीयकश्रुतौ लोकसृष्टिवचनात् सूत्रात्मैवाभिलप्यते— इति
पूर्वपक्षः ... ६३७

आकाशपूर्विकायां सृष्टौ यथा क्वचित्तेजःपूर्विकायाः सृष्टेरभिधानं तथा महाभूतसृष्ट्यनभिधानेन लोकसृष्ट्यभिधानं न विरुध्यते, परमात्मग्रहण एव प्रागुत्पत्तेरात्मैकत्वावधारणमाञ्जसमवकल्पते— इति परमात्मैवाभिलप्यते— इति
सिद्धान्तः .... ६३९

सदुपक्रमस्य छान्दोग्यगतस्य संदर्भस्य आत्मोपक्रमस्य च वाजसनेयकगतस्य किमैकार्थ्यम्,

आहोस्विदर्थभेद इति संशयोपन्यासेन कल्पा-
न्तरारम्भः ... ६४१

आम्नानतन्त्रत्वादर्थपरिग्रहस्य उपक्रमतन्त्रत्वादु-
पसंहारस्य अर्थभेद एवोचितः, तादात्म्योप-
देशश्च संपत्तिपरतया नेय इति पूर्वपक्षः ... ६४१

'सदेव' 'एकमेव' इत्याद्यवधारणं तादात्म्यप्र-
तिपादनायैवावकल्पते, न तादात्म्यसंपादना-
याम्; सामान्योपक्रमश्च न वाक्यशेषगतेन विशे-
षेण विरुध्यते; सच्छब्दार्थोऽपि न मुख्यादा-
त्मनोऽन्यः संभवति—इति प्रतिपाद्याभेद इति
सिद्धान्तः ... ६४२

९. कार्याख्यानाधिकरणम् ६४३—६४६

छन्दोगानां वाजसनेयिनां च प्राणविद्याप्रकरणे यत्
अशिशिषताम् अशितवतां च उभयत आच-
मनम् अनग्नताचिन्तनं च प्रतीयते, तदुभयमपि
विधीयते अपूर्वत्वात्, विस्पष्टविधिविभक्तिक-
त्वाद्वा आचमनमेव विधीयते इति पक्षयोरु-
द्भावनम् .... ६४३

स्मार्तस्य आचमनस्य व्यापकत्वात्, दृष्टिसाहचर्या-
त्, समिधो यजतीत्यादिवत् वर्तमानापदेश-
स्यापि विधिक्षमत्वात्, 'जर्तिलयवाग्वा वा जुहु-

यात्' इत्यादिवत् विधिविभक्तेरपि अविवक्षितत्वसंभवाच्च वासोविज्ञानमेव विधीयते नाचमनम्— इति सिद्धान्तः ... ६४४

१०. समानाधिकरणम् ६४६—६४८

अग्निरहस्यबृहदारण्यकयोः शाण्डिल्यविद्या अभ्यासाधिकरणन्यायेन भिन्नेति पूर्वपक्षः ... ६४६

समानगुणपुनःश्रवणस्य विप्रकृष्टविद्याप्रत्यभिज्ञापकत्वेनान्यपरत्वसंभवादभ्यासाधिकरणन्यायाप्रवृत्तेः विद्यैकत्वमिति सिद्धान्तः ... ६४७

११. संबन्धाधिकरणम् ६४८—६५१

बृहदारण्यके सत्यविद्यायामादिश्यमानयोरुपनिषदोः संकर इति स्वरूपमात्रप्राधान्याभिप्रायेण पूर्वपक्षः ... ६४८

सविशेषणस्यैव प्रधानत्वात् अतिदेशलिङ्गाच्च तयोर्व्यवस्थेति सिद्धान्तः ... ६४९

१२. संभृत्यधिकरणम् ६५१—६५२

संभृत्यादीनां गुणानां शाण्डिल्यादिविद्यासु षोडशकलादिविद्यासु च प्रत्यभिज्ञासंभवादुपसंहार इति पूर्वपक्षः ... ६५१

असाधारणधर्माणामप्रत्यभिज्ञानादनुपसंहारः— इति सिद्धान्तः ... ६५१

१३. पुरुषविद्याधिकरणम् ... ६५२—६५४

तैत्तिरीयकताण्डिनोः पुरुषविद्या पुरुषयज्ञत्वमरणावभृथत्वादिसाम्यादेकैव—इति पूर्वपक्षः... ६५२

भूयोवैलक्षण्यान्न विद्यैक्यमिति सिद्धान्तः .... ६५३

१४. वेधाद्यधिकरणम् ... ६५४—६५७

विद्यासंनिधिपठितानां प्रविध्यादिमन्त्राणां प्रवर्ग्यादिकर्मणां च अन्यत्र विनियुक्तानामपि संनिधिसामर्थ्यात् विद्यार्थत्वेनापि प्रतिपत्तिः, बृहस्पतिसवदृष्टान्तेन, खादिरत्वादिदृष्टान्तेन वा—इति पूर्वपक्षः ... ६५४

प्रबलैः श्रुत्यादिभिरन्यत्र विनियुक्तानाम् अविरोधेऽपि दुर्बलसंनिधिमात्रेण न संभवति विद्यासु विनियोगः— इति सिद्धान्तः ... ६५६

१५. हान्यधिकरणम् ६५८—६६२

यत्र हानमात्रं सुकृतदुष्कृतयोः श्रूयते, तत्र अश्रूयमाणं विद्यान्तरगोचरशाखान्तरीयश्रवणविषयमप्युपायनमनवश्यं भावि न संनिपतेत्—इति पूर्वपक्षः ... ६५८

एकविंशादिवादवत् अर्थवादान्तरापेक्षार्थवादान्तरप्रवृत्तेः संभवात्, अष्टदोषदुष्टविकल्पप्रसङ्गभयेन कुशादिवत् वाक्यान्तरस्य वाक्यान्तरशेष-

त्वस्य औचित्याच्च, हानशब्दशेष उपायनशब्द उपायनमनुवर्तयति केवलहानश्रवणेऽपि स्तुति-प्रकर्षाय— इति सिद्धान्तः ... ६५९

विधूननश्रुतौ विधूननं चालनमेवेति प्राप्ते, वाक्यशेषे उपायनश्रवणबलात् हानमेवेति निर्णयः —इति वर्णकान्तरम् .... ६६१

१६. सांपरायाधिकरणम् ६६२—६६३

यथाश्रुति अर्धपथ एव सुकृतदुष्कृतविमोकः प्रतिपत्तव्यः, एवं च न पर्यङ्कविद्यातस्तत्प्रक्षय इति पूर्वपक्षः ... ६६२

पाठक्रमाद्बलीयांसौ श्रुत्यर्थावनुरुध्य समर्थस्य क्षेपायोगात् मरणात् प्रागेव सुकृतदुष्कृतक्षय इति सिद्धान्तः ... ६६२

१७. गतेरर्थवत्त्वाधिकरणम् .. ६६४—६६५

उपास्तिवत् बोधोऽपि गतिमान्—इति पूर्वपक्षः ६६४

प्राप्तिफलकस्योपासनस्य गतिमत्त्वेऽपि स्वास्थ्य-फले बोधे व्यर्था गतिर्न संनिपतेत्— इति सिद्धान्तः ... ६६४

१८. अनियमाधिकरणम् ६६५—६६७

यासु विद्यासु पन्थाः श्रूयते तास्वेव प्रकरणबलात् स नियम्येत—इति पूर्वपक्षः ... ६६५

'ये चेमे' 'शुक्लकृष्णे' इत्यादि श्रुतिस्मृतिभ्यां प्रकरणस्य बाधात् सर्वासामेव सगुणविद्यानां पन्थाः— इति सिद्धान्तः ... ६६५

१९. यावदधिकाराधिकरणम् ... ६६७—६७१

अपान्तरतमःप्रभृतीनां देहान्तरोत्पत्तिदर्शनात् ब्रह्मविद्यायाः पाक्षिकं मोक्षहेतुत्वम् अहेतुत्वं वा— इति पूर्वपक्षः ... ६६८

यावदधिकारमाधिकारिका अवतिष्ठन्ते, तदवसाने च अपवृज्यन्ते— इत्युपपन्नत्वात् विदुषः कैवल्यसिद्धिरैकान्तिकी इति सिद्धान्तः ... ६६९

२०. अक्षरध्यधिकरणम् ६७१—६७३

प्रधानतन्त्राणामङ्गानामिव अक्षरतन्त्राणां प्रतिषेधरूपाणां विशेषणानामपि यत्र कचिदप्युत्पन्नानां सर्वत्राक्षरेणाभिसंबन्धः— इति आनन्दादयः प्रधानस्येत्यस्य प्रपञ्चः ... ६७१

२१. इयदधिकरणम् ... ६७३—६७४

छत्रिन्यायवाक्यशेषन्याययोः मुख्यार्थसंभवेनानवतारात्, द्वा सुपर्णेत्यत्र ऋतं पिबन्तावित्यत्र च वेद्यभेदेन विद्याभेद इति पूर्वपक्षः ... ६७३

उपक्रमोपसंहारानुरोधेन मध्यस्यापि नेयत्वात् ऐकविद्यम्— इति सिद्धान्तः ... ६७३

अस्य योगस्य गुहाधिकरणप्रपञ्चत्वप्रदर्शनम् ... ६७४

२२. **अन्तरत्वाधिकरणम्** ६७४—६७६

उषस्तकहोलप्रश्नयोरभ्याससामर्थ्याद्विद्याभेदे शङ्कि-ते—शतकृत्वोऽपि हि पथ्यं वदन्त्याप्ता इति न्यायेन वस्तुस्वरूपं पुनःपुनरुच्यमानमपि न दोषमावहति; अत एव ताण्डिनां षष्ठे नवकृत्वोऽप्युपदेशे न विद्याभेदः; सर्वान्तरत्वविरोधश्च विद्याभेदपक्षे स्फुट एव इति विद्यैकत्वनिर्णयः ६७४

२३. **व्यतिहाराधिकरणम्** ६७६—६७८

ऐतरेयिणां जाबालानां च व्यतिहाराम्नाने निकृष्टे जीवे उत्कृष्टरूपाभेदचिन्तनमेकरूपमेवेति प्राप्ते, व्यतिहारेण द्विरूपा मतिः कर्तव्या, वचनप्रामाण्यात्; अन्वाचयशिष्टं तु तादात्म्यदार्ढ्यं भवन्नोपेक्षामहे—इति सिद्धान्तः .... ६७६

२४. **सत्याद्यधिकरणम्** ६७८—६८०

वाजसनेयकसत्यविद्यायां यक्षादित्यवाक्ययोः फलसंयोगभेदात् नित्यकाम्यदर्शपूर्णमासवत् द्वे सत्यविद्ये इति पूर्वपक्षे—प्रधानफलसत्त्वे अङ्गे फलश्रुतेरर्थवादत्वात्, प्रधानविधौ च प्रकृते कमिपदाभावेन रात्रिसत्रन्यायेन आर्थवादिकफलकल्पनायां जातेष्टिवत् अगृह्यमाणविशेषतया

संवलिताधिकारकल्पनाया औचित्यात्, प्रत्यभिज्ञाबलाच्च एकैव सत्यविद्या—इति सिद्धान्तः ... ६७८

वाजसनेयके छान्दोग्ये च अक्ष्यादित्यपुरुषविषया विद्या एकैवेति वाजसनेयिभ्यः सत्यादिगुणोपसंहारं मन्यमानानां केषांचित् व्याख्यानमुद्भाव्य, छान्दोग्यविद्यायाः कर्माङ्गावबद्धाया अनुबन्धाभेदेऽपि साध्यभेदात् भेद एवेति निरूपणेन तस्य निरसनम् .... ६७९

२५. कामाद्यधिकरणम् ... ६८०—६८१

दहरहार्दविद्ययोः सगुणनिर्गुणत्वेन भेदेऽपि, उभयत्र आत्मन एकत्वात्, सगुणविद्यासंबन्धिनां सत्यकामत्वादिगुणानाम् अन्यत्र स्तुत्यर्थमुपसंहारः; निर्गुणविद्यासंबन्धिनां वशित्वादिगुणानामितरत्र सत्यकामत्वादिनान्तरीयकतया प्राप्तिं द्रढयितुम् उपसंहारः—इति व्यवस्था ... ६८०

२६. आदराधिकरणम् ... ६८१—६८४

वैश्वानरविद्यागतप्राणाग्निहोत्रस्य विषयत्वेनोपन्यासः ६८२

'पदकर्माप्रयोजकं नयनस्य परार्थत्वात्' इति न्यायेन भोजनप्रयुक्तभक्तागमनसंयोगेन श्रूयमाणा प्राणाहुतिः भोजनाभावे न भक्तं प्रयोजयितुमर्हति—इति पूर्वपक्षाभावशङ्काया उत्थापनम् ... ६८२

अतिथिभोजनस्य प्राथम्यनिन्दापूर्वकं स्वामिभोजनं समयादपकृष्य अतिथिभोजनस्य पुरस्ताद्विदधती जाबालश्रुतिः प्राथम्यलोपमप्यसहमाना नतरां धर्मिलोपं सहेत; तद्यद्भक्तमित्यादिवाक्यं च भोजनागतभक्तद्रव्यतागुणविशेषमुपदिशति; पत्नीसंयाजवत् एकदेशद्रव्यसाधनस्यापि प्रयोजकत्वं संगच्छते; अतश्च आधाने पवमानेष्टिषु अग्निहोत्रहवणीलोपेऽपि हविर्निर्वापालोपवत् भोजनलोपेऽपि न प्राणाग्निहोत्रलोप इति—उक्तशङ्कानिरसनपूर्वकं पूर्वपक्षस्योद्भावनम् ... ६८२

'तद्यद्भक्तम्' इत्यादिवाक्यं सिद्धवद्भक्तोपनिपातपरामर्शेन भोजनार्थद्रव्यसाध्यतां प्राणाहुतीनां विदधाति, न तु चोदकप्राप्तद्रव्यबाधया भक्तद्रव्यम्, अग्निहोत्राङ्गानां सांपादिकत्वविरोधात्; अत 'उत्तरार्धात् स्विष्टकृते समवद्यति' इतिवदप्रयोजकलक्षणापन्नानां प्राणाहुतीनाम्, क्रतुप्रयुक्ताप्प्रणयनाश्रितस्य गोदोहनस्य क्रतुलोपे लोपवत्, आमिक्षार्थदध्यानयनलोपे वाजिनलोपवच्च, भोजनलोपे लोप एवेति सिद्धान्तः ... ६८३

२७. तन्निर्धारणाधिकरणम् ... ६८४—६८७

कर्माङ्गव्यपाश्रयाणाम् अनारभ्याधीतानाम् उद्गीथादिविज्ञानानां 'द्रव्यसंस्कारकर्मसु परार्थत्वात्फ-

लश्रुतिरर्थवादः स्यात्' इति न्यायेन रात्रिसत्र-न्यायगोचरादपनीयमानानां पर्णमयीत्वादिवत् नित्यता— इति पूर्वपक्षः ... ६८५

'उभौ कुरुतः' इति वचनम् अनित्यत्वं गमयति; विद्वदविद्वत्प्रयोगयोः पृथक्करणेन कर्मणः पृथगेव विज्ञानस्य फलश्रवणम् नार्थवादमात्रं युक्तं प्रतिपत्तुम्; अतः व्यापारात्मकविज्ञानानां पर्णतावैलक्षण्यात्, अनङ्गस्य ओंकारस्य उपासनं न संस्कार इति अञ्जनादिवैलक्षण्याच्च, गोदोहनादिवदनित्यता— इति सिद्धान्तः ... ६८५

२८. प्रदानाधिकरणम् ... ६८७—६९०

तत्तच्छ्रुत्यर्थालोचनया वायुप्राणयोः स्वरूपाभेदे सिद्धे, तद्विषयोपासनाया अप्यभेदः; उत्पन्नशिष्टश्च गुणो न भिन्द्यात्—इति प्रयोगस्याप्यैक्यम्— इति पूर्वपक्षः ... ६८७

सत्यपि विद्यैकत्वे राजादिगुणकेन्द्रप्रदानवत् अग्निहोत्रवद्वा प्रयोगभेदो गुणभेदादाश्रयणीय एवेति सिद्धान्तः ... ६८९

२९. लिङ्गभूयस्त्वाधिकरणम् ... ६९०—६९८

मनश्चिदादिसांपादिकाग्नीनां यत्किंचित्करणेन सिद्धिः—सदा सर्वैरनुष्ठेयता प्रसिद्धसंख्यातिरेकश्च—

इत्येवंजातीयकैर्लिङ्गैः स्वातन्त्र्यम्—इति सिद्धान्तप्रतिज्ञा ... ६९१
मानसग्रहकल्पस्य दशरात्रसंबन्धिनि द्वादशाहसंबन्धिनि वा दशमेऽहनि अङ्गत्ववत्, क्रियाप्रकरणात्क्रियाशेषत्वमेवाग्निकल्पस्य; लिङ्गत्वेनोपन्यस्तं च अन्यार्थदर्शनमात्रम्—इति पूर्वपक्षः ... ६९१
अतिदेशबलात् क्रियानुप्रवेशस्य दृढीकरणम् ... ६९२
अवधारणश्रुतिः सातत्यदर्शनं लिङ्गम्, पुरुषसंबन्धपरं वाक्यं च प्रकरणमपोह्य स्वातन्त्र्यमवगमयन्ति — इति सिद्धान्तः ... ६९२
मनोवृत्तिषु क्रियाङ्गानामनुबन्धस्य अन्यथानुपपत्त्या क्रत्वर्थत्वविघटनम् ... ६९५
अङ्गावबद्धश्रुतितो वैरूप्यस्य समर्थनम् ... ६९५
अतिदेशस्य विकल्पार्थत्वायोगात् क्रियानादरपर्यवसायिनः अग्नित्वसामान्यमवलम्ब्य सिद्धान्तानुगुण्यसमर्थनम् ... ६९६
प्रकरणादुत्कर्षस्य उपष्टम्भकतया अवेष्टिन्यायस्य उपन्यासः ... ६९६
मानसग्रहदृष्टान्तस्य विघटनम् ... ६९७
पूर्वोत्तरभागयोः विद्याप्रधानत्वात् तन्मध्यपातिनोऽपि विद्याप्रधानत्वम्— इति सिद्धान्तोपसंहारः ६९८

३०. शरीरे भावाधिकरणम् ... ६९८—७०२

देहव्यतिरिक्तस्य आत्मनोऽस्तित्वम् अधिकरणस्य तात्पर्यमुक्त्वा, अधस्तनतन्त्रोक्तेन सौत्रस्यास्य तदस्तित्वस्य अपौनरुक्त्यं समर्थ्य, पूर्वोत्तरतन्त्रशेषत्वं प्रतिपाद्य, पूर्वाधिकरणसंगतेश्च प्रदर्शनम् .. ६९८

देहात्मवादस्य सहेतुकमुद्भावनम् ... ६९९

देहधर्मविलक्षणा ज्ञानादयः देहभावाभावित्वात् देहातिरिक्ताश्रयाः ; उपलब्धिरूपश्च आत्मा भूतभौतिकातिरिक्त एव भवितुमर्हति—इति सिद्धान्तः ७००

३१. अङ्गावबद्धाधिकरणम् ... ७०२—७०४

उद्गीथादिकर्माङ्गावबद्धाः प्रत्ययाः प्रतिवेदं स्वशाखास्वेव व्यवतिष्ठेरन्, सांनिध्यात्— इति पूर्वपक्षः ... ७०२

उद्गीथश्रुतेरविशेषेण विशिष्टार्थप्रत्यायकत्वात् मन्त्रादिवत् सर्वशाखास्वनुवर्तेरन्— इति सिद्धान्तः ७०३

३२. भूमज्यायस्त्वाधिकरणम् ... ७०४—७०६

छान्दोग्ये वैश्वानरविद्यायां श्रुतयोः व्यस्तसमस्तोपासनयोः उभयथाप्युपासनम् ; अगृह्यमाणविशेषतया च न वैश्वानराधिकरणन्यायस्य अवकाशः इति पूर्वपक्षः .... ७०४

एकवाक्यतालाभाय वाक्यभेदपरिहाराय च सम-

स्तोपासनपरतैव संदर्भस्येति सिद्धान्तः ... ७०५
ज्यायस्त्ववचनात् व्यस्तोपासनानुमतेः एकदेश्यभि-
प्रेताया दूषणम् ... ७०६

३३. शब्दादिभेदाधिकरणम् ... ७०७—७०९

शाण्डिल्यदहरादिविद्यानां वस्तुनिष्ठताभ्रमेण अनुब-
न्धभेदेऽप्यभेदं मन्यमानानाम्— विद्याकार्त्स्न्याय
स्वपरशाखाविहितमेकवेद्यव्यपाश्रयं सर्वमपि गुण-
जातमुपसंहर्तव्यमिति पक्षस्योद्भावनम् ... ७०७
उपासनवाक्यानां कार्यनिष्ठतया शब्दादिभेदात्
विद्याभेदे व्यवस्थिते, निरङ्कुशो गुणोपसंहारः अ-
शक्यः अनुचितश्चेति सिद्धान्तः ... ७०७
अस्याधिकरणस्य पादादावेव आर्थिकी संगतिरिति
प्रतिपादनम् ... ७०९

३४. विकल्पाधिकरणम् ... ७०९—७१०

समानफलानां दर्शपूर्णमासज्योतिष्टोमादीनामिव अ-
हंग्रहाणां याथाकाम्ये शङ्किते, उपास्यसाक्षात्कार-
फलानामेतेषां विकल्प एव नियमवान्— इति
निर्णयः ... ७०९

३५. काम्याधिकरणम् ... ७१०—७११

प्रतीकोपासनेषु याथाकाम्यनिर्णयः ... ७१०

३६. यथाश्रयभावाधिकरणम् ... ७११—७१४

अङ्गानां प्रयोगवचनेन समुच्चयनियमात् तदवब-

द्धानां पुरुषार्थानामपि समुच्चयनियम इति पूर्व-
पक्षः ... ७११
प्रयोगविधिर्नानङ्गानामङ्गावबद्धोपासनानां संग्राहकः;
अङ्गतन्त्रत्वं च्चोपासनानां तदभावे अभाव एव,
ननु तन्नियतसहभावः ; अतोऽङ्गावबद्धोपासनानां
याथाकाम्यम्— इति सिद्धान्तः ... ७१२

## चतुर्थः पादः— अन्तरङ्गबहिरङ्ग-साधनविचारः ... ७१७—७६०

१. पुरुषार्थाधिकरणम् ७१७—७२७
औपनिषदमात्मज्ञानमपवर्गसाधनतया पुरुषार्थमिति
सिद्धान्तेनोपक्रमः ... ७१७
द्रव्यसंस्कारकर्मसु परार्थत्वात्फलश्रुतिरर्थवादः स्या-
दिति न्यायेन कर्तृसंस्कारद्वारा क्रत्वर्थमेवात्मज्ञा-
नमिति जैमिनिमतेन पूर्वपक्षः ... ७१८
ब्रह्मविदां कर्माचारदर्शनस्य लिङ्गतया उपन्यासः ७१९
तृतीयाश्रुतेः, समन्वारम्भवचनस्य, वेदार्थज्ञान-
वतः कर्मविधानस्य यावज्जीवं कर्मनियमस्य च
उपन्यासः ... ७२०
औपनिषदात्मज्ञानस्य क्रत्वनुष्ठानविरोधिनः क्रतुसं-
बन्ध एव नास्ति—इति सिद्धान्तिनां प्रतिवि-
धानम् ... ७२१

अकर्माङ्गत्वदर्शनस्य अनन्यथासिद्धस्य प्रतिपादनम् ७२३
तृतीयाश्रुतेः प्रकृतविद्यामात्राभिसंबन्धप्रदर्शनेन विघटनम् ... ७२३
समन्वारम्भवचनं मुमुक्षुविषयमपि विभागेनावकल्पते, अविभागेनाप्यमुमुक्षुविषयमिति प्रतिपादनम् ... ७२४
अध्ययनमात्रवत एव कर्मविधिः, न तु उपनिषदध्ययनवत इति लिङ्गान्तरस्य विघटनम् .... ७२४
नियमश्रवणमविद्यावद्विषयम्, विद्वद्विषयमपि विद्यास्तुत्यर्थं वा— इति परिहारः ... ७२५
प्रत्यक्षीकृतविद्याफलानां स्वेच्छातः प्रजादित्यागलिङ्गात् अशेषक्रियादिविभागोपमर्दकत्वाच्च विद्यायाः स्वातन्त्र्यमिति प्रतिपादनम् ... ७२६
ऊर्ध्वरेतःसु चाश्रमेषु विद्याश्रवणात् मिथोऽव्यतिरेकिणोः विद्याकर्मणोर्नाङ्गाङ्गिभावः— इति प्रतिपादनम् ... ७२७

**२. परामर्शाधिकरणम्** ... ७२७—७३३

विध्यभावात् स्मृत्याचारप्रसिद्धेश्च प्रत्यक्षश्रुतिविरुद्धाया अप्रमाणत्वात् नास्त्यूर्ध्वरेताः— इति प्रत्यक्षं जाबालानां पारिव्राज्यविधानमनपेक्ष्य आक्षेपः ७२७
सिद्धवत्परामर्शादपि शास्त्रान्तरविहितेन गार्हस्थ्येन तुल्यवदाश्रमान्तरमप्यभिदधतः आश्रमान्तरस्य

अनुष्ठेयता प्रत्येतुं शक्यते— इति सिद्धान्तः... ७२९
उपरिधारणवत् अपूर्वत्वात् आश्रमपरामर्शश्रुतिः विधिरेवेति प्रतिपादनम् ... ७३०
परामर्शेऽपि इतरेषामाश्रमाणां संस्तवसामर्थ्यात् ब्रह्मसंस्थता विधातव्या— इति पक्षान्तरम् ... ७३१
चतुर्ष्वाश्रमेषु यस्य कस्यचित् ब्रह्मसंस्थता— इति पक्षमुद्भाव्य — यज्ञाद्यसाधारणधर्मद्वारा आश्रमान्तरवत् ब्रह्मसंस्थशब्देनैव ब्रह्मनिष्ठाप्रधानश्चतुर्थाश्रमो गृह्यते; पृथग्व्यपदेशश्च ब्रह्मसंस्थं पूर्वोक्तेभ्य आश्रमिभ्यो भिन्नमवगमयति; यौगिकोऽप्ययं ब्रह्मसंस्थशब्दः असंभवात् अप्रकृते वर्तयितव्यः— इति निष्कर्षः ... ७३१
३. स्तुतिमात्राधिकरणम् ... ७३४—७३५
रसतमत्वादीनां कर्माङ्गसंस्तवार्थतामाशङ्क्य विध्यर्थताया निर्णयः ... ७३४
४. पारिप्लवाधिकरणम् ... ७३५—७३६
उपनिषदाख्यानानां 'सर्वाण्याख्यानानि पारिप्लवे' इति सर्वश्रुतिबलात् पारिप्लवार्थतामाशङ्क्य, सर्वशब्दस्य 'मनुर्वैवस्वतो राजा' इत्येवं पारिप्लवेन विशेषितान्येव आख्यानान्यपेक्ष्य प्रवृत्तत्वात् विद्यासंनिधिरप्रतिद्वन्द्वी विद्यैकवाक्यतां गमयतीति सिद्धान्तः ... ७३५

५. अग्नीन्धनाद्यधिकरणम् ... ७३७

आश्रमकर्माणि विद्यया स्वार्थसिद्धौ नापेक्षितव्यानि— इत्याद्याधिकरणफलस्य उपसंहारः, न तु स्वसिद्धौ— इत्यधिकविवक्षया ... ७३७

६. सर्वापेक्षाधिकरणम् ... ७३७—७४०

प्रमाणतश्च प्रमेयत उत्पत्तौ च कार्ये च न ज्ञानस्य कर्मापेक्षेति पूर्वपक्षः ... ७३७

योग्यतावशेन उत्पत्तौ विद्यया कर्माण्यपेक्ष्यन्ते— इति सिद्धान्तः ... ७३७

महावाक्यैकवाक्यताबद्धं वर्तमानापदेशाभिनिवेशं 'तस्मात्पूषा' इत्यादाविव अपूर्वत्वादत्रान्तरविधानस्य समर्थनेन शिथिलीकृत्य, शमादीनां यज्ञादीनां च साधनभावस्य विद्याविविदिषासंयोगभेदात् अन्तरङ्गबहिरङ्गतानिरूपणेन विवेचनम् ७३८

७. सर्वान्नानुमत्यधिकरणम् ... ७४०—७४३

सर्वान्नाभ्यनुज्ञानं प्राणसंवादे श्रूयमाणं भक्ष्याभक्ष्यविभागशास्त्रस्य सामान्यतः प्रवृत्तस्य बाधकं प्रवृत्तिविशेषकरतालाभेन विधीयमानमेवाश्रीयेत— इति पूर्वपक्षः ... ७४०

न हि कौलेयकमर्यादमन्नं मनुष्यजातिना युगपत् पर्यायेण वा शक्यमत्तुम्— इति प्राणान्नविज्ञान-

प्रशंसार्थ एवायमर्थवाद इति सिद्धान्तः ... ७४१
आपदि प्राणरक्षार्थमेव सर्वान्नाभ्यनुज्ञानमित्यत्र स्मृतेः
श्रुतेश्च उपन्यासः ... ७४२
८. आश्रमकर्माधिकरणम् ... ७४३—७४५
संयोगपृथक्त्वन्यायेन आश्रमकर्मणां नित्यानित्यसं-
योगस्य निष्कर्षः ... ७४३
प्रकरणान्तराधिकरणन्यायगोचरात् 'तमेतं वेदानुव-
चनेन...' इत्यादिवाक्योपात्तकर्मणामपनयनम् ७४४
९. विधुराधिकरणम् ... ७४५—७४७
दृष्टार्था च विद्या प्रतिषेधाभावमात्रेणापि अर्थिनम-
धिकरोति श्रवणादिषु—इति, रैक्ववाचक्नवीप्रभृ-
तीनां निदर्शनेन आश्रमधर्माभावेऽपि वर्णधर्मवि-
शेषाणामनुग्रहेण च विधुरादीनां विद्यायामधि-
कारस्य समर्थनम् ... ७४५
१०. तद्भूताधिकरणम् ... ७४७—७४८
आरोहवत्प्रत्यवरोहोऽपि कदाचित् ऊर्ध्वरेतसां स्यात्
इति मन्दाशङ्कायाः आरोहनियमस्य तत्तुल्यता-
भावस्य शिष्टाचाराभावस्य च व्याख्यानेन प्रत्या-
ख्यानम् ... ७४७
११. आधिकारिकाधिकरणम् ... ७४८—७४९
भ्रष्टोर्ध्वरेतसः प्रायश्चित्तमस्ति; स्मार्तं प्रायश्चित्ताद-

र्शनं तु यत्नगौरवार्थम्— इति प्रतिपादनम् ... ७४८

१२. बहिरधिकरणम् ... ७५०

कृतनिर्णेजनस्याप्यारूढपतितस्य अव्यवहार्यतायाः प्रतिपादनम् ... ७५०

१३. स्वाम्यधिकरणम् ... ७५१—७५२

उत्सर्गतः फलस्य यजमानगामित्वेऽपि परिक्रीतेनानुष्ठितं स्वामिनः फलायेत्युपपत्तेः अङ्गध्यानम् आर्त्विज्यमिति निष्कर्षः ... ७५१

१४. सहकार्यन्तरविध्यधिकरणम् ... ७५२—७५५

'अथ मुनिः' इत्यत्र मौनं ज्ञानातिशयरूपम् अनुत्पन्नविद्यातिशयं संन्यासिनमधिकृत्य, मा भूत् भेददर्शनोपरोध इति, विधिविभक्त्यश्रवणेऽपि विधीयमानमास्थेयम्, विधिमुख्ये सहकारितया समिदादिर्विध्यन्त इव— इति निष्कर्षः ... ७५२

छान्दोग्ये गार्हस्थ्येनोपसंहारः बहुलायाससाध्यकर्मबहुलत्वात् आश्रमान्तरधर्मसमवायाच्च तस्य, न पुनः तेन समापनात्—इति प्रतिपादनम् ... ७५४

१५. अनाविष्काराधिकरणम् ... ७५५—७५६

'बाल्येन तिष्ठासेत्' इत्यत्र बाल्यं न कामचारवादभक्षणता यथोपपादमूत्रपुरीषत्वं चेति सकला बा-

ल्चयौ, प्रधानविरोधात्; किंतु अप्ररूढेन्द्रियत्वा-
दिरान्तरो भावविशेषः— इति निष्कर्षः ... ७५५
१६. ऐहिकाधिकरणम् ... ७५७—७५९
न हि कुम्भदिदृक्षुश्चक्षुषी समुन्मीलयति कालान्तरी-
याय कुम्भदर्शनाय, किंतु तादात्विकाय; तथा
च ऐहिकमेव विद्याजन्मेति पूर्वपक्षः ... ७५७
श्रवणादिद्वारेणापि विद्योत्पद्यमाना प्रतिबन्धक्षयापे-
क्षयैव उत्पद्यत इति ऐहिकमामुष्मिकं विद्याज-
न्मेति श्रुतिस्मृत्युपन्यासेन सिद्धान्तः ... ७५७
१७. मुक्तिफलाधिकरणम ... ७५९—७६०
विद्यात्वं सामान्यतो दृष्टमवलम्ब्य मुक्तावपि उत्क-
र्षापकर्षौ स्यातामिति प्राप्ते, आगमतत्प्रभवयु-
क्त्याश्रितत्वेन ब्रह्मरूपायां मुक्त्यवस्थायां न को-
ऽप्यतिशयोऽवकाशं लभते— इति सिद्धान्तः ७५९

चतुर्थोऽध्यायः— फलाश्रयविचारः ७६१—८६२

प्रथमः पादः— जीवन्मुक्तिनिरूपणम् ७६३—७९६

१. आवृत्त्यधिकरणम् ... ७६५—७७२
अत्यन्तपरोक्षमुक्तिलक्षणफलार्थानि श्रवणादीनि या-
वद्विधानमेवानुष्ठेयानीति पूर्वपक्षः ... ७६५
दर्शनपर्यवसानानि हि श्रवणादीन्यावर्त्यमानानि दृ-
ष्टार्थानि भवन्ति— इति सिद्धान्तः ... ७६६

उद्गीथध्यानावृत्तिलिङ्गेन सिद्धान्तस्य दृढीकरणम् ... ७६७

साध्येऽनुभवे अर्थवत्यपि प्रत्ययावृत्तिः न तथा भवितुमर्हत्यसाध्ये निर्विशेषब्रह्मानुभवे—इत्याक्षेपः ७६७

वेदान्तार्थज्ञानाभ्यासाहितसंस्कारसचिवेन अन्तः-करणेन जीवस्य ब्रह्मस्वभावः समीक्षितुमलम्—इति परब्रह्मविषयेऽपि प्रत्यये तदुपायोपदेशेष्वावृत्तिसिद्धिः इति समाधिः .... ७६९

२. आत्मत्वोपासनाधिकरणम् ... ७७२—७७५

तत्त्वमसीत्याद्याः संसारिणः परमात्मनश्च विरुद्धधर्मसंसर्गेण नानात्वविनिश्चयात् प्रतीकोपदेशा एवेति पूर्वपक्षः ... ७७२

नेदं प्रतीकदर्शनम्, आत्मत्वेनोपगमात्, तथैवोपदेशात्, गौणत्वप्रसङ्गात्, वाक्यवैरूप्यात्, भेददृष्ट्यपवादाच्च— इति सिद्धान्तः ... ७७३

३. प्रतीकाधिकरणम् ... ७७५—७७६

'मनो ब्रह्म' इत्यादिषु सर्वत्र 'अहं मनः' इत्यादि द्रष्टव्यम्, ब्रह्मणो मुख्यमात्मत्वमिति; उपपन्नं च मनःप्रभृतीनां ब्रह्मविकारत्वेन तादात्म्यम्—इति पूर्वपक्षः ... ७७५

'यावद्वचनं वाचनिकम्' इति न्यायात् उपासनावाक्यानां तत्त्वमस्यादिसंदर्भैरेकवाक्यत्वाभावाच्च न प्रतीकेष्वात्मदृष्टिः— इति सिद्धान्तः ... ७७५

४. ब्रह्मदृष्ट्यधिकरणम् ... ७७६—७७९

ब्रह्मणः प्रधानस्य आदित्यादिदृष्टिभिः संस्कर्तव्यतैव शास्त्रार्थ इति पूर्वपक्षः ... ७७६

शब्दगत्यनुरोधेन प्राधान्यनिर्णये, शास्त्रार्थे च संदिग्धे लोकानुसारतोऽपि निर्धारणस्य संभवात्, इति परस्य ब्रह्मशब्दस्य प्रतीतिपरत्वाच्च ब्रह्मदृष्टिरेव आदित्यादिषु स्यात्— इति सिद्धान्तः ... ७७७

५. आदित्यादिमत्यधिकरणम् ... ७७९—७८२

अङ्गावबद्धोपासनेषु उत्कर्षानवधारणादनियमः अथवा फलसंनिकर्षबलात् अनङ्गेष्वेव अङ्गमतिरिति पक्षावुद्भाव्य, आदित्यादि मतीनाम् उद्गीथादिषु संस्कारकत्वेन उपयोगोपपत्तेः अनङ्गबुद्ध्या अङ्गान्येव उपास्यानि— इति सिद्धान्तः ... ७७९

६. आसीनाधिकरणम् ... ७८२—७८४

मानसमुपासनं न प्रतीक्षते शरीरस्थितेर्नियमम्— इत्याक्षिप्य समानप्रत्ययप्रवाहकरणविरुद्धत्वादासनातिरिक्तशरीरस्थितेः आसीनकर्मैव उपासनमिति सिद्धान्तः ... ७८२

७. एकाग्रताधिकरणम् ... ७८४—७८५

दिग्देशकालेषु अर्थलक्षण एव नियम इति सुहृद्भावेन उपदेशः ... ७८४

८. आप्रायणाधिकरणम् ... ७८५—७८६

प्रतिपत्तव्यफलभावनात्मकेषु प्रत्ययेषु आप्रायणादावृत्तिरिति निष्कर्षः ... ७८५

९. तदधिगमाधिकरणम् ... ७८६—७८९

शास्त्रव्याकोपप्रसङ्गात् मोक्षस्यापि देशकालनिमित्तापेक्षतयोपपत्तेः ब्रह्माधिगमेऽपि न दुरितनिवृत्तिः इति पूर्वपक्षः ... ७८६

'नाभुक्तं कर्म क्षीयते' इत्यादि शास्त्रमप्रतिबद्धसामर्थ्यकर्माभिप्रायम्— इति, ब्रह्माधिगमे उत्तरपूर्वयोर्दुरितयोरनभिसंबन्धविनाशाविति सिद्धान्तः ७८७

१०. इतरासंश्लेषाधिकरणम् ... ७८९—७९०

विशेषविधानस्य शेषप्रतिषेधनान्तरीयकत्वात् न धर्मस्य ब्रह्मज्ञानेन उच्छेद इति संभावनायाम्, दृष्टेनैव अशेषविशेषप्रविलयद्वारेण ब्रह्मज्ञानमुच्छिन्द्यात् सुकृतमपि, पाप्मश्रुत्या च पुण्यमपि ग्रहीतव्यम्— इति निर्णयः ... ७८९

११. अनारब्धाधिकरणम् ... ७९०—७९१

आरब्धविपाकस्य कर्मजालस्य समुदाचरद्वृत्तितया इतरेभ्यः प्रसुप्तवृत्तिभ्यः बलवत्त्वात् चिरतानुवादेन देहपातावधेरेव विधायकम् 'तस्य तावदेव चिरम्' इत्याद्यागममनुसृत्य प्रारब्धविपाकानां

कर्मणा प्रक्षयाय तदीयसमस्तफलोपभोगः प्रतीक्ष्यत एव सत्यपि तत्त्वसाक्षात्कारे—इति निर्णयः ७९०

१२. अग्निहोत्राद्यधिकरणम् ... ७९२—७९३

ब्रह्मविद्यासामर्थ्यादारादुपकारकाणां नित्यनैमित्तिकानां कर्मणां नोच्छेदः इति निष्कर्षः ... ७९२

१३. विद्याज्ञानसाधनत्वाधिकरणम् ... ७९३—७९५

विद्यारहितस्यापि कयापि मात्रया परविद्योत्पादोपयोगोऽस्त्येवेति विद्यारहितमपि यज्ञादि परविद्यार्थिनानुष्ठेयमिति निर्णयः ... ७९३

१४. इतरक्षपणाधिकरणम् ... ७९६

अनारब्धकार्यं इत्यत्र नञःफलस्य भोगेनारब्धकर्मनिवृत्तेः स्फुटीकरणम् .... ७९६

द्वितीयः पादः— उत्क्रान्तिक्रमः ... ७९७—८१८

१. वागधिकरणम् ... ७९९—८०१

'वाङ्मनसि संपद्यते' इत्यत्र श्रुत्यनुग्रहाय वाच एव मनसि लय इति पूर्वपक्षस्य—परत्र अविभागवचनात् दृष्टानुसारेणागमस्य अभेदोपचारपरत्वात् वाग्वृत्तिरेव मनसि संपद्यते—इति समाधानम् ... ७९९

उक्तयुक्त्या चक्षुरादीन्यपि वृत्तिद्वारैव मनसि संपद्यन्ते—इति प्रतिपादनम् ... ८००

२. मनोऽधिकरणम् ... ८०१—८०२

'मनः प्राणे' इत्यत्र 'अन्नमयं हि सोम्य मनः' इत्यादिश्रुत्या प्रकृतिविकारभावसंभवात् मनस एव प्राणे लय इति पूर्वपक्षं प्रापय्य, सुषुप्त्यादौ मनोवृत्तीनामेवोपशमदर्शनात् उक्तश्रुत्या च साक्षात्प्रकृतिविकारभावाभानात् मनः वृत्तिद्वारैव प्राणे प्रलीयत इति सिद्धान्तः .... ८०१

३. अध्यक्षाधिकरणम् ... ८०२—८०५

'प्राणस्तेजसि' इत्यत्र यथाश्रुति प्राणवृत्तेः भूतविशेषे लय इत्याशङ्कायाः—श्रुत्यन्तरगतस्यापि विशेषस्यापेक्षणीयत्वात् प्राणः विज्ञानात्मन्यवतिष्ठते तदुपगमानुगमावस्थानश्रुतिभ्यः इति निरसनम् ... ८०२

'प्राणस्तेजसि' इत्यत्र प्राणसंपृक्ताध्यक्षस्यैव ग्रहणमिति निर्णयः ... ८०३

कार्यस्य शरीरस्यानेकात्मकत्वात् अनेकात्मकेनैव कारणेनापि भाव्यमिति तेजःपदं तत्सहचरितसूक्ष्मभूतपञ्चकोपलक्षणमिति निर्णयः ... ८०४

४. आसृत्युपक्रमाधिकरणम् ... ८०५—८०६

अपरब्रह्मविद्यावतस्तद्रहितस्य च समानैवैषा उत्क्रान्तिः, आ कार्यब्रह्मलोकप्राप्तेर्विद्योपक्रमात्, अविशेषश्रवणाच्च इति निष्कर्षः ... ८०५

५. संसारव्यपदेशाधिकरणम् ... ८०७—८०८

मिथ्याज्ञाननिमित्तश्च बन्धो न सम्यग्ज्ञानादृते विस्रंसितुमर्हतीति परस्यां देवतायामियं संपत्तिः बीजभावावशेषैव—इति निर्णयः ... ८०७

नाडीनिष्क्रमणश्रवणादिना सूक्ष्मशरीरमेव प्रवसतो जीवस्य आश्रयभूतमिति निर्णयः ... ८०८

६. प्रतिषेधाधिकरणम् ... ८०८—८१२

आत्यन्तिकेऽप्यमृतत्वे 'न तस्मात् प्राणाः' इति शाखान्तरीयश्रुतिमवलम्ब्य अस्त्युत्क्रान्तिरिति पूर्वपक्षः ८०९

प्राप्तिपूर्वः प्रतिषेधो भवति ; अविदुषो हि देहादुत्क्रमणं दृष्टमिति तत्सामान्याद्विदुषोऽपि प्राप्ते उत्क्रमणे प्रतिषेध उपपद्यते— इत्यतो नास्त्युत्क्रान्तिरात्यन्तिकामृतत्वे इति सिद्धान्तः ... ८१०

७. वागादिलयाधिकरणम् ... ८१२

परब्रह्मविदः परस्मिन्नेवात्मनि प्राणादीनां प्रविलय इति प्रतिपादनम् ... ८१२

८. अविभागाधिकरणम् ... ८१२—८१३

अविद्यानिमित्तानां कलानां न विद्यानिमित्ते प्रलये सावशेषत्वोपपत्तिरिति उपदेशः ... ८१३

९. तदोकोऽधिकरणम् ... ८१३—८१४

विद्यासामर्थ्यात् मूर्धन्ययैव शताधिकया नाड्या वि-

द्वान् निष्कामति, इतराभिरितरे इति निर्णयः ... ८१३

१०. रश्म्यधिकरणम् .... ८१५—८१६

रात्रावहनि च म्रियमाणो विद्वानविशेषेण रश्म्यनुसारी सन् आदित्यमण्डलं प्राप्नोतीति सिद्धान्तप्रतिज्ञा ८१५

रात्रौ मृतस्य नाडीरश्मिसंबन्धाभावात् नास्ति रश्म्यनुसारित्वमिति शङ्कामुद्भाव्य, यावद्देहभावित्वान्नाडीरश्मिसंबन्धस्य अविशेषेण वर्ण्यमानरश्म्यनुसारसार्थक्याय च रात्रिंदिवं रश्म्यनुसारित्वमिति तन्निरासः ८१५

११. दक्षिणायनाधिकरणम् .... ८१६—८१८

अपाक्षिकफलत्वाद्विद्याया अनियतकालत्वान्मृत्योः दक्षिणायनेऽपि म्रियमाणो विद्वान् प्राप्नोत्येव विद्याफलम्— इत्युपपादनम् ... ८१७

'यत्र काले' इत्यादिस्मृत्या अहरादिकालविशेषनियमशङ्कायाः— श्रुतिस्मृत्योरातिवाहिककालप्राधान्यविषयभेदव्यवस्थया, प्रत्यभिज्ञाने च कालद्वारेण आतिवाहिक्य एव उक्ता इति उभयथाप्यविरोधः इति परिहारः ... ८१७

**तृतीयः पादः— अर्चिरादिमार्गस्य गन्तव्यस्य च निर्णयः ... ८१९—८४३**

१. अर्चिराद्यधिकरणम् ... ८२१—८२३

नानाशाखास्वनेकधा श्रूयमाणा अर्चिरादिकाः सृतयः

भिन्नप्रकरणस्थत्वात् भिन्नोपासनायोगाच्च मिथः अनपेक्षा इति पूर्वपक्षः .... ८२१
सर्वत्र गत्येकदेशप्रत्यभिज्ञानात् गन्तव्याभेदाच्च इतरेतरविशेषणविशेष्यभावोपपत्तेः एकैव अर्चिरादिका सृतिः अनेकविशेषणा ब्रह्मलोकप्रपदनी—इति सिद्धान्तः ८२२

२. वाय्वधिकरणम् ... ८२३—८२५
'यदा वै पुरुषोऽस्माल्लोकात्प्रैति' इत्यादिश्रुत्या अब्दादित्ययोरन्तराले वायोर्निवेशः—इत्यादिना गतिविशेषणानां संनिवेशविशेषस्य सुहृद्भूत्वा उपदेशः ८२४

३. तडिदधिकरणम् ... ८२५
विद्युद्वरुणयोः संबन्धविशेषसत्त्वात् विद्युत उपरिष्टात् वरुणः संबद्ध्यते, 'आगन्तूनाम्' इति न्यायेन वरुणादधि इन्द्रप्रजापती-इत्युपदेशः ... ८२५

४. आतिवाहिकाधिकरणम् ... ४२६—४२९
अर्चिरादयः मार्गचिह्नसरूपत्वात् चिह्नान्येव; अथवा लोकरूपत्वात् भोगभूमयः—इति पूर्वपक्षः ... ८२६
'तत्पुरुषोऽमानवः स एनान्ब्रह्म गमयति' इति लिङ्गात् संपिण्डितकरणानां सूक्ष्मदेहवतां गतौ स्वातन्त्र्याभावाच्च देवतात्मानः आतिवाहिका एव अर्चिरादयः इति सिद्धान्तः ... ८२७
वरुणादयस्तु अप्रतिबन्धकरणादिना अनुग्राहका एव, तत्प्रभृति अमानवपुरुषेणैव वहनात्—इति निर्णयः ८२८

५. कार्याधिकरणम् ... ८२९—८४१

'स एनान्ब्रह्म गमयति' इत्यत्र किं कार्यमपरं ब्रह्म गमयति, आहोस्वित् परमेव मुख्यं ब्रह्म—इति विचिकित्सायां अप्राप्तप्रापणी गतिः न नित्यप्राप्तं परं ब्रह्म गमयितुमीष्टे, अपि तु अप्राप्तपूर्वत्वात् कार्यमपरमेव— इति तत्त्वदर्शी बादरिर्ददर्श— इति अर्थक्रमानुसारेण सिद्धान्तः ... ८२९

परब्रह्मसामीप्यात् अपरब्रह्मणि ब्रह्मशब्दोपपत्तिः— इति कथनम् ... ८३०

कार्यब्रह्मलोकं गतस्य अनावृत्त्यादिश्रुत्यभिधानेभ्यः क्रममुक्तिः प्रत्येतव्या— इति प्रदर्शनम् ... ८३१

ब्रह्म-शब्दस्य परब्रह्मणि मुख्यत्वात्, अमृतत्वफलदर्शनात्, परप्रकरण एव प्रजापतिसद्मप्रतिपत्त्यादिश्रवणाच्च परब्रह्मविषया गतिश्रुतयः— इति जैमिन्यभिमतः पूर्वपक्षः ... ८३१

पूर्वत्वात् पूर्वाणि पूर्वपक्षसूत्राणि—इति केचिन्मतासिद्धान्तानुवादः ... ८३३

'निष्कलं निष्क्रियम्' इत्यादिना प्रतिषिद्धसर्वविशेषस्य ब्रह्मणः गन्तव्यत्वानुपपत्तिप्रदर्शनम् ... ८३४

जगदुत्पत्त्यादिहेतुत्वश्रुत्या ब्रह्मणः अनेकशक्तित्वम्— इति शङ्कायाः सफलानन्यपरविशेषनिराकरणश्रुत्यनुरोधेन अफलान्यपरोत्पत्त्यादिश्रुतेः तच्छेषत्वात् न तद-

नुरोधेनानेकशक्तियोगो ब्रह्मणः—इति समाधानम्... ८३४
गतेर्विचारासहत्वादपि अनुपपत्तिप्रदर्शनम् ... ८३६
अयत्नसिद्धो मोक्ष इति कर्मिणां मतमुपन्यस्य तस्य शास्त्रप्रमाणकत्वाभावात् स्वमनीषाकल्पितत्वात् उपपत्तिरहितत्वाच्च अनुपादेयत्वोपपादनम् ... ८३७
सर्वव्यवहाराणां प्राक्प्रबोधात् उपपत्त्युपन्यासः ... ८३९
गतिश्रुतीनां सगुणविद्याविषयत्वप्रपञ्चनम् ... ८४०
स्वमतोपन्यासोपसंहारः ... ८४१

६. अप्रतीकालम्बनाधिकरणम् ... ८४२—८४३
विकारालम्बनेषु मध्ये प्रतीकालम्बनान्वर्जयित्वा सर्वानपि अमानवः पुरुषः ब्रह्म गमयति—इति निर्णयः ८४२
फलविशेषदर्शनाच्च न प्रतीकालम्बनानाम् इतरैस्तुल्यफलत्वम्—इति निरूपणम् ... ८४३

**चतुर्थः पादः— ज्ञानोपासनयोः फलनिर्णयः ... ८४५—८६२**

१. संपद्याविर्भावाधिकरणम् ... ८४७—८४९
'एवमेवैषः...स्वेन रूपेणाभिनिष्पद्यते' इत्यत्र स्वेन इति विशेषणस्यानैरर्थ्याय केवलेनैवात्मरूपेण अभिनिष्पद्यते— इति निर्णयः ... ८४७
जाग्रदाद्यवस्थात्रये तुरीयावस्थायां च बद्धत्वमुक्तत्वकृतविशेषप्रतिपादनम् ... ८४८

'परं ज्योतिरुपसंपद्य' इत्यत्र ज्योतिःशब्दस्य भौतिकपरत्वमाशङ्क्य, प्रकरणात् तस्य आत्मपरत्वव्यवस्थापनम् ... ८४९

२. अविभागाधिकरणम् ... ८५०

स्वेन रूपेणाभिनिष्पद्यते यः, स परेणात्मना अविभक्त एवावतिष्ठते, 'तत्त्वमसि' इत्यादिवाक्यैः तथा दृष्टत्वात्– इति समर्थनम् ... ८५०

३. ब्राह्माधिकरणम् ... ८५१—८५२

'स्वेन रूपेण' इत्यत्र अपहतपाप्मत्वादिना स्वेन ब्राह्मेण रूपेण अभिनिष्पद्यते, 'य आत्मा' इत्याद्युपन्यासादिभ्यः—इति जैमिन्याचार्यमतोपन्यासः ८५१

निरस्ताशेषप्रपञ्चेन अव्यपदेश्येन चैतन्यमात्रात्मना अभिनिष्पद्यमानस्य मुक्तात्मनः अर्थशून्यैरेव अपहतपाप्मादिशब्दैः व्यपदेशः–इति औडुलोम्याचार्यमतोपन्यासः .... ८५१

सत्यकामत्वादीनाम् औपाधिकत्वेऽपि तच्छ्रुतीनां व्यावहारिकं प्रामाण्यमपेक्षणीयमिति बादरायणाचार्याभिप्रेतः सिद्धान्तः ... ८५२

४. संकल्पाधिकरणम् ... ८५३—८५४

'संकल्पादेवास्य पितरः समुत्तिष्ठन्ति' इत्यादौ एवकारश्रवणात्, प्राकृतसंकल्पविलक्षणत्वाच्च मुक्तसं-

कल्पस्य, संकल्पादेव केवलात् पित्रादिसमुत्थानम्—
इति निर्णयः ... ८५३

५. अभावाधिकरणम् ... ८५४—८५६

'संकल्पादेवास्य पितरः समुत्तिष्ठन्ति' इत्यत्र विदुषः संकल्पसाधनमनसः सत्त्वेऽपि किं शरीरेन्द्रियाणि सन्ति, न वा सन्तीति समीक्षायाम् एवकारेण मनसा इति विशेषणाच्च देहेन्द्रियाणां अभावो विदुषः—इति बादरिमतप्रदर्शनम् ... ८५४

'स एकधा भवति' इत्यादिना अनेकविधता न विना शरीरभेदेन आञ्जसी—इति सेन्द्रियस्य शरीरस्य सद्भावो जैमिन्यभिमत इति प्रदर्शनम् ... ८५५

बादरायणस्त्वाचार्यः उभयलिङ्गश्रुतिदर्शनात् उभयविधत्वं साधु मन्यते—इति सिद्धान्तः ... ८५५

६. प्रदीपाधिकरणम् ... ८५६—८५७

विदुषः सशरीरत्वपक्षे त्रिधाभावादिषु अनेकशरीरसर्गे किं निरात्मकानि शरीराणि सृज्यन्ते, किं वा सात्मकानि इति विशये 'त्रिधा भवति पञ्चधा भवति' इत्यादिश्रुत्या एकोऽपि सन् विद्वान् ऐश्वर्ययोगात् प्रदीपवदनेकभावमापद्य सर्वशरीराण्याविशतीति सात्मकानि सर्वशरीराणि इति निष्कर्षः ... ८५६

विशेषविज्ञानाभाववचनानि सुषुप्तमुक्त्यान्यतरावस्थामपे-

क्ष्य, न तु सगुणविद्याविपाकस्थानमवस्थान्तरम्—
इति प्रदर्शनम् ... ८५७

७. जगद्व्यापाराधिकरणम् ... ८५८—८६२

तत्रभवन्तं परमेश्वरं प्रकृत्यैव जगत्स्रष्टृत्वादिश्रुतीनां प्रवृत्तेः, समप्रधानानां नियमेनैकमत्यादर्शनाच्च जगद्व्यापारं विहाय अन्यदणिमाद्यैश्वर्यं परमेश्वरायत्तं सगुणोपासकानाम् ईश्वरसायुज्यं व्रजतां विदुषाम्—इति निर्णयः ... ८५८

'तावानस्य महिमा' इत्यादिश्रुत्या द्विरूपे परमेश्वरे निर्गुणं रूपमनवाप्य यथा सगुण एवावतिष्ठन्ते विद्वांसः, एवं सगुणेऽपि निरवग्रहमैश्वर्यमनवाप्य सावग्रह एव अवतिष्ठन्ते— इति प्रतिपादनम् ... ८६०

एवं सति सातिशयैश्वर्यस्यान्तवत्त्वात् सत्संपन्नानाम् आवृत्तिप्रसक्तिरिति शङ्कायाम्— ये नाडीरश्मिसंबन्धपूर्वकमर्चिरादिपर्वणा देवयानेन पथा ब्रह्मलोकं गच्छन्ति, तेषां 'न च पुनरावर्तते' इत्यादिश्रुतिभ्यः न पुनरावृत्तिः— इति समाधानम् ... ८६१

सम्यग्दर्शनविध्वस्ततमसां तु सिद्धैव अनावृत्तिरिति प्रतिपादनम् ८६२

श्रीमच्छंकरभगवत्पादैर्विरचितम्

# ॥ ब्रह्मसूत्रभाष्यम् ॥

## तृतीयाध्याये

## द्वितीयः पादः

## द्वितीयः पादः ॥

Gourishunker Ganeriwala.

अतिक्रान्ते पादे पञ्चाग्निविद्यामुदाहृत्य जीवस्य संसारगतिप्रभेदः प्रपञ्चितः; इदानीं तस्यैवावस्थाभेदः प्रपञ्च्यते। इदमामनन्ति— 'स यत्र प्रस्वपिति' इत्युपक्रम्य 'न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ रथान्रथयोगान्पथः सृजते' इत्यादि। तत्र संशयः— किं प्रबोधे इव स्वप्नेऽपि पारमार्थिकी सृष्टिः, आहोस्विन्मायामयीति। तत्र तावत्प्रतिपद्यते—

### संध्ये सृष्टिराह हि ॥ १ ॥

१. संध्याधिकरणम्।

संध्ये सृष्टिरिति; संध्यमिति स्वप्नस्थानमाचष्टे, वेदे प्रयोगदर्शनात्— 'संध्यं तृतीयꣳ स्वप्नस्थानम्' इति; द्वयोर्लोकस्थानयोः प्रबोधसंप्रसादस्थानयोर्वा संधौ भवतीति संध्यम्; तस्मिन्संध्ये स्थाने तथ्यरूपैव सृष्टिर्भवितुमर्हति; कुतः? यतः प्रमाणभूता श्रुतिरेवमाह— 'अथ रथान्रथयोगान्पथः सृजते'

इत्यादि; 'स हि कर्ता' इति च उपसंहारात् एवमेवावगम्यते ॥

## निर्मातारं चैके पुत्रादयश्च ॥ २ ॥

अपि च एके शाखिनः अस्मिन्नेव संध्ये स्थाने कामानां निर्मातारमात्मानमामनन्ति—'य एष सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः' इति; पुत्रादयश्च तत्र कामा अभिप्रेयन्ते—काम्यन्त इति। ननु कामशब्देनेच्छाविशेषा एवोच्येरन्; न, 'शतायुषः पुत्रपौत्रान्वृणीष्व' इति प्रकृत्य अन्ते 'कामानां त्वा कामभाजं करोमि' इति प्रकृतेषु तत्र तत्र पुत्रादिषु कामशब्दस्य प्रयुक्तत्वात्। प्राज्ञं चैनं निर्मातारं प्रकरणवाक्यशेषाभ्यां प्रतीमः—प्राज्ञस्य हीदं प्रकरणम्—'अन्यत्र धर्मादन्यत्राधर्मात्' इत्यादि; तद्विषय एव च वाक्यशेषोऽपि—'तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते। तस्मिँल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन' इति। प्राज्ञकर्तृका च सृष्टिस्तथ्यरूपा समधिगता जागरिताश्रया, तथा स्वप्नाश्रयापि सृष्टिर्भवितुमर्हति; तथा च श्रुतिः—'अथो खल्वाहुर्जागरितदेश एवास्यैष इति यान्येव जाग्रत्पश्यति तानि सुप्तः' इति स्वप्नजागरितयोः समानन्यायतां श्रावयति। तस्मात्तथ्यरूपैव संध्ये सृष्टिरिति ॥

एवं प्राप्ते, प्रत्याह—

## मायामात्रं तु कार्त्स्न्येनानभिव्यक्त-स्वरूपत्वात् ॥ ३ ॥

तु-शब्दः पक्षं व्यावर्तयति । नैतदस्ति—यदुक्तम्, संध्ये सृष्टिः पारमार्थिकीति ; मायैव संध्ये सृष्टिः, न परमार्थगन्धोऽप्यस्ति ; कुतः ? कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात्—न हि कार्त्स्न्येन परमार्थवस्तुधर्मेण अभिव्यक्तस्वरूपः स्वप्नः ; किं पुनरत्र कार्त्स्न्यमभिप्रेतम् ? देशकालनिमित्तसंपत्तिः अबाधश्च । न हि परमार्थवस्तुविषयाणि देशकालनिमित्तानि अबाधश्च स्वप्ने संभाव्यन्ते—

न तावत्स्वप्ने रथादीनामुचितो देशः संभवति ; न हि संवृते देहदेशे रथादयोऽवकाशं लभेरन् ; स्यादेतत्— बहिर्देहात् स्वप्नं द्रक्ष्यति, देशान्तरितद्रव्यग्रहणात् ; दर्शयति च श्रुतिः बहिर्देहात्स्वप्नम्—'बहिष्कुलायादमृतश्चरित्वा । स ईयतेऽमृतो यत्र कामम्' इति ; स्थितिगतिप्रत्ययभेदश्च न अनिष्क्रान्ते जन्तौ सामञ्जस्यमश्नुवीत—इति । नेत्युच्यते—न हि सुप्तस्य जन्तोः क्षणमात्रेण योजनशतान्तरितं देशं पर्येतुं विपर्येतुं च ततः सामर्थ्यं संभाव्यते ; कचिच्च प्रत्या-

गमनवर्जितं स्वप्नं श्रावयति— कुरुष्वहमद्य शयानो निद्रयाभिप्लुतः, स्वप्ने पञ्चालानभिगतश्च अस्मिन्प्रतिबुद्धश्च— इति; देहाच्चेदपेयात्, पञ्चालेष्वेव प्रतिबुध्येत; तानसावभिगत इति; कुरुष्वेव तु प्रतिबुध्यते; येन च अयं देहेन देशान्तरमश्नुवानो मन्यते, तमन्ये पार्श्वस्थाः शयनदेश एव पश्यन्ति; यथाभूतानि च अयं देशान्तराणि स्वप्ने पश्यति, न तानि तथाभूतान्येव भवन्ति; परिधावंश्चेत्पश्येत्, जाग्रद्वत् वस्तुभूतमर्थमाकलयेत् । दर्शयति च श्रुतिरन्तरेव देहे स्वप्नम्— 'स यत्रैतत्स्वप्न्यया चरति' इत्युपक्रम्य 'स्वे शरीरे यथाकामं परिवर्तते' इति । अतश्च श्रुत्युपपत्तिविरोधाद्बहिष्कुलायश्रुतिः गौणी व्याख्यातव्या—बहिरिव कुलायात् अमृतश्चरित्वेति—यो हि वसन्नपि शरीरे न तेन प्रयोजनं करोति, स बहिरिव शरीराद्भवति—इति । स्थितिगतिप्रत्ययभेदोऽप्येवं सति विप्रलम्भ एवाभ्युपगन्तव्यः ॥

कालविसंवादोऽपि च स्वप्ने भवति— रजन्यां सुप्तो वासरं भारते वर्षे मन्यते; तथा मुहूर्तमात्रवर्तिनि स्वप्ने कदाचित् बहून् वर्षपूगान् अतिवाहयति । निमित्तान्यपि च स्वप्ने न बुद्धये कर्मणे वा उचितानि विद्यन्ते; करणोपसंहाराद्धि नास्य अश्वरथादिग्रहणाय चक्षुरादीनि सन्ति;

रथादिनिर्वर्तनेऽपि कुतोऽस्य निमेषमात्रेण सामर्थ्यं दारूणि वा । बाध्यन्ते चैते रथाश्वादयः स्वप्नदृष्टाः प्रबोधे ; स्वप्न एव च एते सुलभबाधा भवन्ति, आद्यन्तयोर्व्यभिचारदर्शनात्—रथोऽयमिति हि कदाचित्स्वप्ने निर्धारितः क्षणेन मनुष्यः संपद्यते, मनुष्योऽयमिति निर्धारितः क्षणेन वृक्षः । स्पष्टं चाभावं रथादीनां स्वप्ने श्रावयति शास्त्रम्— 'न तत्र रथा न रथयोगा न पन्थानो भवन्ति' इत्यादि । तस्मान्मायामात्रं स्वप्नदर्शनम् ॥

## सूचकश्च हि श्रुतेराचक्षते च तद्विदः ॥ ४ ॥

मायामात्रत्वात्तर्हि न कश्चित्स्वप्ने परमार्थगन्धोऽस्तीति—नेत्युच्यते—सूचकश्च हि स्वप्नो भवति भविष्यतोः साध्वसाधुनोः ; तथा हि श्रूयते— 'यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति । समृद्धिं तत्र जानीयात्तस्मिन्स्वप्ननिदर्शने' इति ; तथा 'पुरुषं कृष्णं कृष्णदन्तं पश्यति स एनं हन्ति' इत्येवमादिभिः स्वप्नैरचिरजीवित्वमावेद्यत इति श्रावयति ; आचक्षते च स्वप्नाध्यायविदः— 'कुञ्जरारोहणादीनि स्वप्ने धन्यानि, खरयानादीन्यधन्यानि' इति ; मन्त्रदेवताद्रव्यविशेषनिमित्ताश्च केचित्स्वप्नाः सत्यार्थगन्धिनो भवन्तीति

मन्यन्ते । तत्रापि भवतु नाम सूच्यमानस्य वस्तुनः सत्यत्वम् ; सूचकस्य तु स्त्रीदर्शनादेर्भवत्येव वैतथ्यम् , बाध्यमानत्वादित्यभिप्रायः । तस्मादुपपन्नं स्वप्नस्य मायामात्रत्वम् ॥

यदुक्तम्— 'आह हि' इति तदेवं सति भाक्तं व्याख्यातव्यम्—यथा 'लाङ्गलं गवादीनुद्वहति' इति निमित्तमात्रत्वादेवमुच्यते, न तु प्रत्यक्षमेव लाङ्गलं गवादीनुद्वहति ; एवं निमित्तमात्रत्वात्— सुप्तो रथादीन्सृजते, 'स हि कर्ता'— इति च उच्यते ; न तु प्रत्यक्षमेव सुप्तो रथादीन्सृजति । निमित्तत्वं तु अस्य रथादिप्रतिभाननिमित्तमोदत्रासादिदर्शनात्तन्निमित्तभूतयोः सुकृतदुष्कृतयोः कर्तृत्वेनेति वक्तव्यम् । अपि च जागरिते विषयेन्द्रियसंयोगात् आदित्यादिज्योतिर्व्यतिकराच्च आत्मनः स्वयंज्योतिष्ट्वं दुर्विवेचनमिति तद्विवेचनाय स्वप्न उपन्यस्तः ; तत्र यदि रथादिसृष्टिवचनं श्रुत्या नीयेत, ततः स्वयंज्योतिष्ट्वं न निर्णीतं स्यात् ; तस्माद्रथाद्यभाववचनं श्रुत्या, रथादिसृष्टिवचनं तु भक्त्येति व्याख्येयम् । एतेन निर्माणश्रवणं व्याख्यातम् । यदप्युक्तम्— 'प्राज्ञमेनं निर्मातारमामनन्ति' इति, तदप्यसत् , श्रुत्यन्तरे 'स्वयं विहत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपिति' इति जीवव्यापारश्रवणात् ; इहापि 'य एष सुप्तेषु जागर्ति' इति प्रसिद्धानुवादाज्जीव

एवायं कामानां निर्माता संकीर्त्यते; तस्य तु वाक्यशेषेण 'तदेव शुक्रं तद्ब्रह्म' इति जीवभावं व्यावर्त्य ब्रह्मभाव उपदिश्यते– 'तत्त्वमसि' इत्यादिवत्– इति न ब्रह्मप्रकरणं विरुध्यते। न चास्माभिः स्वप्नेऽपि प्राज्ञव्यापारः प्रतिषिध्यते, तस्य सर्वेश्वरत्वात् सर्वास्वप्यवस्थास्वधिष्ठातृत्वोपपत्तेः; पारमार्थिकस्तु नायं संध्याश्रयः सर्गः वियदादिसर्गवत्– इत्येतावत्प्रतिपाद्यते; न च वियदादिसर्गस्याप्यात्यन्तिकं सत्यत्वमस्ति; प्रतिपादितं हि 'तदनन्यत्वमारम्भणशब्दादिभ्यः' इत्यत्र समस्तस्य प्रपञ्चस्य मायामात्रत्वम्। प्राक् तु ब्रह्मात्मत्वदर्शनात् वियदादिप्रपञ्चो व्यवस्थितरूपो भवति; संध्याश्रयस्तु प्रपञ्चः प्रतिदिनं बाध्यते—इत्यतो वैशेषिकमिदं संध्यस्य मायामात्रत्वमुदितम्॥

## पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ॥ ५॥

अथापि स्यात्—परस्यैव तावदात्मनोऽशः जीवः–अग्नेरिव विस्फुलिङ्गः; तत्रैवं सति यथा अग्निविस्फुलिङ्गयोः समाने दहनप्रकाशनशक्ती भवतः, एवं जीवेश्वरयोरपि ज्ञानैश्वर्यशक्ती; ततश्च जीवस्य ज्ञानैश्वर्यवशात् सांकल्पिकी स्व-

प्रे रथादिसृष्टिर्भविष्यतीति । अत्रोच्यते—सत्यपि जीवेश्वरयोरंशांशिभावे प्रत्यक्षमेव जीवस्येश्वरविपरीतधर्मत्वम् । किं पुनर्जीवस्य ईश्वरसमानधर्मत्वं नास्त्येव? न नास्त्येव; विद्यमानमपि तत् तिरोहितम् अविद्यादिव्यवधानात् । तत्पुनस्तिरोहितं सत् परमेश्वरमभिध्यायतो यतमानस्य जन्तोर्विधूतध्वान्तस्य—तिमिरतिरस्कृतेव दृक्शक्तिः औषधवीर्यात्—ईश्वरप्रसादात् संसिद्धस्य कस्यचिदेवाविर्भवति, न स्वभावत एव, सर्वेषां जन्तूनाम्; कुतः? ततो हि ईश्वराद्धेतोः, अस्य जीवस्य, बन्धमोक्षौ भवतः— ईश्वरस्वरूपापरिज्ञानात् बन्धः, तत्स्वरूपपरिज्ञानात्तु मोक्षः । तथा च श्रुतिः—'ज्ञात्वा देवं सर्वपाशापहानिः क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः । तस्याभिध्यानात्तृतीयं देहभेदे विश्वैश्वर्यं केवल आप्तकामः' इत्येवमाद्या ॥

## देहयोगाद्वा सोऽपि ॥ ६ ॥

कस्मात्पुनर्जीवः परमात्मांश एव सन् तिरस्कृतज्ञानैश्वर्यो भवति? युक्तं तु ज्ञानैश्वर्ययोरतिरस्कृतत्वम्, विस्फुलिङ्गस्येव दहनप्रकाशनयोः—इति । उच्यते—सत्यमेवैतत्; सोऽपि तु जीवस्य ज्ञानैश्वर्यतिरोभावः, देहयोगात् देहेन्द्रियमनोबुद्धिविषयवेदनादियोगात् भवति । अस्ति च अत्रोपमा—

यथा अग्नेर्दहनप्रकाशनसंपन्नस्याप्यरणिगतस्य दहनप्रकाशने तिरोहिते भवतः, यथा वा भस्मच्छन्नस्य— एवमविद्याप्रत्युपस्थापितनामरूपकृतदेहाद्युपाधियोगात् तदविवेकभ्रमकृतो जीवस्य ज्ञानैश्वर्यतिरोभावः। वा-शब्दो जीवस्य ईश्वरात् अन्यत्वशङ्काव्यावृत्त्यर्थः। नन्वन्य एव जीवः ईश्वरादस्तु, तिरस्कृतज्ञानैश्वर्यत्वात्; किं देहयोगकल्पनया? नेत्युच्यते —न हि अन्यत्वं जीवस्य ईश्वरादुपपद्यते— 'सेयं देवतैक्षत' इत्युपक्रम्य 'अनेन जीवेनात्मनानुप्रविश्य' इत्यात्मशब्देन जीवस्य परामर्शात्; 'तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो' इति च जीवाय उपदिशति ईश्वरात्मत्वम्; अतः अनन्य एव ईश्वराज्जीवः सन् देहयोगात्तिरोहितज्ञानैश्वर्यो भवति। अतश्च न सांकल्पिकी जीवस्य स्वप्ने रथादिसृष्टिर्घटते; यदि च सांकल्पिकी स्वप्ने रथादिसृष्टिः स्यात्, नैवानिष्टं कश्चित्स्वप्नं पश्येत्, न हि कश्चिदनिष्टं संकल्पयते। यत्पुनरुक्तम्—जागरितदेशश्रुतिः स्वप्नस्य सत्यत्वं ख्यापयतीति, न तत्साम्यवचनं सत्यत्वाभिप्रायम्, स्वयंज्योतिष्ट्वविरोधात्, श्रुत्यैव च स्वप्ने रथाद्यभावस्य दर्शितत्वात्; जागरितप्रभववासनानिर्मितत्वात्तु स्वप्नस्य तत्तुल्यनिर्भासत्वाभिप्रायं तत्। तस्मादुपपन्नं स्वप्नस्य मायामात्रत्वम्॥

## तदभावो नाडीषु तच्छ्रुतेरात्मनि च ॥ ७ ॥

स्वप्नावस्था परीक्षिता; सुषुप्तावस्थेदानीं परीक्ष्यते। तत्रै-
ताः सुषुप्तविषयाः श्रुतयो भवन्ति; क्वचिच्छ्रूयते—'तद्यत्रै-

२. तदभावा- तत्सुप्तः समस्तः संप्रसन्नः स्वप्नं न वि-
धिकरणम्। जानात्यासु तदा नाडीषु सृप्तो भवति'
इति; अन्यत्र तु नाडीरेवानुक्रम्य श्रूयते—'ताभिः प्रत्यव-
सृप्य पुरीतति शेते' इति; तथान्यत्र नाडीरेवानुक्रम्य—
'तासु तदा भवति यदा सुप्तः स्वप्नं न कंचन पश्यत्यथा-
स्मिन्प्राण एवैकधा भवति' इति; तथान्यत्र— 'य एषो-
ऽन्तर्हृदय आकाशस्तस्मिञ्शेते' इति; तथान्यत्र— 'सता
सोम्य तदा संपन्नो भवति स्वमपीतो भवति' इति; तथा—
'प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरम्'
इति च ॥

तत्र संशयः— किमेतानि नाड्यादीनि परस्परनिरपेक्ष-
तया भिन्नानि सुषुप्तिस्थानानि, आहोस्वित्परस्परापेक्षतया
एकं सुषुप्तिस्थानमिति। किं तावत्प्राप्तम्? भिन्नानीति; कुतः?
एकार्थत्वात्— न हि एकार्थानां क्वचित्परस्परापेक्षत्वं दृश्यते
व्रीहियवादीनाम्; नाड्यादीनां च एकार्थता सुषुप्तौ दृश्यते,
'नाडीषु सृप्तो भवति' 'पुरीतति शेते' इति च तत्र तत्र

सप्तमीनिर्देशस्य तुल्यत्वात् । ननु नैवं सति सप्तमीनिर्देशो दृश्यते— 'सता सोम्य तदा संपन्नो भवति' इति; नैष दोषः, तत्रापि सप्तम्यर्थस्य गम्यमानत्वात्— वाक्यशेषो हि तत्र आयतनैषी जीवः सत् उपसर्पतीत्याह— 'अन्यत्रायतनमलब्ध्वा प्राणमेवोपश्रयते' इति; प्राणशब्देन तत्र प्रकृतस्य सत उपादानात्; आयतनं च सप्तम्यर्थः, सप्तमीनिर्देशोऽपि तत्र वाक्यशेषे दृश्यते— 'सति संपद्य न विदुः सति संपद्यामहे' इति । सर्वत्र च विशेषविज्ञानोपरमलक्षणं सुषुप्तं न विशिष्यते । तस्मादेकार्थत्वात् नाड्यादीनां विकल्पेन कदाचित् किंचित्स्थानं स्वापायोपसर्पति— इति ॥

एवं प्राप्ते, प्रतिपाद्यते— तदभावो नाडीष्वात्मनि चेति । तदभाव इति, तस्य प्रकृतस्य स्वप्नदर्शनस्य अभावः सुषुप्तमित्यर्थः; नाडीष्वात्मनि चेति समुच्चयेन एतानि नाड्यादीनि स्वापायोपसर्पति, न विकल्पेन— इत्यर्थः; कुतः? तच्छ्रुतेः; तथा हि सर्वेषामेव नाड्यादीनां तत्र तत्र सुषुप्तिस्थानत्वं श्रूयते; तच्च समुच्चये संगृहीतं भवति; विकल्पे ह्येषाम्, पक्षे बाधः स्यात् । ननु एकार्थत्वाद्विकल्पो नाड्यादीनां व्रीहियवादिवत्— इत्युक्तम्; नेत्युच्यते— न हि एकविभक्तिनिर्देशमा-

त्रेण एकार्थत्वं विकल्पश्च आपतति, नानार्थत्वसमुच्चययोरप्येकविभक्तिनिर्देशदर्शनात्— प्रासादे शेते पर्यङ्के शेते इत्येवमादिषु, तथा इहापि नाडीषु पुरीतति ब्रह्मणि च स्वपितीति उपपद्यते समुच्चयः; तथा च श्रुतिः— 'तासु तदा भवति यदा सुप्तः स्वप्नं न कंचन पश्यत्यथास्मिन्प्राण एवैकधा भवति' इति समुच्चयं नाडीनां प्राणस्य च सुषुप्तौ श्रावयति, एकवाक्योपादानात्; प्राणस्य च ब्रह्मत्वं समधिगतम्— 'प्राणस्तथानुगमात्' इत्यत्र। यत्रापि निरपेक्षा इव नाडीः सुषुप्तिस्थानत्वेन श्रावयति— 'आसु तदा नाडीषु सुप्तो भवति' इति, तत्रापि प्रदेशान्तरप्रसिद्धस्य ब्रह्मणोऽप्रतिषेधात् नाडीद्वारेण ब्रह्मण्येवावतिष्ठत इति प्रतीयते; न चैवमपि नाडीषु सप्तमी विरुध्यते, नाडीभिरपि ब्रह्मोपसर्पन् सुप्त एव नाडीषु भवति— यो हि गङ्गया सागरं गच्छति, गत एव स गङ्गायां भवति। भवति च अत्र रश्मिनाडीद्वारात्मकस्य ब्रह्मलोकमार्गस्य विवक्षितत्वात् नाडीस्तुत्यर्थं सुप्तिसंकीर्तनम्—'नाडीषु सुप्तो भवति' इत्युक्त्वा 'तं न कश्चन पाप्मा स्पृशति' इति ब्रुवन् नाडीः प्रशंसति; ब्रवीति च पाप्मस्पर्शाभावे हेतुम् 'तेजसा हि तदा संपन्नो भवति' इति— तेजसा नाडीगतेन पित्ताख्येन अभिव्याप्तक-

रणो न बाह्यान् विषयानीक्षत इत्यर्थः; अथवा तेजसेति ब्रह्मण एवायं निर्देशः, श्रुत्यन्तरे 'ब्रह्मैव तेज एव' इति तेजःशब्दस्य ब्रह्मणि प्रयुक्तत्वात्; ब्रह्मणा हि तदा संपन्नो भवति नाडीद्वारेण, अतस्तं न कश्चन पाप्मा स्पृशतीत्यर्थः—ब्रह्मसंपत्तिश्च पाप्मस्पर्शाभावे हेतुः समधिगतः 'सर्वे पाप्मानोऽतो निवर्तन्तेऽपहतपाप्मा ह्येष ब्रह्मलोकः' इत्यादिश्रुतिभ्यः; एवं च सति प्रदेशान्तरप्रसिद्धेन ब्रह्मणा सुषुप्तिस्थानेनानुगतो नाडीनां समुच्चयः समधिगतो भवति। तथा पुरीततोऽपि ब्रह्मप्रक्रियायां संकीर्तनात् तदनुगुणमेव सुषुप्तिस्थानत्वं ज्ञायते— 'य एषोऽन्तर्हृदय आकाशस्तस्मिञ्शेते' इति हृदयाकाशे सुषुप्तिस्थाने प्रकृते इदमुच्यते— 'पुरीतति शेते' इति; पुरीतदिति हृदयपरिवेष्टनमुच्यते; तदन्तर्वर्तिन्यपि हृदयाकाशे शयानः शक्यते 'पुरीतति शेते' इति वक्तुम्— प्राकारपरिक्षिप्तेऽपि हि पुरे वर्तमानः प्राकारे वर्तत इत्युच्यते; हृदयाकाशस्य च ब्रह्मत्वं समधिगतम् 'दहर उत्तरेभ्यः' इत्यत्र। तथा नाडीपुरीतत्समुच्चयोऽपि 'ताभिः प्रत्यवसृप्य पुरीतति शेते' इत्येकवाक्योपादानात् अवगम्यते। सत्प्राज्ञयोश्च प्रसिद्धमेव ब्रह्मत्वम्। एवमेतासु श्रुतिषु त्रीण्येव सुषुप्तिस्थानानि संकीर्तितानि—नाड्यः पुरीतत् ब्रह्म चेति;

तत्रापि द्वारमात्रं नाड्यः पुरीतच्च, ब्रह्मैव तु एकम् अनपायि सुषुप्तिस्थानम् । अपि च नाड्यः पुरीतद्वा जीवस्योपाध्याधार एव भवति—तत्रास्य करणानि वर्तन्त इति; न हि उपाधिसंबन्धमन्तरेण स्वत एव जीवस्याधारः कश्चित्संभवति, ब्रह्माव्यतिरेकेण स्वमहिमप्रतिष्ठितत्वात् । ब्रह्माधारत्वमप्यस्य सुषुप्ते नैव आधाराधेयभेदाभिप्रायेण उच्यते, कथं तर्हि? तादात्म्याभिप्रायेण; यत आह— 'सता सोम्य तदा संपन्नो भवति स्वमपीतो भवति' इति—स्वशब्देन आत्मा अभिलप्यते, स्वरूपमापन्नः सुप्तो भवतीत्यर्थः । अपि च न कदाचिज्जीवस्य ब्रह्मणा संपत्तिर्नास्ति, स्वरूपस्यानपायित्वात्; स्वप्नजागरितयोस्तूपाधिसंपर्कवशात् पररूपापत्तिमिवापेक्ष्य तदुपशमात्सुषुप्तेः स्वरूपापत्तिर्विवक्ष्यते— 'स्वमपीतो भवति' इति; अतश्च सुप्तावस्थायां कदाचित्सता संपद्यते, कदाचिन्न संपद्यते— इत्ययुक्तम् । अपि च स्थानविकल्पाभ्युपगमेऽपि विशेषविज्ञानोपशमलक्षणं तावत्सुषुप्तं न क्वचिद्विशिष्यते; तत्र सति संपन्नस्तावत् एकत्वात् न विजानातीति युक्तम्, 'तत्केन कं विजानीयात्' इति श्रुतेः; नाडीषु पुरीतति च शयानस्य न किंचित् अविज्ञाने कारणं शक्यं विज्ञातुम्, भेदविषयत्वात्, 'यत्र वा

अन्यदिव स्यात्तत्रान्योऽन्यत्पश्येत्' इति श्रुतेः । ननु भेदविषयस्याप्यतिदूरादिकारणमविज्ञाने स्यात्; बाढमेवं स्यात्, यदि जीवः स्वतः परिच्छिन्नोऽभ्युपगम्येत—यथा विष्णुमित्रः प्रवासी स्वगृहान न पश्यतीति; न तु जीवस्योपाधिव्यतिरेकेण परिच्छेदो विद्यते; उपाधिगतमेवातिदूरादिकारणम् अविज्ञाने इति यद्युच्येत, तथाप्युपाधेरुपशान्तत्वात् सत्येव संपन्नः न विजानातीति युक्तम् । न च वयमिह तुल्यवत् नाड्यादिसमुच्चयं प्रतिपादयामः; न हि नाड्यः सुप्तिस्थानं पुरीतच्च इत्यनेन विज्ञानेन किंचित्प्रयोजनमस्ति; न ह्येतद्विज्ञानप्रतिबद्धं किंचित्फलं श्रूयते; नाप्येतद्विज्ञानं फलवतः कस्यचिदङ्गमुपदिश्यते । ब्रह्म तु अनपायि सुप्तिस्थानम्—इत्येतत्प्रतिपादयामः; तेन तु विज्ञानेन प्रयोजनमस्ति जीवस्य ब्रह्मात्मत्वावधारणं स्वप्नजागरितव्यवहारविमुक्तत्वावधारणं च । तस्मादात्मैव सुप्तिस्थानम् ॥

## अतः प्रबोधोऽस्मात् ॥ ८ ॥

यस्माच्च आत्मैव सुप्तिस्थानम्, अत एव च कारणात् नित्यवदेव अस्मादात्मनः प्रबोधः स्वापाधिकारे शिष्यते, 'कुत एतदागात्' इत्यस्य प्रश्नस्य प्रतिवचनावसरे—'यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनः सर्वे प्राणाः'

इत्यादिना, 'सत आगम्य न विदुः सत आगच्छामहे...' इति च । विकल्प्यमानेषु तु सुषुप्तिस्थानेषु, कदाचिन्नाडीभ्यः प्रतिबुध्यते कदाचित्पुरीततः कदाचिदात्मनः— इत्यशासिष्यत् । तस्मादप्यात्मैव सुप्तिस्थानमिति ॥

## स एव तु कर्मानुस्मृतिशब्दविधिभ्यः ॥ ९ ॥

तस्याः पुनः सत्संपत्तेः प्रतिबुध्यमानः किं य एव सत्संपन्नः स एव प्रतिबुध्यते, उत स वा अन्यो वा इति चिन्त्यते । तत्र प्राप्तं तावत्—अनियम इति; कुतः? यदा हि जलराशौ कश्चिज्जलबिन्दुः प्रक्षिप्यते, जलराशिरेव स तदा भवति, पुनरुद्धरणे च स एव जलबिन्दुर्भवति— इति दुःसंपादम् — तद्वत् सुप्तः परेणैकत्वमापन्नः संप्रसीदतीति न स एव पुनरुत्थातुमर्हति; तस्मात् स एव ईश्वरो वा अन्यो वा जीवः प्रतिबुध्यते इति ॥

२. कर्मानुस्मृतिशब्दविध्यधिकरणम् ।

एवं प्राप्ते, इदमाह— स एव तु जीवः सुप्तः स्वास्थ्यं गतः पुनरुत्तिष्ठति, नान्यः; कस्मात्? कर्मानुस्मृतिशब्दविधिभ्यः; विभज्य हेतुं दर्शयिष्यामि—कर्मशेषानुष्ठानदर्शनात्तावत्स एवोत्थातुमर्हति नान्यः; तथा हि— पूर्वेद्युरनुष्ठितस्य

कर्मणः अपरेद्युः शेषमनुतिष्ठन्दृश्यते; न चान्येन सामिकृतस्य कर्मणः अन्यः शेषक्रियायां प्रवर्तितुमुत्सहते, अतिप्रसङ्गात्; तस्मादेक एव पूर्वेद्युरपरेद्युश्च एकस्य कर्मणः कर्तेति गम्यते। इतश्च स एवोत्तिष्ठति, यत्कारणम् अतीतेऽहनि अहमदोऽद्राक्षमिति पूर्वानुभूतस्य पश्चात्स्मरणम् अन्यस्योत्थाने नोपपद्यते; न ह्यन्यदृष्टम् अन्योऽनुस्मर्तुमर्हति; सोऽहमस्मीति च आत्मानुस्मरणमात्मान्तरोत्थाने नावकल्पते। शब्देभ्यश्च तस्यैवोत्थानमवगम्यते; तथा हि— 'पुनः प्रतिन्यायं प्रतियोन्याद्रवति बुद्धान्तायैव' 'इमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्ति' 'त इह व्याघ्रो वा सिंहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दंशो वा मशको वा यद्यद्भवन्ति तदाभवन्ति' इत्येवमादयः शब्दाः स्वापप्रबोधाधिकारपठिता न आत्मान्तरोत्थाने सामञ्जस्यम् ईयुः। कर्मविद्याविधिभ्यश्चैवमेवावगम्यते; अन्यथा हि कर्मविद्याविधयोऽनर्थकाः स्युः; अन्योत्थानपक्षे हि सुप्तमात्रो मुच्यत इत्यापद्येत; एवं चेत्स्यात्, वद किं कालान्तरफलेन कर्मणा विद्यया वा कृतं स्यात्। अपि च अन्योत्थानपक्षे यदि तावच्छरीरान्तरे व्यवहरमाणो जीव उत्तिष्ठेत्, तत्रत्यव्यवहारलोपप्रसङ्गः स्यात्; अथ तत्र सुप्त

उत्तिष्ठेत् , कल्पनानर्थक्यं स्यात्— यो हि यस्मिन् शरीरे सुप्तः सः तस्मिन् नोत्तिष्ठति, अन्यस्मिन् शरीरे सुप्तः अन्यस्मिन्नुत्तिष्ठतीति कोऽस्यां कल्पनायां लाभः स्यात् ? अथ मुक्त उत्तिष्ठेत् , अन्तवान्मोक्ष आपद्येत ; निवृत्ताविद्यस्य च पुनरुत्थानमनुपपन्नम् ; एतेन ईश्वरस्योत्थानं प्रत्युक्तम् , नित्यनिवृत्ताविद्यत्वात् । अकृताभ्यागमकृतविप्रणाशौ च दुर्निवारावन्योत्थानपक्षे स्याताम् । तस्मात्स एवोत्तिष्ठति, नान्य इति । यत्पुनरुक्तम्— यथा जलराशौ प्रक्षिप्तो जलबिन्दुर्नोद्धर्तुं शक्यते, एवं सति संपन्नो जीवो नोत्पतितुमर्हतीति, तत्परिह्रियते— युक्तं तत्र विवेककारणाभावात् जलबिन्दोरनुद्धरणम् , इह तु विद्यते विवेककारणम्— कर्म च अविद्या च, इति वैषम्यम् ; दृश्यते च दुर्विवेचयोरप्यस्मज्जातीयैः क्षीरोदकयोः संसृष्टयोः हंसेन विवेचनम् । अपि च न जीवो नाम कश्चित्परस्मादन्यो विद्यते, यो जलबिन्दुरिव जलराशेः सतो विविच्येत ; सदेव तु उपाधिसंपर्काज्जीव इत्युपचर्यते इत्यसकृत्प्रपञ्चितम् ; एवं सति यावदेकोपाधिगता बन्धानुवृत्तिः, तावदेकजीवव्यवहारः ; उपाध्यन्तरगतायां तु बन्धानुवृत्तौ जीवान्तरव्यवहारः ; स एवायमुपाधिः स्वापप्रबोधयोः बीजाङ्कुरन्यायेन— इत्यतः स

एव जीवः प्रतिबुध्यत इति युक्तम् ॥

## मुग्धेऽर्धसंपत्तिः परिशेषात् ॥ १० ॥

अस्ति मुग्धो नाम, यं मूर्छित इति लौकिकाः कथयन्ति ; स तु किमवस्थ इति परीक्षायाम् , उच्यते— तिस्रस्तावद-
४. मुग्धाधिकरणम् ।
वस्थाः शरीरस्थस्य जीवस्य प्रसिद्धाः— जागरितं स्वप्नः सुषुप्तमिति ; चतुर्थी शरीराद्पसृप्तिः ; न तु पञ्चमी काचिदवस्था जीवस्य श्रुतौ स्मृतौ वा प्रसिद्धा अस्ति ; तस्माच्चतसृणामेवावस्थानामन्यतमावस्था मूर्छा— इति ॥

एवं प्राप्ते, ब्रूमः—न तावन्मुग्धो जागरितावस्थो भवितुमर्हति ; न ह्ययमिन्द्रियैर्विषयानीक्षते । स्यादेतत्—इषुकारन्यायेन मुग्धो भविष्यति—यथा इषुकारो जाग्रदपि इष्वासक्तमनस्तया नान्यान्विषयानीक्षते, एवं मुग्धो मुसलसंपातादिजनितदुःखानुभवव्यग्रमनस्तया जाग्रदपि नान्यान्विषयानीक्षत इति ; न, अचेतयमानत्वात् ; इषुकारो हि व्यापृतमना ब्रवीति— इषुमेवाहमेतावन्तं कालमुपलभमानोऽभूवमिति, मुग्धस्तु लब्धसंज्ञो ब्रवीति— अन्धे तमस्यहमेतावन्तं कालं प्रक्षिप्तोऽभूवम् , न किंचिन्मया चेतितमिति । जाग्रतश्चैकविषयविषक्तचेतसोऽपि देहो विध्रियते ; मुग्धस्य तु देहो धरण्यां पतति ।

तस्मान्न जागर्ति। नापि स्वप्नान्पश्यति, निःसंज्ञकत्वात्। नापि मृतः, प्राणोष्मणोर्भावात्—मुग्धे हि जन्तौ मृतोऽयं स्यान्न वा मृत इति संशयानाः, ऊष्मास्ति नास्तीति, हृदयदेशमालभन्ते, निश्चयार्थम्, प्राणोऽस्ति नास्तीति च, नासिकादेशम्; यदि प्राणोष्मणोरस्तित्वं नावगच्छन्ति, ततो मृतोऽयमित्यध्यवसाय दहनायारण्यं नयन्ति; अथ तु प्राणमूष्माणं वा प्रतिपद्यन्ते, ततो नायं मृत इत्यध्यवसाय संज्ञालाभाय भिषज्यन्ति; पुनरुत्थानाच्च न दिष्टं गतः; न हि यमं गतः यमराष्ट्रात्प्रत्यागच्छति। अस्तु तर्हि सुषुप्तः, निःसंज्ञत्वात्, अमृतत्वाच्च; न, वैलक्षण्यात्—मुग्धः कदाचिच्चिरमपि नोच्छ्वसिति, सवेपथुरस्य देहो भवति, भयानकं च वदनम्, विस्फारिते नेत्रे; सुषुप्तस्तु प्रसन्नवदनस्तुल्यकालं पुनः पुनरुच्छ्वसिति, निमीलिते अस्य नेत्रे भवतः, न चास्य देहो वेपते; पाणिपेषणमात्रेण च सुषुप्तमुत्थापयन्ति, न तु मुग्धं मुद्गरघातेनापि। निमित्तभेदश्च भवति मोहस्वापयोः—मुसलसंपातादिनिमित्तत्वान्मोहस्य, श्रमनिमित्तत्वाच्च स्वापस्य। न च लोकेऽस्ति प्रसिद्धिः—मुग्धः सुप्त इति। परिशेषादर्धसंपत्तिर्मुग्धतेत्यवगच्छामः—निःसंज्ञत्वात् संपन्नः, इतरस्माच्च वैलक्षण्यादसंपन्नः इति॥

कथं पुनरर्धसंपत्तिर्मुग्धतेति शक्यते वक्तुम्?—यावता सुप्तं प्रति तावदुक्तं श्रुत्या—'सता सोम्य तदा संपन्नो भवति' इति, 'अत्र स्तेनोऽस्तेनो भवति' 'नैतं सेतुमहोरात्रे तरतो न जरा न मृत्युर्न शोको न सुकृतं न दुष्कृतम्' इत्यादि; जीवे हि सुकृतदुष्कृतयोः प्राप्तिः सुखित्वदुःखित्वप्रत्ययोत्पादनेन भवति; न च सुखित्वप्रत्ययो दुःखित्वप्रत्ययो वा सुषुप्ते विद्यते; मुग्धेऽपि तौ प्रत्ययौ नैव विद्येते; तस्मात् उपाध्युपशमात् सुषुप्तवन्मुग्धेऽपि कृत्स्नसंपत्तिरेव भवितुमर्हति, नार्धसंपत्तिरिति। अत्रोच्यते—न ब्रूमः—मुग्धेऽर्धसंपत्तिर्जीवस्य ब्रह्मणा भवतीति; किं तर्हि, अर्धेन सुषुप्तपक्षस्य भवति मुग्धत्वम्, अर्धेनावस्थान्तरपक्षस्य—इति ब्रूमः; दर्शिते च मोहस्य स्वापेन साम्यवैषम्ये। द्वारं चैतत् मरणस्य; यदास्य सावशेषं कर्म भवति, तदा वाङ्मनसे प्रत्यागच्छतः; यदा तु निरवशेषं कर्म भवति, तदा प्राणोष्माणावपगच्छतः। तस्मादर्धसंपत्तिं ब्रह्मविद इच्छन्ति। यत्तूक्तम्—न पञ्चमी काचिदवस्था प्रसिद्धास्तीति, नैष दोषः; कादाचित्कीयमवस्थेति न प्रसिद्धा स्यात्। प्रसिद्धा चैषा लोकायुर्वेदयोः। अर्धसंपत्त्यभ्युपगमाच्च न पञ्चमी गण्यत इत्यनवद्यम्॥

## न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि ॥ ११ ॥

५. उभयलिङ्गाधिकरणम्।

येन ब्रह्मणा सुषुप्त्यादिषु जीव उपाध्युपशमात्संपद्यते, तस्येदानीं स्वरूपं श्रुतिवशेन निर्धार्यते। सन्त्युभयलिङ्गाः श्रुतयो ब्रह्मविषयाः— 'सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः' इत्येवमाद्याः सविशेषलिङ्गाः; 'अस्थूलमनण्वह्रस्वमदीर्घम्' इत्येवमाद्याश्च निर्विशेषलिङ्गाः। किमासु श्रुतिषु उभयलिङ्गं ब्रह्म प्रतिपत्तव्यम्, उतान्यतरलिङ्गम्; यदाप्यन्यतरलिङ्गम्, तदापि सविशेषम्, उत निर्विशेषम्— इति मीमांस्यते। तत्र उभयलिङ्गश्रुत्यनुग्रहात् उभयलिङ्गमेव ब्रह्म इत्येवं प्राप्ते, ब्रूमः— न तावत्स्वत एव परस्य ब्रह्मण उभयलिङ्गत्वमुपपद्यते; न हि एकं वस्तु स्वत एव रूपादिविशेषोपेतं तद्विपरीतं च इत्यवधारयितुं शक्यम्, विरोधात्। अस्तु तर्हि स्थानतः, पृथिव्याद्युपाधियोगादिति; तदपि नोपपद्यते— न हि उपाधियोगादप्यन्यादृशस्य वस्तुनोऽन्यादृशः स्वभावः संभवति; न हि स्वच्छः सन् स्फटिकः अलक्तकाद्युपाधियोगादस्वच्छो भवति, भ्रममात्रत्वादस्वच्छताभिनिवेशस्य; उपाधीनां च अविद्याप्रत्युपस्थापितत्वात्। अतश्च अन्यतर-

लिङ्गपरिग्रहेऽपि समस्तविशेषरहितं निर्विकल्पकमेव ब्रह्म प्रतिपत्तव्यम्, न तद्विपरीतम्; सर्वत्र हि ब्रह्मस्वरूपप्रतिपादनपरेषु वाक्येषु 'अशब्दमस्पर्शमरूपमव्ययम्' इत्येवमादिषु अपास्तसमस्तविशेषमेव ब्रह्म उपदिश्यते ॥

## न भेदादिति चेन्न प्रत्येकमतद्वचनात् ॥ १२ ॥

अथापि स्यात्—यदुक्तम्, निर्विकल्पमेकलिङ्गमेव ब्रह्म नास्य स्वतः स्थानतो वा उभयलिङ्गत्वमस्तीति, तन्नोपपद्यते; कस्मात्? भेदात्; भिन्ना हि प्रतिविद्यं ब्रह्मण आकारा उपदिश्यन्ते, चतुष्पात् ब्रह्म, षोडशकलं ब्रह्म, वामनीत्वादिलक्षणं ब्रह्म, त्रैलोक्यशरीरवैश्वानरशब्दोदितं ब्रह्म, इत्येवंजातीयकाः; तस्मात् सविशेषत्वमपि ब्रह्मणोऽभ्युपगन्तव्यम्। ननु उक्तं नोभयलिङ्गत्वं ब्रह्मणः संभवतीति; अयमप्यविरोधः, उपाधिकृतत्वादाकारभेदस्य; अन्यथा हि निर्विषयमेव भेदशास्त्रं प्रसज्येत—इति चेत्, नेति ब्रूमः; कस्मात्? प्रत्येकमतद्वचनात्; प्रत्युपाधिभेदं हि अभेदमेव ब्रह्मणः श्रावयति शास्त्रम्—'यश्चायमस्यां पृथिव्यां तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं शारीरस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स

योऽयमात्मा' इत्यादि। अतश्च न भिन्नाकारयोगो ब्रह्मणः शास्त्रीय इति शक्यते वक्तुम्, भेदस्य उपासनार्थत्वात्, अभेदे तात्पर्यात् ॥

## अपि चैवमेके ॥ १३ ॥

अपि चैवं भेददर्शननिन्दापूर्वकम् अभेददर्शनमेव एके शाखिनः समामनन्ति— 'मनसैवेदमाप्तव्यं नेह नानास्ति किंचन। मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' इति; तथान्येऽपि—'भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्म मे तत्' इति समस्तस्य भोग्यभोक्तृनियन्तृलक्षणस्य प्रपञ्चस्य ब्रह्मैकस्वभावतामधीयते ॥

कथं पुनः आकारवदुपदेशिनीषु अनाकारोपदेशिनीषु च ब्रह्मविषयासु श्रुतिषु सतीषु, अनाकारमेव ब्रह्म अवधार्यते, न पुनर्विपरीतम्? इत्यत उत्तरं पठति—

## अरूपवदेव हि तत्प्रधानत्वात् ॥ १४ ॥

रूपाद्याकाररहितमेव हि ब्रह्म अवधारयितव्यम्, न रूपादिमत्; कस्मात्? तत्प्रधानत्वात्; 'अस्थूलमनण्वह्रस्वमदीर्घम्' 'अशब्दमस्पर्शमरूपमव्ययम्' 'आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म' 'दिव्यो ह्यमूर्तः

पुरुषः सबाह्याभ्यन्तरो ह्यजः’ ‘तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूः’ इत्येवमादीनि वाक्यानि निष्प्रपञ्चब्रह्मात्मतत्त्वप्रधानानि, न अर्थान्तरप्रधानानि—इत्येतत्प्रतिष्ठापितम् ‘तत्तु समन्वयात्’ इत्यत्र; तस्मादेवंजातीयकेषु वाक्येषु यथाश्रुतं निराकारमेव ब्रह्म अवधारयितव्यम्। इतराणि तु आकारवद्ब्रह्मविषयाणि वाक्यानि न तत्प्रधानानि; उपासनाविधिप्रधानानि हि तानि; तेष्वसति विरोधे यथाश्रुतमाश्रयितव्यम्; सति तु विरोधे तत्प्रधानानि अतत्प्रधानेभ्यो बलीयांसि भवन्ति— इत्येष विनिगमनायां हेतुः, येन उभयीष्वपि श्रुतिषु सतीषु अनाकारमेव ब्रह्म अवधार्यते, न पुनर्विपरीतमिति ॥

का तर्ह्याकारवद्विषयाणां श्रुतीनां गतिः? इत्यत आह—

**प्रकाशवच्चावैयर्थ्यात् ॥ १५ ॥**

यथा प्रकाशः सौरश्चान्द्रमसो वा वियद्व्याप्य अवतिष्ठमानः अङ्गुल्याद्युपाधिसंबन्धात् तेषु ऋजुवक्रादिभावं प्रतिपद्यमानेषु तद्भावमिव प्रतिपद्यते, एवं ब्रह्मापि पृथिव्याद्युपाधिसंबन्धात् तदाकारतामिव प्रतिपद्यते; तदालम्बनो ब्रह्मण आकारविशेषोपदेश उपासनार्थो न विरुध्यते; एवम् अवै-

यर्थ्यम् आकारवद्ब्रह्मविषयाणामपि वाक्यानां भविष्यति; न हि वेदवाक्यानां कस्यचिदर्थवत्त्वम् कस्यचिदनर्थवत्त्वमिति युक्तं प्रतिपत्तुम्, प्रमाणत्वाविशेषात् । नन्वेवमपि यत्पुरस्तात्प्रतिज्ञातम्— नोपाधियोगादप्युभयलिङ्गत्वं ब्रह्मणोऽस्तीति, तद्विरुध्यते; नेति ब्रूमः—उपाधिनिमित्तस्य वस्तुधर्मत्वानुपपत्तेः; उपाधीनां च अविद्याप्रत्युपस्थापितत्वात् । सत्यामेव च नैसर्गिक्यामविद्यायां लोकवेदव्यवहारावतार इति तत्र तत्र अवोचाम ॥

## आह च तन्मात्रम् ॥ १६ ॥

आह च श्रुतिः चैतन्यमात्रं विलक्षणरूपान्तररहितं निर्विशेषं ब्रह्म—'स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एवैवं वा अरेऽयमात्मानन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव' इति । एतदुक्तं भवति—नास्य आत्मनोऽन्तर्बहिर्वा चैतन्यादन्यद्रूपमस्ति, चैतन्यमेव तु निरन्तरमस्य स्वरूपम्—यथा सैन्धवघनस्यान्तर्बहिश्च लवणरस एव निरन्तरो भवति, न रसान्तरम्, तथैवेति ॥

## दर्शयति चाथो अपि स्मर्यते ॥ १७ ॥

दर्शयति च श्रुतिः पररूपप्रतिषेधेनैव ब्रह्म—निर्विशेष-

त्वात्— 'अथात आदेशो नेति नेति' 'अन्यदेव तद्विदितादथो अविदितादधि' 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह' इत्येवमाद्या। बाष्कलिना च बाध्वः पृष्टः सन् अवचनेनैव ब्रह्म प्रोवाचेति श्रूयते— 'स होवाचाधीहि भो इति स तूष्णीं बभूव तं ह द्वितीये तृतीये वा वचन उवाच ब्रूमः खलु त्वं तु न विजानासि। उपशान्तोऽयमात्मा' इति। तथा स्मृतिष्वपि परप्रतिषेधेनैवोपदिश्यते—'ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते। अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते' इत्येवमाद्यासु। तथा विश्वरूपधरो नारायणो नारदमुवाचेति स्मर्यते— 'माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद। सर्वभूतगुणैर्युक्तं नैवं मां ज्ञातुमर्हसि' इति॥

## अत एव चोपमा सूर्यकादिवत्॥ १८॥

यत एव च अयमात्मा चैतन्यरूपो निर्विशेषो वाङ्मनसातीतः परप्रतिषेधोपदेश्यः, अत एव च अस्योपाधिनिमित्तामपारमार्थिकीं विशेषवत्तामभिप्रेत्य जलसूर्यकादिवदित्युपमा उपादीयते मोक्षशास्त्रेषु— 'यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन्। उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा' इति। 'एक एव

हि भूतात्मा भूते भूते व्यवस्थितः । एकधा बहुधा चैव दृश्यते जलचन्द्रवत्' इति चैवमादिषु ॥

अत्र प्रत्यवस्थीयते—

## अम्बुवदग्रहणात्तु न तथात्वम् ॥ १९ ॥

न जलसूर्यकादितुल्यत्वमिहोपपद्यते, तद्वदग्रहणात्; सूर्यादिभ्यो हि मूर्तेभ्यः पृथग्भूतं विप्रकृष्टदेशं मूर्तं जलं गृह्यते; तत्र युक्तः सूर्यादिप्रतिबिम्बोदयः; न तु आत्मा मूर्तः, न चास्मात्पृथग्भूता विप्रकृष्टदेशाश्चोपाधयः, सर्वगतत्वात् सर्वानन्यत्वाच्च । तस्मादयुक्तोऽयं दृष्टान्त इति ॥

अत्र प्रतिविधीयते—

## वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम् ॥ २० ॥

युक्त एव तु अयं दृष्टान्तः, विवक्षितांशसंभवात्; न हि दृष्टान्तदार्ष्टान्तिकयोः क्वचित् कंचित् विवक्षितमंशं मुक्त्वा सर्वसारूप्यं केनचित् दर्शयितुं शक्यते; सर्वसारूप्ये हि दृष्टान्तदार्ष्टान्तिकभावोच्छेद एव स्यात्; न चेदं स्वमनीषया जलसूर्यकादिदृष्टान्तप्रणयनम्; शास्त्रप्रणीतस्य तु अस्य

प्रयोजनमात्रमुपन्यस्यते । किं पुनरत्र विवक्षितं सारूप्यमिति, तदुच्यते— वृद्धिह्रासभाक्त्वमिति । जलगतं हि सूर्यप्रतिबिम्बं जलवृद्धौ वर्धते, जलह्रासे ह्रसति, जलचलने चलति, जलभेदे भिद्यते— इत्येवं जलधर्मानुविधायि भवति, न तु परमार्थतः सूर्यस्य तथात्वमस्ति ; एवं परमार्थतोऽविकृतमेकरूपमपि सन् ब्रह्म देहाद्युपाध्यन्तर्भावात् भजत इवोपाधिधर्मान्वृद्धिह्रासादीन् । एवमुभयोर्दृष्टान्तदार्ष्टान्तिकयोः सामञ्जस्यादविरोधः ॥

## दर्शनाच्च ॥ २१ ॥

दर्शयति च श्रुतिः परस्यैव ब्रह्मणो देहादिषूपाधिष्वन्तरनुप्रवेशम्— 'पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः । पुरः स पक्षी भूत्वा पुरः पुरुष आविशत्' इति ; 'अनेन जीवेनात्मनानुप्रविश्य' इति च । तस्माद्युक्तमेतत् 'अत एव चोपमा सूर्यकादिवत्' इति । तस्मात् निर्विकल्पकैकलिङ्गमेव ब्रह्म, न उभयलिङ्गं विपरीतलिङ्गं वा इति सिद्धम् ॥

अत्र केचित् द्वे अधिकरणे कल्पयन्ति— प्रथमं तावत् किं प्रत्यस्तमिताशेषप्रपञ्चमेकाकारं ब्रह्म, उत प्रपञ्चवदनेकाकारोपेतमिति ; द्वितीयं तु प्रत्यस्तमितप्रपञ्चत्वे किं सल्ल-

क्षणं ब्रह्म, उत बोधलक्षणम् , उत उभयलक्षणमिति। अत्र वयं वदामः— सर्वथाप्यानर्थक्यमधिकरणान्तरारम्भस्येति ; यदि तावदनेकलिङ्गत्वं परस्य ब्रह्मणो निराकर्तव्यमित्ययं प्रयासः, तत् पूर्वेणैव 'न स्थानतोऽपि' इत्यनेनाधिकरणेन निराकृतमिति, उत्तरमधिकरणम् 'प्रकाशवच्च' इत्येतद्व्यर्थमेव भवेत् । न च सल्लक्षणमेव ब्रह्म न बोधलक्षणम्—इति शक्यं वक्तुम् , 'विज्ञानघन एव' इत्यादिश्रुतिवैयर्थ्यप्रसङ्गात्; कथं वा निरस्तचैतन्यं ब्रह्म चेतनस्य जीवस्यात्मत्वेनोपदिश्येत? नापि बोधलक्षणमेव ब्रह्म न सल्लक्षणम्— इति शक्यं वक्तुम् , 'अस्तीत्येवोपलब्धव्यः' इत्यादिश्रुतिवैयर्थ्यप्रसङ्गात्; कथं वा निरस्तसत्ताको बोधोऽभ्युपगम्येत। नाप्युभयलक्षणमेव ब्रह्म—इति शक्यं वक्तुम् , पूर्वाभ्युपगमविरोधप्रसङ्गात्; सत्ताव्यावृत्तेन च बोधेन बोधव्यावृत्तया च सत्तया उपेतं ब्रह्म प्रतिजानानस्य तदेव पूर्वाधिकरणप्रतिषिद्धं सप्रपञ्चत्वं प्रसज्येत। श्रुतत्वाददोष इति चेत् , न, एकस्य अनेकस्वभावत्वानुपपत्तेः। अथ सत्तैव बोधः, बोध एव च सत्ता, नानयोः परस्परव्यावृत्तिरस्तीति यद्युच्येत, तथापि किं सल्लक्षणं ब्रह्म, उत बोधलक्षणम् , उतोभयलक्षणम्—इत्ययं विकल्पो निरालम्बन एव स्यात्। सूत्राणि त्वे-

काधिकरणत्वेनैवास्माभिर्नीतानि । अपि च ब्रह्मविषयासु श्रुतिषु आकारवदनाकारप्रतिपादनेन विप्रतिपन्नासु, अनाकारे ब्रह्मणि परिगृहीते, अवश्यं वक्तव्या इतरासां श्रुतीनां गतिः; तादर्थ्येन 'प्रकाशवच्च' इत्यादीनि सूत्राण्यर्थवत्तराणि संपद्यन्ते ॥

यदप्याहुः—आकारवादिन्योऽपि श्रुतयः प्रपञ्चप्रविलयमुखेन अनाकारप्रतिपत्त्यर्था एव, न पृथगर्था इति, तदपि न समीचीनमिव लक्ष्यते; कथम्? ये हि परविद्याधिकारे केचित्प्रपञ्चा उच्यन्ते, यथा—'युक्ता ह्यस्य हरयः शता दशेति, अयं वै हरयोऽयं वै दश च सहस्राणि बहूनि चानन्तानि च' इत्येवमादयः—ते भवन्तु प्रविलयार्थाः; 'तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यम्' इत्युपसंहारात् । ये पुनरुपासनाविधानाधिकारे प्रपञ्चा उच्यन्ते, यथा—'मनोमयः प्राणशरीरो भारूपः' इत्येवमादयः—न तेषां प्रविलयार्थत्वं न्याय्यम्; 'स क्रतुं कुर्वीत' इत्येवंजातीयकेन प्रकृतेनैव उपासनविधिना तेषां संबन्धात् । श्रुत्या च एवंजातीयकानां गुणानामुपासनार्थत्वेऽवकल्पमाने न लक्षणया प्रविलयार्थत्वमवकल्पते । सर्वेषां च साधारणे प्रविलयार्थत्वे सति 'अरूपवदेव हि तत्प्रधानत्वात्' इति विनिगमनकारणवचनम् अनव-

काशं स्यात् । फलमप्येषां यथोपदेशं क्वचिद्दुरितक्षयः, क्वचिदैश्वर्यप्राप्तिः, क्वचित्क्रममुक्तिरित्यवगम्यत एव—इत्यतः पार्थगर्थ्यमेव उपासनावाक्यानां ब्रह्मवाक्यानां च न्याय्यम्, न एकवाक्यत्वम् ॥

कथं च एषामेकवाक्यतोत्प्रेक्ष्यत इति वक्तव्यम्——एकनियोगप्रतीतेः, प्रयाजदर्शपूर्णमासवाक्यवदिति चेत्, न, ब्रह्मवाक्येषु नियोगाभावात्—वस्तुमात्रपर्यवसायीनि हि ब्रह्मवाक्यानि, न नियोगोपदेशीनि इत्येतद्विस्तरेण प्रतिष्ठापितम् 'तत्तु समन्वयात्' इत्यत्र । किंविषयश्चात्र नियोगोऽभिप्रेयत इति वक्तव्यम्; पुरुषो हि नियुज्यमानः 'कुरु' इति स्वव्यापारे कस्मिंश्चिन्नियुज्यते । ननु द्वैतप्रपञ्चप्रविलयो नियोगविषयो भविष्यति——अप्रविलापिते हि द्वैतप्रपञ्चे ब्रह्मतत्त्वावबोधो न भवतीत्यतो ब्रह्मतत्त्वावबोधप्रत्यनीकभूतो द्वैतप्रपञ्चः प्रविलाप्यः—यथा स्वर्गकामस्य यागोऽनुष्ठातव्य उपदिश्यते, एवमपवर्गकामस्य प्रपञ्चप्रविलयः; यथा च तमसि व्यवस्थितं घटादितत्त्वमवबुभुत्समानेन तत्प्रत्यनीकभूतं तमः प्रविलाप्यते, एवं ब्रह्मतत्त्वमवबुभुत्समानेन तत्प्रत्यनीकभूतः प्रपञ्चः प्रविलापयितव्यः—ब्रह्मस्वभावो हि प्रपञ्चः, न प्रपञ्चस्वभावं ब्रह्म; तेन नामरूपप्रपञ्चप्रविलापनेन

ब्रह्मतत्त्वावबोधो भवति—इति । अत्र वयं पृच्छामः—कोऽयं प्रपञ्चप्रविलयो नाम ?—किमग्निप्रतापसंपर्कात् घृतकाठिन्यप्रविलय इव प्रपञ्चप्रविलयः कर्तव्यः, आहोस्विदेकस्मिंश्चन्द्रे तिमिरकृतानेकचन्द्रप्रपञ्चवत् अविद्याकृतो ब्रह्मणि नामरूपप्रपञ्चो विद्यया प्रविलापयितव्यः—इति । तत्र यदि तावद्विद्यमानोऽयं प्रपञ्चः देहादिलक्षण आध्यात्मिकः बाह्यश्च पृथिव्यादिलक्षणः प्रविलापयितव्य इत्युच्येत, स पुरुषमात्रेणाशक्यः प्रविलापयितुमिति तत्प्रविलयोपदेशोऽशक्यविषय एव स्यात्; एकेन च आदिमुक्तेन पृथिव्यादिप्रविलयः कृत इति इदानीं पृथिव्यादिशून्यं जगदभविष्यत् । अथ अविद्याध्यस्तो ब्रह्मण्येकस्मिन् अयं प्रपञ्चो विद्यया प्रविलाप्यत इति ब्रूयात्, ततो ब्रह्मैव अविद्याध्यस्तप्रपञ्चप्रत्याख्यानेन आवेदयितव्यम्—'एकमेवाद्वितीयं ब्रह्म' 'तत्सत्यं स आत्मा तत्त्वमसि' इति—तस्मिन्नावेदिते, विद्या स्वयमेवोत्पद्यते ; तया च अविद्या बाध्यते, ततश्च अविद्याध्यस्तः सकलोऽयं नामरूपप्रपञ्चः स्वप्नप्रपञ्चवत् प्रविलीयते— अनावेदिते तु ब्रह्मणि 'ब्रह्मविज्ञानं कुरु प्रपञ्चप्रविलयं च' इति शतकृत्वोऽप्युक्ते न ब्रह्मविज्ञानं प्रपञ्चप्रविलयो वा जायेत । नन्वावेदिते ब्रह्मणि तद्विज्ञानविषयः प्रपञ्चविलयविषयो वा नियोगः

स्यात्; न, निष्प्रपञ्चब्रह्मात्मत्वावेदनेनैव उभयसिद्धेः—रज्जुस्वरूपप्रकाशनेनैव हि तत्स्वरूपविज्ञानम् अविद्याध्यस्तसर्पादिप्रपञ्चप्रविलयश्च भवति; न च कृतमेव पुनः क्रियते ॥

नियोज्योऽपि च प्रपञ्चावस्थायां योऽवगम्यते जीवो नाम, स प्रपञ्चपक्षस्यैव वा स्यात्, ब्रह्मपक्षस्यैव वा— प्रथमे विकल्पे निष्प्रपञ्चब्रह्मतत्त्वप्रतिपादनेन पृथिव्यादिवत् जीवस्यापि प्रविलापितत्वात् कस्य प्रपञ्चविलये नियोग उच्येत? कस्य वा नियोगनिष्ठतया मोक्षोऽवाप्तव्य उच्येत? द्वितीयेऽपि ब्रह्मैव अनियोज्यस्वभावं जीवस्य स्वरूपम्, जीवत्वं तु, अविद्याकृतमेव— इति प्रतिपादिते ब्रह्मणि नियोज्याभावात् नियोगाभाव एव। द्रष्टव्यादिशब्दा अपि परविद्याधिकारपठिताः तत्त्वाभिमुखीकरणप्रधानाः, न तत्त्वावबोधविधिप्रधाना भवन्ति; लोकेऽपि— इदं पश्य, इदमाकर्णयेति च एवंजातीयकेषु निर्देशेषु प्रणिधानमात्रं कुर्वित्युच्यते, न साक्षाज्ज्ञानमेव कुर्विति; ज्ञेयाभिमुखस्यापि ज्ञानं कदाचिज्जायते, कदाचिन्न जायते; तस्मात् तं प्रति ज्ञानविषय एव दर्शयितव्यो ज्ञापयितुकामेन; तस्मिन्दर्शिते स्वयमेव यथाविषयं यथाप्रमाणं च ज्ञानमुत्पद्यते; न च प्रमाणान्तरेण अन्यथाप्रसिद्धेऽर्थे अन्यथाज्ञानं नियुक्तस्याप्युपपद्यते; यदि

पुनर्नियुक्तोऽहमिति अन्यथा ज्ञानं कुर्यात्, न तु तत् ज्ञानम्, किं तर्हि, मानसी सा क्रिया; स्वयमेव चेदन्यथोत्पद्येत, भ्रान्तिरेव स्यात्। ज्ञानं तु प्रमाणजन्यं यथाभूतविषयं च; न तत् नियोगशतेनापि कारयितुं शक्यते, न च प्रतिषेधशतेनापि वारयितुं शक्यते; न हि तत् पुरुषतन्त्रम्, वस्तुतन्त्रमेव हि तत्; अतोऽपि नियोगाभावः; किंचान्यत्— नियोगनिष्ठतयैव पर्यवस्यत्याम्नाये, यदभ्युपगतम् अनियोज्यब्रह्मात्मत्वं जीवस्य, तत् अप्रमाणकमेव स्यात्; अथ शास्त्रमेव अनियोज्यब्रह्मात्मत्वमाचक्षीत, तदवबोधे च पुरुषं नियुञ्जीत, ततो ब्रह्मशास्त्रस्यैकस्य द्व्यर्थपरता विरुद्धार्थपरता च प्रसज्येयाताम्। नियोगपरतायां च, श्रुतहानिः अश्रुतकल्पना कर्मफलवन्मोक्षस्यादृष्टफलत्वम् अनित्यत्वं च— इत्येवमाद्यो दोषा न केनचित्परिहर्तुं शक्याः। तस्मादवगतिनिष्ठान्येव ब्रह्मवाक्यानि, न नियोगनिष्ठानि। अतश्च एकनियोगप्रतीतेरेकवाक्यतेत्ययुक्तम्॥

अभ्युपगम्यमानेऽपि च ब्रह्मवाक्येषु नियोगसद्भावे, तदेकत्वं निष्प्रपञ्चोपदेशेषु सप्रपञ्चोपदेशेषु च असिद्धम्; न हि शब्दान्तरादिभिः प्रमाणैर्नियोगभेदेऽवगम्यमाने, सर्वत्र एको नियोग इति शक्यमाश्रयितुम्; प्रयाजदर्शपूर्णमासवाक्येषु

तु अधिकारांशेनाभेदात् युक्तमेकत्वम्; न त्विह सगुणनिर्गुणचोदनासु कश्चिदेकत्वकरोंशोऽस्ति; न हि भारूपत्वादयो गुणाः प्रपञ्चप्रविलयोपकारिणः, नापि प्रपञ्चविलयो भारूपत्वादिगुणोपकारी, परस्परविरोधित्वात्; न हि कृत्स्नप्रपञ्चप्रविलापनं प्रपञ्चैकदेशापेक्षणं च एकस्मिन्धर्मिणि युक्तं समावेशयितुम्। तस्मात् अस्मदुक्त एव विभागः आकारवदनाकारोपदेशानां युक्ततर इति ॥

## प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः ॥ २२ ॥

'द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं च' इत्युपक्रम्य, पञ्चमहाभूतानि द्वैराश्येन प्रविभज्य, अमूर्तरसस्य च पुरुषशब्दोदितस्य माहारजनादीनि रूपाणि दर्शयित्वा, पुनः पठ्यते— 'अथात आदेशो नेति नेति न ह्येतस्मादिति नेत्यन्यत्परमस्ति' इति।

६. प्रकृतैतावत्त्वाधिकरणम्।

तत्र कोऽस्य प्रतिषेधस्य विषय इति जिज्ञासामहे; न ह्यत्र इदं तदिति विशेषितं किंचित्प्रतिषेध्यमुपलभ्यते; इति-शब्देन तु अत्र प्रतिषेध्यं किमपि समर्प्यते, 'नेति नेति' इति इति-परत्वात् नञ्प्रयोगस्य; इति-शब्दश्चायं संनिहितालम्बनः एवंशब्दसमानवृत्तिः प्रयुज्यमानो

दृश्यते— 'इति ह स्मोपाध्यायः कथयति' इत्येवमादिषु ; संनिहितं चात्र प्रकरणसामर्थ्याद्रूपद्वयं सप्रपञ्चं ब्रह्मणः, तच्च ब्रह्म, यस्य ते द्वे रूपे । तत्र नः संशय उपजायते— किमयं प्रतिषेधो रूपे रूपवच्च उभयमपि प्रतिषेधति, आहोस्विदेकतरम् ; यदाप्येकतरम् , तदापि किं ब्रह्म प्रतिषेधति, रूपे परिशिनष्टि, आहोस्विद्रूपे प्रतिषेधति, ब्रह्म परिशिनष्टि— इति ॥

तत्र प्रकृतत्वाविशेषादुभयमपि प्रतिषेधतीत्याशङ्कामहे— द्वौ चैतौ प्रतिषेधौ, द्विः नेतिशब्दप्रयोगात् ; तयोरेकेन सप्रपञ्चं ब्रह्मणो रूपं प्रतिषिध्यते, अपरेण रूपवद्ब्रह्म— इति भवति मतिः । अथवा ब्रह्मैव रूपवत् प्रतिषिध्यते; तद्धि वाङ्मनसातीतत्वादसंभाव्यमानसद्भावं प्रतिषेधार्हम् ; न तु रूपप्रपञ्चः प्रत्यक्षादिगोचरत्वात् प्रतिषेधार्हः ; अभ्यासस्त्वादरार्थः इत्येवं प्राप्ते—

ब्रूमः—न तावदुभयप्रतिषेध उपपद्यते, शून्यवादप्रसङ्गात्— कंचिद्धि परमार्थमालम्ब्य अपरमार्थः प्रतिषिध्यते, यथा रज्ज्वादिषु सर्पादयः ; तच्च परिशिष्यमाणे कस्मिंश्चिद्भावे अवकल्पते ; कृत्स्नप्रतिषेधे तु कोऽन्यो भावः परिशिष्येत? अपरिशिष्यमाणे चान्यस्मिन् , य इतरः प्रतिषेद्धुमारभ्यते

प्रतिषेद्धुमशक्यत्वात् तस्यैव परमार्थत्वापत्तेः प्रतिषेधानुपपत्तिः। नापि ब्रह्मप्रतिषेध उपपद्यते— 'ब्रह्म ते ब्रवाणि' इत्याद्युपक्रमविरोधात्, 'असन्नेव स भवति। असद्ब्रह्मेति वेद चेत्' इत्यादिनिन्दाविरोधात्, 'अस्तीत्येवोपलब्धव्यः' इत्याद्यवधारणविरोधात्, सर्ववेदान्तव्याकोपप्रसङ्गाच्च। वाङ्मनसातीतत्वमपि ब्रह्मणो न अभावाभिप्रायेणाभिधीयते; न हि महता परिकरबन्धेन 'ब्रह्मविदाप्नोति परम्' 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्येवमादिना वेदान्तेषु ब्रह्म प्रतिपाद्य तस्यैव पुनः अभावोऽभिलप्येत; 'प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्' इति हि न्यायः। प्रतिपादनप्रक्रिया तु एषा— 'यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह' इति; एतदुक्तं भवति— वाङ्मनसातीतमविषयान्तःपाति प्रत्यगात्मभूतं नित्यशुद्धबुद्धमुक्तस्वभावं ब्रह्मेति। तस्माद्ब्रह्मणो रूपप्रपञ्चं प्रतिषेधति, परिशिनष्टि ब्रह्म—इत्यवगन्तव्यम्॥

तदेतदुच्यते—प्रकृतैतावत्त्वं हि प्रतिषेधतीति। प्रकृतं यदेतावत् इयत्तापरिच्छिन्नं मूर्तामूर्तलक्षणं ब्रह्मणो रूपं तदेष शब्दः प्रतिषेधति। तद्धि प्रकृतं प्रपञ्चितं च पूर्वस्मिन्ग्रन्थे अधिदैवतमध्यात्मं च। तज्जनितमेव च वासनालक्षणमपरं

रूपम् अमूर्तरसभूतं पुरुषशब्दोदितं लिङ्गात्मव्यपाश्रयं माहारजनाद्युपमाभिर्दर्शितम्—अमूर्तरसस्य पुरुषस्य चक्षुर्ग्राह्यरूपयोगित्वानुपपत्तेः । तदेतत् सप्रपञ्चं ब्रह्मणो रूपं संनिहितालम्बनेन इति-करणेन प्रतिषेधकं नञं प्रति उपनीयत इति गम्यते । ब्रह्म तु रूपविशेषणत्वेन षष्ठ्या निर्दिष्टं पूर्वस्मिन्ग्रन्थे, न स्वप्रधानत्वेन । प्रपञ्चिते च तदीये रूपद्वये रूपवतः स्वरूपजिज्ञासायाम् इदमुपक्रान्तम्— 'अथात आदेशो नेति नेति' इति । तत्र कल्पितरूपप्रत्याख्यानेन ब्रह्मणः स्वरूपावेदनमिति निर्णीयते । तदास्पदं हि इदं समस्तं कार्यम् 'नेति नेति' इति प्रतिषिद्धम् । युक्तं च कार्यस्य, वाचारम्भणशब्दादिभ्योऽसत्त्वमिति, नेति नेतीति प्रतिषेधनम्; न तु ब्रह्मणः, सर्वकल्पनामूलत्वात् । न च अत्र इयमाशङ्का कर्तव्या— कथं हि शास्त्रं स्वयमेव ब्रह्मणो रूपद्वयं दर्शयित्वा, स्वयमेव पुनः प्रतिषेधति—'प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्' इति— यतः नेदं शास्त्रं प्रतिपाद्यत्वेन ब्रह्मणो रूपद्वयं निर्दिशति, लोकप्रसिद्धं तु इदं रूपद्वयं ब्रह्मणि कल्पितं परामृशति प्रतिषेध्यत्वाय शुद्धब्रह्मस्वरूपप्रतिपादनाय च— इति निरवद्यम् । द्वौ च एतौ प्रतिषेधौ यथासंख्यन्यायेन द्वे अपि मूर्तामूर्ते प्रति-

षेधतः; यद्वा पूर्वः प्रतिषेधो भूतराशिं प्रतिषेधति, उत्तरो वासनाराशिम्। अथवा 'नेति नेति' इति वीप्सा इयम्—'इति' इति यावत्किंचित् उत्प्रेक्ष्यते, तत्सर्वं न भवतीत्यर्थः—परिगणितप्रतिषेधे हि क्रियमाणे, यदि नैतद्ब्रह्म, किमन्यद्ब्रह्म भवेदिति जिज्ञासा स्यात्; वीप्सायां तु सत्यां समस्तस्य विषयजातस्य प्रतिषेधात् अविषयः प्रत्यगात्मा ब्रह्मेति, जिज्ञासा निवर्तते। तस्मात् प्रपञ्चमेव ब्रह्मणि कल्पितं प्रतिषेधति, परिशिनष्टि ब्रह्म— इति निर्णयः॥

इतश्च एष एव निर्णयः, यतः— ततः प्रपञ्चप्रतिषेधात्, भूयो ब्रह्म ब्रवीति– 'अन्यत्परमस्ति' इति। अभावावसाने हि प्रतिषेधे क्रियमाणे किमन्यत्परमस्तीति ब्रूयात्। तत्रैषा अक्षरयोजना— 'नेति नेति' इति ब्रह्म आदिश्य, तमेव आदेशं पुनर्निर्वक्ति– 'नेति नेति' इत्यस्य कोऽर्थः? न हि एतस्माद्ब्रह्मणो व्यतिरिक्तमस्तीत्यतः 'नेति नेति' इत्युच्यते, न पुनः स्वयमेव नास्ति– इत्यर्थः; तच्च दर्शयति– अन्यत्परम् अप्रतिषिद्धं ब्रह्म अस्तीति। यदा पुनरेवमक्षराणि योज्यन्ते—न हि, एतस्मात् 'इति न' 'इति न' इति प्रपञ्चप्रतिषेधरूपात् आदेशनात्, अन्यत्परमादेशनं ब्रह्मणः अस्तीति— तदा, 'ततो ब्रवीति च भूयः' इत्येतत् नामधेयविषयं यो-

जयितव्यम्— 'अथ नामधेयꣳ सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यम्' इति हि ब्रवीति— इति । तच्च ब्रह्मावसाने प्रतिषेधे समञ्जसं भवति; अभावावसाने तु प्रतिषेधे, किम् 'सत्यस्य सत्यम्' इत्युच्येत? तस्माद्ब्रह्मावसानः अयं प्रतिषेधः, नाभावावसानः— इत्यध्यवस्यामः ॥

## तदव्यक्तमाह हि ॥ २३ ॥

यत्तत् प्रतिषिद्धात्प्रपञ्चजातादन्यत् परं ब्रह्म, तदस्ति चेत्, कस्मान्न गृह्यत इति, उच्यते—तत् अव्यक्तमनिन्द्रियग्राह्यम्, सर्वदृश्यसाक्षित्वात् । आह हि एवं श्रुतिः— 'न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैस्तपसा कर्मणा वा' 'स एष नेति नेत्यात्मागृह्यो न हि गृह्यते' 'यत्तदद्रेश्यमग्राह्यम्' 'यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयने' इत्याद्या; स्मृतिरपि— 'अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते' इत्याद्या ॥

## अपि च संराधने प्रत्यक्षानुमानाभ्याम् ॥ २४ ॥

अपि च एनमात्मानं निरस्तसमस्तप्रपञ्चमव्यक्तं संराधनकाले पश्यन्ति योगिनः; संराधनं च भक्तिध्यानप्रणिधानाद्य-

नुष्ठानम् । कथं पुनरवगम्यते— संराधनकाले पश्यन्तीति? प्रत्यक्षानुमानाभ्याम्, श्रुतिस्मृतिभ्यामित्यर्थः। तथा हि श्रुतिः —'पराञ्चि खानि व्यतृणत्स्वयंभूस्तस्मात्पराङ् पश्यति नान्तरात्मन् । कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्' इति, 'ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यते निष्कलं ध्यायमानः' इति चैवमाद्या । स्मृतिरपि—'ये विनिद्रा जितश्वासाः संतुष्टाः संयतेन्द्रियाः । ज्योतिः पश्यन्ति युञ्जानास्तस्मै योगात्मने नमः ॥ योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम्' इति चैवमाद्या ॥

ननु संराध्यसंराधकभावाभ्युपगमात्परापरात्मनोरन्यत्वं स्यादिति; नेत्युच्यते—

**प्रकाशादिवच्चावैशेष्यं प्रकाशश्च**
**कर्मण्यभ्यासात् ॥ २५ ॥**

यथा प्रकाशाकाशसवितृप्रभृतयः अङ्गुलिकरकोदकप्रभृतिषु कर्मसु उपाधिभूतेषु सविशेषा इवावभासन्ते, न च स्वाभाविकीमविशेषात्मतां जहति; एवमुपाधिनिमित्त एवायमात्मभेदः, स्वतस्तु ऐकात्म्यमेव । तथा हि वेदान्तेषु अभ्यासेन असकृत् जीवप्राज्ञयोरभेदः प्रतिपाद्यते ॥

## अतोऽनन्तेन तथा हि लिङ्गम् ॥ २६ ॥

अतश्च स्वाभाविकत्वादभेदस्य, अविद्याकृतत्वाच्च भेदस्य, विद्यया अविद्यां विधूय जीवः परेण अनन्तेन प्राज्ञेन आत्मना एकतां गच्छति । तथा हि लिङ्गम्—'स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति' 'ब्रह्मैव सन्ब्रह्माप्येति' इत्यादि ॥

## उभयव्यपदेशात्त्वहिकुण्डलवत् ॥ २७ ॥

तस्मिन्नेव संराध्यसंराधकभावे मतान्तरमुपन्यस्यति, स्वमतविशुद्धये । क्वचित् जीवप्राज्ञयोर्भेदो व्यपदिश्यते— 'ततस्तु तं पश्यते निष्कलं ध्यायमानः' इति ध्यातृध्यातव्यत्वेन द्रष्टृद्रष्टव्यत्वेन च; 'परात्परं पुरुषमुपैति दिव्यम्' इति गन्तृगन्तव्यत्वेन; 'यः सर्वाणि भूतान्यन्तरो यमयति' इति नियन्तृनियन्तव्यत्वेन च । क्वचित्तु तयोरेवाभेदो व्यपदिश्यते— 'तत्त्वमसि' 'अहं ब्रह्मास्मि' 'एष त आत्मा सर्वान्तरः' 'एष त आत्मान्तर्याम्यमृतः' इति । तत्रैवमुभयव्यपदेशे सति, यद्यभेद एव एकान्ततो गृह्येत, भेदव्यपदेशो निरालम्बन एव स्यात् । अत उभयव्यपदेशदर्शनात् अहिकुण्डलवदत्र तत्त्वं भवितुमर्हति— यथा अहिरित्यभेदः, कुण्डलाभोगप्रांशुत्वादीनीति च भेदः, एवमिहापीति ॥

## प्रकाशाश्रयवद्वा तेजस्त्वात् ॥ २८ ॥

अथवा प्रकाशाश्रयवदेतत्प्रतिपत्तव्यम्— यथा प्रकाशः सावित्रः तदाश्रयश्च सविता नात्यन्तभिन्नौ, उभयोरपि तेजस्त्वाविशेषात्; अथ च भेदव्यपदेशभाजौ भवतः— एवमिहापीति ॥

## पूर्ववद्वा ॥ २९ ॥

यथा वा पूर्वमुपन्यस्तम्—'प्रकाशादिवच्चावैशेष्यम्' इति, तथैव एतद्भवितुमर्हति ; तथा हि अविद्याकृतत्वाद्बन्धस्य विद्यया मोक्ष उपपद्यते । यदि पुनः परमार्थत एव बद्धः कश्चिदात्मा अहिकुण्डलन्यायेन परस्य आत्मनः संस्थानभूतः, प्रकाशाश्रयन्यायेन च एकदेशभूतोऽभ्युपगम्येत ; ततः पारमार्थिकस्य बन्धस्य तिरस्कर्तुमशक्यत्वात् मोक्षशास्त्रवैयर्थ्यं प्रसज्येत । न चात्र उभावपि भेदाभेदौ श्रुतिः तुल्यवद्व्यपदिशति ; अभेदमेव हि प्रतिपाद्यत्वेन निर्दिशति, भेदं तु पूर्वप्रसिद्धमेवानुवदति अर्थान्तरविवक्षया । तस्मात्प्रकाशादिवच्चावैशेष्यमित्येष एव सिद्धान्तः ॥

## प्रतिषेधाच्च ॥ ३० ॥

इतश्च एष एव सिद्धान्तः, यत्कारणं परस्मादात्मनोऽन्यं

चेतनं प्रतिषेधति शास्त्रम्— 'नान्योऽतोऽस्ति द्रष्टा' इत्येवमादि । 'अथात आदेशो नेति नेति' 'तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यम्' इति च ब्रह्मव्यतिरिक्तप्रपञ्चनिराकरणात् ब्रह्ममात्रपरिशेषाच्च एष एव सिद्धान्त इति गम्यते ॥

यदेतत् निरस्तसमस्तप्रपञ्चं ब्रह्म निर्धारितम्, अस्मात्परम् अन्यत्तत्त्वमस्ति नास्तीति श्रुतिविप्रतिपत्तेः संशयः । कानिचिद्धि वाक्यानि आपातेनैव प्रतिभासमानानि ब्रह्मणोऽपि परम् अन्यत्तत्त्वं प्रतिपादयन्तीव; तेषां हि परिहारमभिधातुमयमुपक्रमः क्रियते—

## परमतः सेतून्मानसंबन्धभेदव्यपदेशेभ्यः ॥ ३१ ॥

परम् अतो ब्रह्मणः अन्यत्तत्त्वं भवितुमर्हति; कुतः? सेतुव्यपदेशात् उन्मानव्यपदेशात् संबन्धव्यपदेशात् भेदव्यपदेशाच्च । सेतुव्यपदेशस्तावत्— 'अथ य आत्मा स सेतुर्विधृतिः' इत्यात्मशब्दाभिहितस्य ब्रह्मणः सेतुत्वं संकीर्तयति; सेतुशब्दश्च हि लोके जलसंतानविच्छेदकरे मृद्दार्वादिप्रचये प्रसिद्धः; इह च सेतुशब्दः आत्मनि प्रयुक्त इति लौकिकसेतोरिव आत्मसेतोरन्यस्य वस्तुनोऽस्तित्वं गमयति;

'सेतुं तीर्त्वा' इति च तरतिशब्दप्रयोगात्— यथा लौकिकं सेतुं तीर्त्वा जाङ्गलमसेतुं प्राप्नोति, एवमात्मानं सेतुं तीर्त्वा अनात्मानमसेतुं प्राप्नोतीति गम्यते । उन्मानव्यपदेशश्च भवति—तदेतद्ब्रह्म चतुष्पात् अष्टाशफं षोडशकलमिति; यच्च लोके उन्मितम् एतावदिदमिति परिच्छिन्नं कार्षापणादि, ततोऽन्यद्वस्त्वस्तीति प्रसिद्धम्; तथा ब्रह्मणोऽप्युन्मानात् ततोऽन्येन वस्तुना भवितव्यमिति गम्यते। तथा संबन्धव्यपदेशो भवति— 'सता सोम्य तदा संपन्नो भवति' इति, शारीर आत्मा 'प्राज्ञेनात्मना संपरिष्वक्तः' इति च; मितानां च मितेन संबन्धो दृष्टः, यथा नराणां नगरेण; जीवानां च ब्रह्मणा संबन्धं व्यपदिशति सुषुप्तौ; अतः ततः परमन्यदमितमस्तीति गम्यते । भेदव्यपदेशश्च एनमर्थं गमयति; तथा हि— 'अथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते' इत्यादित्याधारमीश्वरं व्यपदिश्य, ततो भेदेन अक्ष्याधारमीश्वरं व्यपदिशति— 'अथ य एषोऽक्षिणि पुरुषो दृश्यते' इति; अतिदेशं च अस्य अमुना रूपादिषु करोति— 'तस्यैतस्य तदेव रूपं यदमुष्य रूपं यावमुष्य गेष्णौ तौ गेष्णौ यन्नाम तन्नाम' इति; सावधिकं च ईश्वरत्वमुभयोर्व्यपदिशति— 'ये चामुष्मात्पराञ्चो लो-

कास्तेषां चेष्टे देवकामानां च' इत्येकस्य, 'ये चैतस्मादर्वाञ्चो लोकास्तेषां चेष्टे मनुष्यकामानां च' इत्येकस्य, यथा इदं मागधस्य राज्यम्, इदं वैदेहस्येति । एवमेतेभ्यः सेत्वादिव्यपदेशेभ्यो ब्रह्मणः परमस्तीति ॥

एवं प्राप्ते, प्रतिपाद्यते—

## सामान्यात्तु ॥ ३२ ॥

तु-शब्देन प्रदर्शितां प्राप्तिं निरुणद्धि । न ब्रह्मणोऽन्यत् किंचिद्भवितुमर्हति, प्रमाणाभावात्—न ह्यन्यस्यास्तित्वे किंचित्प्रमाणमुपलभामहे; सर्वस्य हि जनिमतो वस्तुजातस्य जन्मादि ब्रह्मणो भवतीति निर्धारितम्, अनन्यत्वं च कारणात् कार्यस्य; न च ब्रह्मव्यतिरिक्तं किंचित् अजं संभवति, 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' इत्यवधारणात्; एकविज्ञानेन च सर्वविज्ञानप्रतिज्ञानात् न ब्रह्मव्यतिरिक्तवस्त्वस्तित्वमवकल्पते । ननु सेत्वादिव्यपदेशाः ब्रह्मव्यतिरिक्तं तत्त्वं सूचयन्तीत्युक्तम्; नेत्युच्यते— सेतुव्यपदेशस्तावत् न ब्रह्मणो बाह्यस्य सद्भावं प्रतिपादयितुं क्षमते; सेतुरात्मेति हि आह, न अतः परमस्तीति; तत्र परस्मिन् असति सेतुत्वं नावकल्पत इति परं किमपि कल्प्येत; न चैतत् न्याय्यम्; दृष्टो हि अप्रसिद्धकल्पना;

अपि च सेतुव्यपदेशादात्मनो लौकिकसेतुनिदर्शनेन सबाह्यवस्तुतां प्रसञ्जयता मृद्दारुमयतापि प्रासङ्क्ष्यत ; न चैतन्न्याय्यम् , अजत्वादिश्रुतिविरोधात् ; सेतुसामान्यात्तु सेतुशब्द आत्मनि प्रयुक्त इति श्लिष्यते ; जगतस्तन्मर्यादानां च विधारकत्वं सेतुसामान्यमात्मनः ; अतः सेतुरिव सेतुः— इति प्रकृत आत्मा स्तूयते । 'सेतुं तीर्त्वा' इत्यपि तरतिः अतिक्रमासंभवात् प्राप्नोत्यर्थे एव वर्तते— यथा व्याकरणं तीर्ण इति प्राप्तः उच्यते, न अतिक्रान्तः, तद्वत् ॥

## बुद्ध्यर्थः पादवत् ॥ ३३ ॥

यदप्युक्तम्— उन्मानव्यपदेशादस्ति परमिति, तत्राभिधीयते— उन्मानव्यपदेशोऽपि न ब्रह्मव्यतिरिक्तवस्त्वस्तित्वप्रतिपत्त्यर्थः ; किमर्थस्तर्हि ? बुद्ध्यर्थः, उपासनार्थ इति यावत् ; चतुष्पादष्टाशफं षोडशकलमित्येवंरूपा—बुद्धिः कथं नु नाम ब्रह्मणि स्थिरा स्यादिति—विकारद्वारेण ब्रह्मण उन्मानकल्पनैव क्रियते ; न हि अविकारेऽनन्ते ब्रह्मणि सर्वैः पुंभिः शक्या बुद्धिः स्थापयितुम् , मन्दमध्यमोत्तमबुद्धित्वात् पुंसामिति । पादवत्— यथा मनआकाशयोरध्यात्ममधिदैवतं च ब्रह्मप्रतीकयोराम्नातयोः, चत्वारो वागादयो मनःसंबन्धिनः पादाः कल्प्यन्ते, चत्वारश्च अग्न्यादय आ-

काशसंबन्धिनः— आध्यानाय— तद्वत् । अथवा पादव-दिति— यथा कार्षापणे पादविभागो व्यवहारप्राचुर्याय कल्प्यते— न हि सकलेनैव कार्षापणेन सर्वदा सर्वे जना व्यवहर्तुमीशते, क्रयविक्रये परिमाणानियमात्—तद्वदित्यर्थः ॥

## स्थानविशेषात्प्रकाशादिवत् ॥ ३४ ॥

इह सूत्रे द्वयोरपि संबन्धभेदव्यपदेशयोः परिहारोऽभि-धीयते । यदप्युक्तम्— संबन्धव्यपदेशात् भेदव्यपदेशाच्च परमतः स्यादिति, तदप्यसत्; यत एकस्यापि स्थानविशे-षापेक्षया एतौ व्यपदेशावुपपद्येते । संबन्धव्यपदेशे तावद-यमर्थः— बुद्ध्याद्युपाधिस्थानविशेषयोगादुद्भूतस्य विशे-षविज्ञानस्य उपाध्युपशमे य उपशमः, स परमात्मना संब-न्धः— इत्युपाध्यपेक्षया उपचर्यते, न परिमितत्वापेक्षया । तथा भेदव्यपदेशोऽपि ब्रह्मण उपाधिभेदापेक्षयैव उपचर्यते, न स्वरूपभेदापेक्षया । प्रकाशादिवदिति उपमोपादानम्—यथा एकस्य प्रकाशस्य सौर्यस्य चान्द्रमसस्य वा उपाधियोगादुप-जातविशेषस्य उपाध्युपशमात्संबन्धव्यपदेशो भवति, उपा-धिभेदाच्च भेदव्यपदेशः; यथा वा सूचीपाशाकाशादिषूपा-ध्यपेक्षयैवैतौ संबन्धभेदव्यपदेशौ भवतः— तद्वत् ॥

## उपपत्तेश्च ॥ ३५ ॥

उपपद्यते च अत्र ईदृश एव संबन्धः, नान्यादृशः— 'स्वमपीतो भवति' इति हि स्वरूपसंबन्धमेनमामनन्ति; स्वरूपस्य च अनपायित्वात् न नरनगरन्यायेन संबन्धो घटते; उपाधिकृतस्वरूपतिरोभावात्तु 'स्वमपीतो भवति' इत्युपपद्यते। तथा भेदोऽपि नान्यादृशः संभवति, बहुतरश्रुतिप्रसिद्धैकेश्वरत्वविरोधात्; तथा च श्रुतिरेकस्याप्याकाशस्य स्थानकृतं भेदव्यपदेशमुपपादयति— 'योऽयं बहिर्धा पुरुषादाकाशः' 'योऽयमन्तः पुरुष आकाशः' 'योऽयमन्तर्हृदय आकाशः' इति॥

## तथान्यप्रतिषेधात्॥ ३६॥

एवं सेत्वादिव्यपदेशान् परपक्षहेतूनुन्मथ्य संप्रति स्वपक्षं हेत्वन्तरेणोपसंहरति। तथान्यप्रतिषेधादपि न ब्रह्मणः परं वस्त्वन्तरमस्तीति गम्यते; तथा हि— 'स एवाधस्तात्... अहमेवाधस्तात्' 'आत्मैवाधस्तात्' 'सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेद' 'ब्रह्मैवेदं सर्वम्' 'आत्मैवेदं सर्वम्' 'नेह नानास्ति किंचन' 'यस्मात्परं नापरमस्ति किंचित्' 'तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यम्' इत्येवमादीनि वाक्यानि स्वप्रकरणस्थानि अन्यार्थत्वेन परिणेतुमशक्यानि ब्रह्मव्यतिरिक्तं वस्त्वन्तरं वारयन्ति। सर्वान्तरश्रुतेश्च न पर-

मात्मनोऽन्यः अन्तरात्मा अस्तीत्यत्रगम्यते ॥

## अनेन सर्वगतत्वमायामशब्दादिभ्यः ॥ ३७ ॥

अनेन सेत्वादिव्यपदेशनिराकरणेन अन्यप्रतिषेधसमाश्रयणेन च सर्वगतत्वमप्यात्मनः सिद्धं भवति; अन्यथा हि तन्न सिध्येत् । सेत्वादिव्यपदेशेषु हि मुख्येष्वङ्गीक्रियमाणेषु परिच्छेद आत्मनः प्रसज्येत, सेत्वादीनामेवमात्मकत्वात्; तथा अन्यप्रतिषेधेऽप्यसति, वस्तु वस्त्वन्तराद्व्यावर्तत इति परिच्छेद एव आत्मनः प्रसज्येत । सर्वगतत्वं च अस्य आयामशब्दादिभ्योऽवगम्यते; आयामशब्दः व्याप्तिवचनः शब्दः; 'यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाशः' 'आकाशवत्सर्वगतश्च नित्यः' 'ज्यायान्दिवः' 'ज्यायानाकाशात्'— 'नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः' इत्येवमादयो हि श्रुतिस्मृतिन्यायाः सर्वगतत्वमात्मनोऽवबोधयन्ति ॥

## फलमत उपपत्तेः ॥ ३८ ॥

तस्यैव ब्रह्मणो व्यावहारिक्याम् ईशित्रीशितव्यविभागावस्थायाम्, अयमन्यः स्वभावो वर्ण्यते । यदेतत् इष्टानिष्टव्यामिश्रलक्षणं कर्मफलं संसारगोचरं त्रिविधं प्रसिद्धं जन्तूनाम्, किमेतत् कर्मणो

८. फलाधिकरणम् ।

भवति, आहोस्विदीश्वरादिति भवति विचारणा । तत्र ताव- त्प्रतिपाद्यते— फलम् अतः ईश्वरात् भवितुमर्हति ; कुतः ? उपपत्तेः ; स हि सर्वाध्यक्षः सृष्टिस्थितिसंहारान् विचित्रान वि- दधत् देशकालविशेषाभिज्ञत्वात् कर्मिणां कर्मानुरूपं फलं संपा- दयतीत्युपपद्यते ; कर्मणस्तु अनुक्षणविनाशिनः कालान्तरभावि फलं भवतीत्यनुपपन्नम् , अभावाद्भावानुत्पत्तेः । स्यादेतत्— कर्म विनश्यत् स्वकालमेव स्वानुरूपं फलं जनयित्वा विनश्य- ति, तत्फलं कालान्तरितं कर्त्रा भोक्ष्यत इति ; तदपि न परि- शुध्यति, प्राग्भोक्तृसंबन्धात् फलत्वानुपपत्तेः— यत्कालं हि यत् सुखं दुःखं वा आत्मना भुज्यते, तस्यैव लोके फलत्वं प्रसिद्धम् ; न हि असंबद्धस्यात्मना सुखस्य दुःखस्य वा फलत्वं प्रतियन्ति लौकिकाः । अथोच्येत— मा भूत्कर्मानन्तरं फलो- त्पादः, कर्मकार्यादपूर्वात्फलमुत्पत्स्यत इति, तदपि नोपपद्यते, अपूर्वस्याचेतनस्य काष्ठलोष्ठसमस्य चेतनेनाप्रवर्तितस्य प्रवृ- त्त्यनुपपत्तेः, तदस्तित्वे एव प्रमाणाभावात् ; अर्थापत्तिः प्रमाणमिति चेत् , न, ईश्वरसिद्धेरर्थापत्तिक्षयात् ॥

## श्रुतत्वाच्च ॥ ३९ ॥

न केवलम् उपपत्तेरेव ईश्वरं फलहेतुं कल्पयामः, किं तर्हि श्रुतत्वादपि ईश्वरमेव फलहेतुं मन्यामहे, तथा च श्रुतिर्भवति

—'स वा एष महानज आत्मान्नादो वसुदानः' इत्येवंजातीयका ॥

## धर्मं जैमिनिरत एव ॥ ४० ॥

जैमिनिस्त्वाचार्यो धर्मं फलस्य दातारं मन्यते, अत एव हेतोः— श्रुतेः उपपत्तेश्च । श्रूयते तावदयमर्थः 'स्वर्गकामो यजेत' इत्येवमादिषु वाक्येषु; तत्र च विधिश्रुतेर्विषयभावोपगमात् यागः स्वर्गस्योत्पादक इति गम्यते; अन्यथा हि अननुष्ठातृको याग आपद्येत; तत्र अस्य उपदेशवैयर्थ्यं स्यात् । ननु अनुक्षणविनाशिनः कर्मणः फलं नोपपद्यत इति, परित्यक्तोऽयं पक्षः; नैष दोषः, श्रुतिप्रामाण्यात्—श्रुतिश्चेत् प्रमाणम्, यथायं कर्मफलसंबन्धः श्रुत उपपद्यते, तथा कल्पयितव्यः; न च अनुत्पाद्य किमप्यपूर्वं कर्म विनश्यत् कालान्तरितं फलं दातुं शक्नोति; अतः कर्मणो वा सूक्ष्मा काचिदुत्तरावस्था फलस्य वा पूर्वावस्था अपूर्वं नाम अस्तीति तर्क्यते । उपपद्यते च अयमर्थ उक्तेन प्रकारेण । ईश्वरस्तु फलं ददातीत्यनुपपन्नम्, अविचित्रस्य कारणस्य विचित्रकार्यानुपपत्तेः वैषम्यनैर्घृण्यप्रसङ्गात्, तदनुष्ठानवैयर्थ्यापत्तेश्च । तस्मात् धर्मादेव फलमिति ॥

## पूर्वं तु बादरायणो हेतुव्यपदेशात् ॥ ४१ ॥

बादरायणस्त्वाचार्यः पूर्वोक्तमेव ईश्वरं फलहेतुं मन्यते। केवलात्कर्मणः अपूर्वाद्वा केवलात् फलमित्ययं पक्षः तु-शब्देन व्यावर्त्यते। कर्मापेक्षात् अपूर्वापेक्षाद्वा यथा तथास्तु ईश्वरात्फलमिति सिद्धान्तः; कुतः? हेतुव्यपदेशात्; धर्माधर्मयोरपि हि कारयितृत्वेन ईश्वरो हेतुः व्यपदिश्यते, फलस्य च दातृत्वेन— 'एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते। एष उ एवासाधु कर्म कारयति तं यमधो निनीषते' इति; स्मर्यते च अयमर्थो भगवद्गीतासु— 'यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति। तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम्॥ स तया श्रद्धया युक्तस्तस्याराधनमीहते। लभते च ततः कामान् मयैव विहितान्हितान्' इति। सर्ववेदान्तेषु च ईश्वरहेतुका एव सृष्टयो व्यपदिश्यन्ते; तदेव च ईश्वरस्य फलहेतुत्वम्, यत् स्वकर्मानुरूपाः प्रजाः सृजति। विचित्रकार्यानुपपत्त्यादयोऽपि दोषाः कृतप्रयत्नापेक्षत्वादीश्वरस्य न प्रसज्यन्ते॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्द-
भगवत्पूज्यपादशिष्यस्य श्रीमच्छंकरभगवतः कृतौ
**शारीरकमीमांसासूत्रभाष्ये**
**तृतीयाध्यायस्य द्वितीयः पादः॥**

श्रीमच्छंकरभगवत्पादैर्विरचितम्

# ॥ ब्रह्मसूत्रभाष्यम् ॥

## तृतीयाध्याये
## तृतीयः पादः

## तृतीयः पादः ॥

व्याख्यातं विज्ञेयस्य ब्रह्मणः तत्त्वम्; इदानीं तु प्रतिवेदान्तं विज्ञानानि भिद्यन्ते, न वेति विचार्यते। ननु विज्ञेयं ब्रह्म पूर्वापरादिभेदरहितम् एकरसं सैन्धवघनवत् अवधारितम्; तत्र कुतो विज्ञानभेदाभेदचिन्तावसरः? न हि कर्मबहुत्ववत् ब्रह्मबहुत्वमपि वेदान्तेषु प्रतिपिपादयिषितमिति शक्यं वक्तुम्, ब्रह्मण एकत्वात् एकरूपत्वाच्च; न च एकरूपे ब्रह्मणि अनेकरूपाणि विज्ञानानि संभवन्ति; न हि—अन्यथा अर्थः अन्यथा ज्ञानम्—इत्यभ्रान्तं भवति; यदि पुनः एकस्मिन्ब्रह्मणि बहूनि विज्ञानानि वेदान्तेषु प्रतिपिपादयिषितानि, तेषाम् एकमभ्रान्तम्, भ्रान्तानि इतराणीति अनाश्वासप्रसङ्गो वेदान्तेषु; तस्मान्न तावत्प्रतिवेदान्तं ब्रह्मविज्ञानभेद आशङ्कितुं शक्यते। नाप्यस्य चोदनाद्यविशेषादभेद उच्येत, ब्रह्मविज्ञानस्य अचोदनालक्षणत्वात्; अविधिप्रधानैर्हि वस्तुपर्यवसायिभिः ब्रह्मवाक्यैः

ब्रह्मविज्ञानं जन्यत इत्यवोचदाचार्यः 'तत्तु समन्वयात्' इत्यत्र । तत्कथमिमां भेदाभेदचिन्तामारभत इति ॥

तदुच्यते— सगुणब्रह्मविषया प्राणादिविषया च इयं विज्ञानभेदाभेदचिन्तेत्यदोषः । अत्र हि कर्मवत् उपासनानां भेदाभेदौ संभवतः; कर्मवदेव च उपासनानि दृष्टफलानि अदृष्टफलानि च उच्यन्ते, क्रममुक्तिफलानि च कानिचित् सम्यग्दर्शनोत्पत्तिद्वारेण । तेषु एषा चिन्ता संभवति— किं प्रतिवेदान्तं विज्ञानभेदः, आहोस्वित् नेति ॥

तत्र पूर्वपक्षहेतवस्तावदुपन्यस्यन्ते— नाम्नस्तावत् भेदप्रतिपत्तिहेतुत्वं प्रसिद्धं ज्योतिरादिषु; अस्ति च अत्र वेदान्तान्तरविहितेषु विज्ञानेषु अन्यदन्यत् नाम— तैत्तिरीयकं वाजसनेयकं कौथुमकं कौषीतकं शाट्यायनकमित्येवमादि । तथा रूपभेदोऽपि कर्मभेदस्य प्रतिपादकः प्रसिद्धः—'वैश्वदेव्यामिक्षा, वाजिभ्यो वाजिनम्' इत्येवमादिषु; अस्ति च अत्र रूपभेदः; तद्यथा— केचिच्छाखिनः पञ्चाग्निविद्यायां षष्ठमपरमग्निमामनन्ति, अपरे पुनः पञ्चैव पठन्ति; तथा प्राणसंवादादिषु केचित् ऊनान्वागादीनामनन्ति, केचिदधिकान् । तथा धर्मविशेषोऽपि कर्मभेदस्य प्रतिपादक आशङ्कितः कारीर्यादिषु; अस्ति च अत्र धर्मविशेषः; यथा आथ-

वैणिकानां शिरोव्रतमिति । एवं पुनरुक्त्यादयोऽपि भेदहेतवः यथासंभवं वेदान्तान्तरेषु योजयितव्याः । तस्मात् प्रतिवेदान्तं विज्ञानभेद इत्येवं प्राप्ते, ब्रूमः—

## सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् ॥ १ ॥

सर्ववेदान्तप्रत्ययानि विज्ञानानि तस्मिन् तस्मिन् वेदान्ते तानि तान्येव भवितुमर्हन्ति; कुतः? चोदनाद्यविशेषात्;

१. सर्ववेदान्तप्रत्ययाधिकरणम् ।

आदिग्रहणेन शाखान्तराधिकरणसिद्धान्तसूत्रोदिता अभेदहेतव इहाकृष्यन्ते— संयोगरूपचोदनाख्याविशेषादित्यर्थः । यथा एकस्मिन्नग्निहोत्रे शाखाभेदेऽपि पुरुषप्रयत्नस्तादृश एव चोद्यते— जुहुयादिति, एवम् 'यो ह वै ज्येष्ठं च श्रेष्ठं च वेद' इति वाजसनेयिनां छन्दोगानां च तादृश्येव चोदना । प्रयोजनसंयोगोऽप्यविशिष्ट एव—'ज्येष्ठश्च श्रेष्ठश्च स्वानां भवति' इति । रूपमप्युभयत्र तदेव विज्ञानस्य, यदुत ज्येष्ठश्रेष्ठादिविशेषणान्वितं प्राणतत्त्वम्— यथा च द्रव्यदेवते यागस्य रूपम्, एवं विज्ञेयं रूपं विज्ञानस्य; तेन हि तत् रूप्यते । समाख्यापि सैव— प्राणविद्येति । तस्मात् सर्ववेदान्तप्रत्ययत्वं विज्ञानानाम् । एवं पञ्चाग्निविद्या वैश्वानरविद्या शाण्डिल्यविद्येत्येवमादिष्वपि योजयितव्यम् । ये तु नामरूपादयो भेदहे-

त्वाभासाः, ते प्रथम एव काण्डे 'न नाम्ना स्यादचोदनाभिधानत्वात्' इत्यारभ्य परिहृताः ॥

इहापि कंचिद्विशेषमाशङ्क्य परिहरति—

## भेदान्नेति चेन्नैकस्यामपि ॥ २ ॥

स्यादेतत्— सर्ववेदान्तप्रत्ययत्वं विज्ञानानां गुणभेदात् नोपपद्यते ; तथा हि— वाजसनेयिनः पञ्चाग्निविद्यां प्रस्तुत्य षष्ठमपरमग्निमामनन्ति—'तस्याग्निरेवाग्निर्भवति' इत्यादिना ; छन्दोगास्तु तं न आमनन्ति, पञ्चसंख्ययैव च ते उपसंहरन्ति— 'अथ ह य एतानेवं पञ्चाग्नीन्वेद' इति ; येषां च स गुणोऽस्ति, येषां च नास्ति, कथमुभयेषामेका विद्योपपद्येत ? न च अत्र गुणोपसंहारः शक्यते प्रत्येतुम्, पञ्चसंख्याविरोधात् । तथा प्राणसंवादे श्रेष्ठात् अन्यान् चतुरः प्राणान् वाक्चक्षुःश्रोत्रमनांसि छन्दोगा आमनन्ति ; वाजसनेयिनस्तु पञ्चममप्यामनन्ति—'रेतो वै प्रजापतिः प्रजायते ह प्रजया पशुभिर्य एवं वेद' इति ; आवापोद्वापभेदाच्च वेद्यभेदो भवति, वेद्यभेदाच्च विद्याभेदः, द्रव्यदेवताभेदादिव यागस्येति चेत्— नैष दोषः ; यत एकस्यामपि विद्यायामेवंजातीयको गुणभेद उपपद्यते ; यद्यपि षष्ठस्याग्नेरुपसंहारो

न संभवति, तथापि द्युप्रभृतीनां पञ्चानामग्नीनाम् उभयत्र प्रत्यभिज्ञायमानत्वात् न विद्याभेदो भवितुमर्हति ; न हि षोडशिग्रहणाग्रहणयोरतिरात्रो भिद्यते । पठ्यतेऽपि च षष्ठोऽग्निः छन्दोगैः— 'तं प्रेतं दिष्टमितोऽग्नय एव हरन्ति' इति ; वाजसनेयिनस्तु सांपादिकेषु पञ्चस्वग्निषु अनुवृत्तायाः समिद्धूमादिकल्पनाया निवृत्तये 'तस्याग्निरेवाग्निर्भवति समित्समित्' इत्यादि समामनन्ति ; स नित्यानुवादः ; अथाप्युपासनार्थ एष वादः, तथापि स गुणः शक्यते छन्दोगैरप्युपसंहर्तुम् । न च अत्र पञ्चसंख्याविरोध आशङ्क्यः ; सांपादिकाग्न्यभिप्राया हि एषा पञ्चसंख्या नित्यानुवादभूता, न विधिसमवायिनी— इत्यदोषः । एवं प्राणसंवादादिष्वपि अधिकस्य गुणस्य इतरत्रोपसंहारो न विरुध्यते । न च आवापोद्वापभेदाद्वेद्यभेदो विद्याभेदश्च आशङ्क्यः, कस्यचिद्वेद्यांशस्य आवापोद्वापयोरपि भूयसो वेद्यराशेरभेदावगमात् । तस्मादैकविद्यमेव ॥

## स्वाध्यायस्य तथात्वेन हि समाचारेऽधिकाराच्च सववच्च तन्नियमः ॥ ३ ॥

यदप्युक्तम्—आथर्वणिकानां विद्यां प्रति शिरोव्रताद्यपेक्षणात् अन्येषां च तदनपेक्षणात् विद्याभेद इति, तत्प्रत्यु-

च्यते । स्वाध्यायस्य एष धर्मः, न विद्यायाः ; कथमिदमवगम्यते ? यतः, तथात्वेन स्वाध्यायधर्मत्वेन, समाचारे वेदव्रतोपदेशपरे ग्रन्थे, आथर्वणिकाः 'इदमपि वेदव्रतत्वेन व्याख्यातम्' इति समामनन्ति ; 'नैतदचीर्णव्रतोऽधीते' इति च अधिकृतविषयादेतच्छब्दात् अध्ययनशब्दाच्च स्वोपनिषदध्ययनधर्म एव एष इति निर्धार्यते । ननु 'तेषामेवैतां ब्रह्मविद्यां वदेत शिरोव्रतं विधिवद्यैस्तु चीर्णम्' इति ब्रह्मविद्यासंयोगश्रवणात्, एकैव सर्वत्र ब्रह्मविद्येति, संकीर्येत एष धर्मः—न, तत्रापि एतामिति प्रकृतप्रत्यवमर्शात् ; प्रकृतत्वं च ब्रह्मविद्यायाः ग्रन्थविशेषापेक्षम्—इति ग्रन्थविशेषसंयोग्येव एष धर्मः । सववच्च तन्नियम इति निदर्शननिर्देशः —यथा च सवाः सप्त सौर्यादयः शतौदनपर्यन्ताः वेदान्तरोदितत्रेताग्न्यनभिसंबन्धात् आथर्वणोदितैकाग्न्यभिसंबन्धाच्च आथर्वणिकानामेव नियम्यन्ते, तथैव अयमपि धर्मः स्वाध्यायविशेषसंबन्धात् तत्रैव नियम्यते । तस्मादप्यनवद्यं विद्यैकत्वम् ॥

## दर्शयति च ॥ ४ ॥

दर्शयति च वेदोऽपि विद्यैकत्वं सर्ववेदान्तेषु वेद्यैकत्वोपदेशात्—'सर्वे वेदा यत्पदमामनन्ति' इति, 'तथैतं ह्येव

बह्वृचा महत्युक्थे मीमांसन्त एतमग्नावध्वर्यव एतं महाव्रते छन्दोगाः' इति च। तथा 'महद्भयं वज्रमुद्यतम्, इति काठके उक्तस्य ईश्वरगुणस्य भयहेतुत्वस्य तैत्तिरीयके भेददर्शननिन्दार्थं परामर्शो दृश्यते—'यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते। अथ तस्य भयं भवति। तत्त्वेव भयं विदुषोऽमन्वानस्य' इति। तथा वाजसनेयके प्रादेशमात्रसंपादितस्य वैश्वानरस्य छान्दोग्ये सिद्धवदुपादानम्—'यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते' इति। तथा सर्ववेदान्तप्रत्ययत्वेन अन्यत्र विहितानामुक्थादीनामन्यत्रोपासनविधानाय उपादानात् प्रायदर्शनन्यायेन उपासनानामपि सर्ववेदान्तप्रत्ययत्वसिद्धिः॥

## उपसंहारोऽर्थाभेदाद्विधिशेषवत्समाने च॥ ५॥

इदं प्रयोजनसूत्रम्। स्थिते चैवं सर्ववेदान्तप्रत्ययत्वे सर्वविज्ञानानाम्, अन्यत्रोदितानां विज्ञानगुणानाम्, अन्यत्रापि समाने विज्ञाने उपसंहारो भवति; अर्थाभेदात्—य एव हि तेषां गुणानामेकत्र अर्थो विशिष्टविज्ञानोपकारः, स एव अन्यत्रापि; उभयत्रापि हि तदेवैकं विज्ञानम्; तस्मादुपसंहारः। विधिशेषवत्

२. उपसंहाराधिकरणम्।

—यथा विधिशेषाणामग्निहोत्रादिधर्माणाम्, तदेव एकमग्निहोत्रादि कर्म सर्वत्रेति, अर्थाभेदात् उपसंहरणम्; एवमिहापि। यदि हि विज्ञानभेदो भवेत्, ततो विज्ञानान्तरनिबद्धत्वाद्गुणानाम्, प्रकृतिविकृतिभावाभावाच्च न स्यादुपसंहारः; विज्ञानैकत्वे तु नैवमिति। अस्यैव तु प्रयोजनसूत्रस्य प्रपञ्चः 'सर्वाभेदात्' इत्यारभ्य भविष्यति॥

## अन्यथात्वं शब्दादिति चेन्नाविशेषात्॥ ६॥

वाजसनेयके 'ते ह देवा ऊचुर्हन्तासुरान्यज्ञ उद्गीथेनात्ययामेति' 'ते ह वाचमूचुस्त्वं न उद्गाय' इति प्रक्रम्य,

२. अन्यथात्वाधिकरणम्। वागादीन्प्राणान् असुरपाप्मविद्धत्वेन निन्दित्वा, मुख्यप्राणपरिग्रहः पठ्यते— 'अथ हेममासन्यं प्राणमूचुस्त्वं न उद्गायेति तथेति तेभ्य एष प्राण उदगायत्' इति। तथा छान्दोग्येऽपि 'तद्ध देवा उद्गीथमाजह्रुरनेनैनानभिभविष्यामः' इति प्रक्रम्य, इतरान्प्राणान् असुरपाप्मविद्धत्वेन निन्दित्वा, तथैव मुख्यप्राणपरिग्रहः पठ्यते— 'अथ ह य एवायं मुख्यः प्राणस्तमुद्गीथमुपासांचक्रिरे' इति। उभयत्रापि च प्राणप्रशंसया प्राणविद्याविधिरध्यवसीयते। तत्र संशयः— किमत्र विद्या-

भेदः स्यात्, आहोस्वित् विद्यैकत्वमिति । किं तावत्प्राप्तम्? पूर्वेण न्यायेन विद्यैकत्वमिति । ननु न युक्तं विद्यैकत्वम्, प्रक्रमभेदात्; अन्यथा हि प्रक्रमन्ते वाजसनेयिनः, अन्यथा छन्दोगाः— 'त्वं न उद्गाय' इति वाजसनेयिन उद्गीथस्य कर्तृत्वेन प्राणमामनन्ति, छन्दोगास्तु उद्गीथत्वेन 'तमुद्गीथमुपासांचक्रिरे' इति; तत्कथं विद्यैकत्वं स्यादिति चेत्— नैष दोषः; न हि एतावता विशेषेण विद्यैकत्वम् अपगच्छति, अविशेषस्यापि बहुतरस्य प्रतीयमानत्वात्; तथा हि— देवासुरसंग्रामोपक्रमत्वम्, असुरात्ययाभिप्रायः, उद्गीथोपन्यासः, वागादिसंकीर्तनम्, तन्निन्दया मुख्यप्राणव्यपाश्रयः, तद्वीर्याच्च असुरविध्वंसनम् अश्मलोष्टनिदर्शनेन— इत्येवं बहवोऽर्था उभयत्राप्यविशिष्टाः प्रतीयन्ते । वाजसनेयकेऽपि च उद्गीथसामानाधिकरण्यं प्राणस्य श्रुतम्— 'एष उ वा उद्गीथः' इति । तस्माच्छान्दोग्येऽपि कर्तृत्वं लक्षयितव्यम् । तस्माच्च विद्यैकत्वमिति ॥

## न वा प्रकरणभेदात्परोवरीयस्त्वादिवत् ॥ ७ ॥

न वा विद्यैकत्वमत्र न्याय्यम्; विद्याभेद एव अत्र न्याय्यः; कस्मात्? प्रकरणभेदात्, प्रक्रमभेदादित्यर्थः; तथा

हि इह प्रक्रमभेदो दृश्यते—छान्दोग्ये तावत्—'ओमित्येतदक्षरमुद्गीथमुपासीत' इत्येवमुद्गीथावयवस्य ओंकारस्य उपास्यत्वं प्रस्तुत्य, रसतमत्वादिगुणोपव्याख्यानं तत्र कृत्वा, अथ 'खल्वेतस्यैवाक्षरस्योपव्याख्यानं भवति' इति पुनरपि तमेव उद्गीथावयवमोंकारमनुवर्त्य, देवासुराख्यायिकाद्वारेण तम 'प्राणमुद्गीथमुपासांचक्रिरे' इत्याह; तत्र यदि उद्गीथशब्देन सकला भक्तिरभिप्रेयेत, तस्याश्च कर्ता उद्गाता ऋत्विक्, तत उपक्रमश्चोपरुध्येत, लक्षणा च प्रसज्येत; उपक्रमतन्त्रेण च एकस्मिन्वाक्ये उपसंहारेण भवितव्यम्; तस्मात् अत्र तावत् उद्गीथावयवे ओंकारे प्राणदृष्टिरुपदिश्यते—वाजसनेयके तु उद्गीथशब्देन अवयवग्रहणे कारणाभावात् सकलैव भक्तिरावेद्यते; 'त्वं न उद्गाय' इत्यपि तस्याः कर्ता उद्गाता ऋत्विक् प्राणत्वेन निरूप्यत इति—प्रस्थानान्तरम्। यदपि तत्र उद्गीथसामानाधिकरण्यं प्राणस्य, तदपि उद्गातृत्वेनैव दिदर्शयिषितस्य प्राणस्य सर्वात्मत्वप्रतिपादनार्थमिति न विद्यैकत्वमावहति। सकलभक्तिविषय एव च तत्रापि उद्गीथशब्द इति वैषम्यम्। न च प्राणस्योद्गातृत्वम् असंभवेन हेतुना परित्यज्यते, उद्गीथभाववत् उद्गातृभावस्यापि उपासनार्थत्वेन उपदिश्यमानत्वात्; प्राणवीर्येणैव

च उद्गाता औद्गात्रं करोतीति नास्त्यसंभवः; तथा च तत्रैव श्रावितम्– 'वाचा च ह्येव स प्राणेन चोदगायत्' इति । न च विवक्षितार्थभेदेऽवगम्यमाने वाक्यच्छायानुकारमात्रेण समानार्थत्वमध्यवसातुं युक्तम्; तथा हि––अभ्युदयवाक्ये पशुकामवाक्ये च 'त्रेधा तण्डुलान्विभजेद्ये मध्यमाः स्युस्तानग्नये दात्रे पुरोडाशमष्टाकपालं कुर्यात्' इत्यादिनिर्देशसाम्येऽपि, उपक्रमभेदात् अभ्युदयवाक्ये देवतापनयोऽध्यवसितः, पशुकामवाक्ये तु यागविधिः–तथा इहापि उपक्रमभेदात् विद्याभेदः । परोवरीयस्त्वादिवत्— यथा परमात्मदृष्ट्यध्याससाम्येऽपि, 'आकाशो ह्येवैभ्यो ज्यायानाकाशः परायणम्' 'स एष परोवरीयानुद्गीथः स एषोऽनन्तः' इति परोवरीयस्त्वगुणविशिष्टम् उद्गीथोपासनम् अक्ष्यादित्यादिगतहिरण्यश्मश्रुत्वादिगुणविशिष्टोद्गीथोपासनात् भिन्नम्; न च इतरेतरगुणोपसंहार एकस्यामपि शाखायाम्– तद्वत् शाखान्तरस्थेष्वपि एवंजातीयकेषु उपासनेष्विति ॥

## संज्ञातश्चेत्तदुक्तमस्ति तु तदपि ॥ ८ ॥

अथोच्येत— संज्ञैकत्वात् विद्यैकत्वमत्र न्याय्यम्, उद्गीथविद्येत्युभयत्रापि एका संज्ञेति, तदपि नोपपद्यते; उक्तं ह्येतत्– 'न वा प्रकरणभेदात्परोवरीयस्त्वादिवत्' इति;

तदेव च अत्र न्याय्यतरं श्रुत्यक्षरानुगतं हि; तत्र संज्ञैकत्वं तु श्रुत्यक्षरबाह्यम् उद्गीथशब्दमात्रयोगात् लौकिकैर्व्यवहर्तृभिरुपचर्यते। अस्ति च एतत्संज्ञैकत्वं प्रसिद्धभेदेष्वपि परोवरीयस्त्वाद्युपासनेषु— उद्गीथविद्येति; तथा प्रसिद्धभेदानामपि अग्निहोत्रदर्शपूर्णमासादीनां काठकैकग्रन्थपरिपठितानां काठकसंज्ञैकत्वं दृश्यते, तथेहापि भविष्यति। यत्र तु नास्ति कश्चित् एवंजातीयको भेदहेतुः, तत्र भवतु संज्ञैकत्वात् विद्यैकत्वम्— यथा संवर्गविद्यादिषु॥

## व्याप्तेश्च समञ्जसम्॥ ९॥

'ओमित्येतदक्षरमुद्गीथमुपासीत' इत्यत्र अक्षरोद्गीथशब्दयोः सामानाधिकरण्ये श्रूयमाणे अध्यासापवादैकत्वविशे-
४. व्याप्त्यधि- षणपक्षाणां प्रतिभासनात् कतमोऽत्र पक्षो
करणम्। न्याय्यः स्यादिति विचारः। तत्र अध्यासो नाम——द्वयोर्वस्तुनोः अनिवर्तितायामेव अन्यतरबुद्धौ अन्यतरबुद्धिरध्यस्यते; यस्मिन् इतरबुद्धिरध्यस्यते, अनुवर्तत एव तस्मिन् तद्बुद्धिः, अध्यस्तेतरबुद्धावपि— यथा नाम्नि ब्रह्मबुद्धावध्यस्यमानायामपि अनुवर्तत एव नामबुद्धिः, न ब्रह्मबुद्ध्या निवर्तते— यथा वा प्रतिमादिषु विष्ण्वादिबुद्ध्यध्यासः— एवमिहापि अक्षरे उद्गीथबुद्धिरध्यस्येत, उद्गीथे वा अक्ष-

रबुद्धिरिति । अपवादो नाम— यत्र कस्मिंश्चिद्वस्तुनि पूर्वनिविष्टायां मिथ्याबुद्धौ निश्चितायाम्, पश्चादुपजायमाना यथार्था बुद्धिः पूर्वनिविष्टाया मिथ्याबुद्धेः निवर्तिका भवति —यथा देहेन्द्रियसंघाते आत्मबुद्धिः, आत्मन्येव आत्मबुद्ध्या पश्चाद्भाविन्या 'तत्त्वमसि' इत्यनया यथार्थबुद्ध्या निवर्त्यते— यथा वा दिग्भ्रान्तिबुद्धिः दिग्याथात्म्यबुद्ध्या निवर्त्यते— एवमिहापि अक्षरबुद्ध्या उद्गीथबुद्धिर्निवर्त्येत, उद्गीथबुद्ध्या वा अक्षरबुद्धिरिति । एकत्वं तु अक्षरोद्गीथशब्दयोरनतिरिक्तार्थवृत्तित्वम्— यथा द्विजोत्तमो ब्राह्मणो भूमिदेव इति । विशेषणं पुनः सर्ववेदव्यापिन ओमित्येतस्याक्षरस्य ग्रहणप्रसङ्गे औद्गात्रविशेषस्य समर्पणम्— यथा नीलं यदुत्पलम् तदानयेति, एवमिहापि उद्गीथो य ओंकारः तमुपासीतेति । एवमेतस्मिन्सामानाधिकरण्यवाक्ये विमृश्यमाने, एते पक्षाः प्रतिभान्ति ; तत्रान्यतमनिर्धारणकारणाभावात् अनिर्धारणप्राप्तौ—

इदमुच्यते— व्याप्तेश्च समञ्जसमिति । च-शब्दोऽयं तु-शब्दस्थाननिवेशी पक्षत्रयव्यावर्तनप्रयोजनः । तदिह त्रयः पक्षाः सावद्या इति पर्युदस्यन्ते ; विशेषणपक्ष एवैको निरवद्य इत्युपादीयते । तत्राध्यासे तावत्— या बुद्धिः इतरत्र अ-

ध्यस्यते, तच्छब्दस्य लक्षणावृत्तित्वं प्रसज्येत, तत्फलं च कल्प्येत; श्रूयत एव फलम्, 'आपयिता ह वै कामानां भवति' इत्यादि, इति चेत्–तन्न, तस्य अन्यफलत्वात्; आप्त्यादिदृष्टिफलं हि तत्, नोद्गीथाध्यासफलम्। अपवादेऽपि समानः फलाभावः; मिथ्याज्ञाननिवृत्तिः फलमिति चेत्, न; पुरुषार्थोपयोगानवगमात्; न च कदाचिदपि ओंकारात् ओंकारबुद्धिर्निवर्तेत, उद्गीथाद्वा उद्गीथबुद्धिः; न चेदं वाक्यं वस्तुतत्त्वप्रतिपादनपरम्, उपासनाविधिपरत्वात्। नापि एकत्वपक्षः संगच्छते; निष्प्रयोजनं हि तदा शब्दद्वयोच्चारणं स्यात्, एकेनैव विवक्षितार्थसमर्पणात्। न च हौत्रविषये आध्वर्यवविषये वा अक्षरे ओंकारशब्दवाच्ये उद्गीथशब्दप्रसिद्धिरस्ति, नापि सकलायाम् साम्नो द्वितीयायां भक्तौ उद्गीथशब्दवाच्यायाम् ओंकारशब्दप्रसिद्धिः, येनानतिरिक्तार्थता स्यात्। परिशेषाद्विशेषणपक्षः परिगृह्यते, व्याप्तेः सर्ववेदसाधारण्यात्; सर्वव्याप्यक्षरमिह मा प्रसञ्जि— इत्यत उद्गीथशब्देन अक्षरं विशेष्यते— कथं नाम उद्गीथावयवभूत ओंकारो गृह्येतेति। नन्वस्मिन्नपि पक्षे समाना लक्षणा, उद्गीथशब्दस्य अवयवलक्षणार्थत्वात्; सत्यमेवमेतत्; लक्षणायामपि तु संनिकर्षविप्रकर्षौ भवत एव; अध्यासपक्षे हि

अर्थान्तरबुद्धिरर्थान्तरे निक्षिप्यत इति विप्रकृष्टा लक्षणा, विशेषणपक्षे तु अवयववचनेन शब्देन अवयवः समर्प्यत इति संनिकृष्टा; समुदायेषु हि प्रवृत्ताः शब्दा अवयवेष्वपि वर्तमाना दृष्टाः पटग्रामादिषु। अतश्च व्याप्तेर्हेतोः 'ओमित्येतदक्षरम्' इत्येतस्य 'उद्गीथम्' इत्येतद्विशेषणमिति समञ्जसमेतत्, निरवद्यमित्यर्थः ॥

## सर्वाभेदादन्यत्रेमे ॥ १० ॥

५. सर्वाभेदाधिकरणम्।

वाजिनां छन्दोगानां च प्राणसंवादे श्रैष्ठ्यगुणान्वितस्य प्राणस्य उपास्यत्वमुक्तम्; वागादयोऽपि हि तत्र वसिष्ठत्वादिगुणान्विता उक्ताः; ते च गुणाः प्राणे पुनः प्रत्यर्पिताः—'यद्वा अहं वसिष्ठास्मि त्वं तद्वसिष्ठोऽसि' इत्यादिना। अन्येषामपि तु शाखिनां कौषीतकिप्रभृतीनां प्राणसंवादेषु 'अथातो निःश्रेयसादानमेता ह वै देवता अहंश्रेयसे विवदमानाः' इत्येवंजातीयकेषु प्राणस्य श्रैष्ठ्यमुक्तम्, न त्विमे वसिष्ठत्वादयोऽपि गुणा उक्ताः। तत्र संशयः—किमिमे वसिष्ठत्वादयो गुणाः क्वचिदुक्ता अन्यत्रापि अस्येरन्, उत नास्येरन्निति। तत्र प्राप्तं तावत्— नास्येरन्निति; कुतः? एवं-शब्दसंयोगात्; 'अथो य एवं विद्वान्प्राणे निःश्रेयसं विदित्वा' इति हि तत्र तत्र

एवं-शब्देन वेद्यं वस्तु निवेद्यते ; एवं-शब्दश्च संनिहितावलम्बनः न शाखान्तरपरिपठितम् एवंजातीयकं गुणजातं शक्नोति निवेदयितुम् ; तस्मात् स्वप्रकरणस्थैरेव गुणैर्निराकाङ्क्षत्वमित्येवं प्राप्ते—

प्रत्याह— अस्येरन् इमे गुणाः क्वचिदुक्ता वसिष्ठत्वादयः अन्यत्रापि ; कुतः ? सर्वाभेदात्— सर्वत्रैव तदेव एकं प्राणविज्ञानमभिन्नं प्रत्यभिज्ञायते, प्राणसंवादादिसारूप्यात् ; अभेदे च विज्ञानस्य कथम् इमे गुणाः क्वचिदुक्ता अन्यत्र न अस्येरन् । ननु एवं-शब्दः तत्र तत्र भेदेन एवंजातीयकं गुणजातं वेद्यत्वाय समर्पयतीत्युक्तम् ; अत्रोच्यते— यद्यपि कौषीतकिब्राह्मणगतेन एवं-शब्देन वाजसनेयिब्राह्मणगतं गुणजातम् असंशब्दितम् असंनिहितत्वात् , तथापि तस्मिन्नेव विज्ञाने वाजसनेयिब्राह्मणगतेन एवं-शब्देन तत् संशब्दितमिति—न परशाखागतमपि अभिन्नविज्ञानावबद्धं गुणजातं स्वशाखागताद्विशिष्यते ; न चैवं सति श्रुतहानिः अश्रुतकल्पना वा भवति ; एकस्यामपि हि शाखायां श्रुता गुणाः श्रुता एव सर्वत्र भवन्ति, गुणवतो भेदाभावात् ; न हि देवदत्तः शौर्यादिगुणत्वेन स्वदेशे प्रसिद्धः देशान्तरं गतः तद्देश्यैरविभावितशौर्यादिगुणोऽपि अतद्गुणो भवति ; यथा च तत्र परिचय-

विशेषात् देशान्तरेऽपि देवदत्तगुणा विभाव्यन्ते, एवम् अभियोगविशेषात् शाखान्तरेऽप्युपास्या गुणाः शाखान्तरेऽप्यस्येरन् । तस्मादेकप्रधानसंबद्धा धर्मा एकत्राप्युच्यमानाः सर्वत्रैव उपसंहर्तव्या इति ॥

## आनन्दादयः प्रधानस्य ॥ ११ ॥

ब्रह्मस्वरूपप्रतिपादनपरासु श्रुतिषु आनन्दरूपत्वं विज्ञानघनत्वं सर्वगतत्वं सर्वात्मत्वमित्येवंजातीयका ब्रह्मणो धर्माः

६. आनन्दाद्यधिकरणम् ।

क्वचित् केचित् श्रूयन्ते । तेषु संशयः— किमानन्दादयो ब्रह्मधर्माः यत्र यावन्तः श्रूयन्ते तावन्त एव तत्र प्रतिपत्तव्याः, किं वा सर्वे सर्वत्रेति । तत्र यथाश्रुतिविभागं धर्मप्रतिपत्तौ प्राप्तायाम्, इदमुच्यते— आनन्दादयः प्रधानस्य ब्रह्मणो धर्माः सर्वे सर्वत्र प्रतिपत्तव्याः; कस्मात्? सर्वाभेदादेव— सर्वत्र हि तदेव एकं प्रधानं विशेष्यं ब्रह्म न भिद्यते; तस्मात् सार्वत्रिकत्वं ब्रह्मधर्माणाम्— तेनैव पूर्वाधिकरणोदितेन देवदत्तशौर्यादिनिदर्शनेन ॥

ननु एवं सति प्रियशिरस्त्वादयोऽपि धर्माः सर्वे सर्वत्र संकीर्येरन्; तथा हि तैत्तिरीयके आनन्दमयमात्मानं प्रक्रम्य आम्नायते— 'तस्य प्रियमेव शिरः । मोदो दक्षिणः

पक्षः । प्रमोद उत्तरः पक्षः । आनन्द आत्मा । ब्रह्म पुच्छं प्रतिष्ठा' इति । अत उत्तरं पठति—

## प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे ॥ १२ ॥

प्रियशिरस्त्वादीनां धर्माणां तैत्तिरीयके आम्नातानां नास्ति अन्यत्र प्राप्तिः, यत्कारणम्—प्रियं मोदः प्रमोद आनन्द इत्येते—परस्परापेक्षया भोक्त्रन्तरापेक्षया च उपचितापचितरूपा उपलभ्यन्ते; उपचयापचयौ च सति भेदे संभवतः; निर्भेदं तु ब्रह्म 'एकमेवाद्वितीयम्' इत्यादिश्रुतिभ्यः । न च एते प्रियशिरस्त्वादयो ब्रह्मधर्माः; कोशधर्मास्तु एते इत्युपदिष्टमस्माभिः 'आनन्दमयोऽभ्यासात्' इत्यत्र । अपि च परस्मिन् ब्रह्मणि चित्तावतारोपायमात्रत्वेन एते परिकल्प्यन्ते, न द्रष्टव्यत्वेन; एवमपि सुतरामन्यत्राप्राप्तिः प्रियशिरस्त्वादीनाम् । ब्रह्मधर्मांस्तु एतान्कृत्वा न्यायमात्रमिदम् आचार्येण प्रदर्शितम्— प्रियशिरस्त्वाद्यप्राप्तिरिति; स च न्यायः अन्येषु निश्चितेषु ब्रह्मधर्मेषु उपासनायोपदिश्यमानेषु नेतव्यः— संयद्वामत्वादिषु सत्यकामत्वादिषु च; तेषु हि सत्यपि उपास्यस्य ब्रह्मण एकत्वे, प्रक्रमभेदादुपासनाभेदे सति, न अन्योन्यधर्माणाम् अन्योन्यत्र प्राप्तिः; यथा

च द्वे नार्यौ एकं नृपतिमुपासाते— छत्रेण अन्या चामरेण अन्या— तत्रोपास्यैकत्वेऽपि उपासनभेदो धर्मव्यवस्था च भवति— एवमिहापीति । उपचितापचितगुणत्वं हि सति भेदव्यवहारे सगुणे ब्रह्मण्युपपद्यते, न निर्गुणे परस्मिन्ब्रह्मणि । अतो न सत्यकामत्वादीनां धर्माणां क्वचिच्छ्रुतानां सर्वत्र प्राप्तिरित्यर्थः ॥

## इतरे त्वर्थसामान्यात् ॥ १३ ॥

इतरे तु आनन्दादयो धर्मा ब्रह्मस्वरूपप्रतिपादनायैव उच्यमानाः, अर्थसामान्यात् प्रतिपाद्यस्य ब्रह्मणो धर्मिण एकत्वात्, सर्वे सर्वत्र प्रतीयेरन्निति वैषम्यम्—प्रतिपत्तिमात्रप्रयोजना हि ते इति ॥

## आध्यानाय प्रयोजनाभावात् ॥ १४ ॥

७. आध्यानाधिकरणम् ।

काठके हि पठ्यते— 'इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः । मनसस्तु परा बुद्धिः' इत्यारभ्य 'पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः' इति । तत्र संशयः—किमिमे सर्व एव अर्थादयः ततस्ततः परत्वेन प्रतिपाद्यन्ते, उत पुरुष एव एभ्यः सर्वेभ्यः परः प्रतिपाद्यत इति । तत्र

तावत् सर्वेषामेवैषां परत्वेन प्रतिपादनमिति भवति मतिः; तथा हि श्रूयते—इदमस्मात्परम्, इदमस्मात्परमिति । ननु बहुष्वर्थेषु परत्वेन प्रतिपिपादयिषितेषु वाक्यभेदः स्यात्; नैष दोषः, वाक्यबहुत्वोपपत्तेः; बहून्येव हि एतानि वाक्यानि प्रभवन्ति बहूनर्थान् परत्वोपेतान् प्रतिपादयितुम् । तस्मात् प्रत्येकमेषां परत्वप्रतिपादनमित्येवं प्राप्ते—

ब्रूमः—पुरुष एव हि एभ्यः सर्वेभ्यः परः प्रतिपाद्यत इति युक्तम्, न प्रत्येकमेषां परत्वप्रतिपादनम्; कस्मात्? प्रयोजनाभावात्; न हि इतरेषु परत्वेन प्रतिपन्नेषु किंचित्प्रयोजनं दृश्यते, श्रूयते वा; पुरुषे तु इन्द्रियादिभ्यः परस्मिन् सर्वानर्थव्रातातीते प्रतिपन्ने दृश्यते प्रयोजनम्, मोक्षसिद्धिः; तथा च श्रुतिः—'निचाय्य तन्मृत्युमुखात्प्रमुच्यते' इति । अपि च परप्रतिषेधेन काष्ठाशब्देन च पुरुषविषयमादरं दर्शयन् पुरुषप्रतिपत्त्यर्थैव पूर्वापरप्रवाहोक्तिरिति दर्शयति । आध्यानायेति—आध्यानपूर्वकाय सम्यग्दर्शनायेत्यर्थः; सम्यग्दर्शनार्थमेव हि इह आध्यानमुपदिश्यते, न तु आध्यानमेव स्वप्रधानम् ॥

## आत्मशब्दाच्च ॥ १५ ॥

इतश्च पुरुषप्रतिपत्त्यर्थैव इयमिन्द्रियादिप्रवाहोक्तिः, य-

त्कारणम् 'एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते । दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः' इति प्रकृतं पुरुषम् आत्मेत्याह ; अतश्च अनात्मत्वमितरेषां विवक्षितमिति गम्यते ; तस्यैव च दुर्विज्ञानतां संस्कृतमतिगम्यतां च दर्शयति ; तद्विज्ञानायैव च—'यच्छेद्वाङ्मनसी प्राज्ञः' इति आध्यानं विदधाति । तत व्याख्यातम् 'आनुमानिकमप्येकेषाम्' इत्यत्र । एवम् अनेकप्रकार आशयातिशयः श्रुतेः पुरुषे लक्ष्यते, नेतरेषु । अपि च 'सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्' इत्युक्ते, किं तत् अध्वनः पारं विष्णोः परमं पदमित्यस्यामाकाङ्क्षायाम् इन्द्रियाद्यनुक्रमणात् परमपदप्रतिपत्त्यर्थ एवायम् आम्नाय इत्यवसीयते ॥

## आत्मगृहीतिरितरवदुत्तरात् ॥ १६ ॥

८. आत्मगृहीत्यधिकरणम् ।

ऐतरेयके श्रूयते—'आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किंचन मिषत्स ईक्षत लोकान्नु सृजा इति' 'स इमाँल्लोकानसृजताम्भो मरीचीर्मरमापः' इत्यादि । तत्र संशयः— किं पर एवात्मा इह आत्मशब्देनाभिलप्यते, उत अन्यः कश्चिदिति । किं तावत्प्राप्तम् ? न परमात्मा इह आत्मशब्दाभिलप्यो भवितुमर्हतीति ; कस्मात् ? वाक्यान्वयदर्शनात् । ननु वाक्यान्वयः

सुतरां परमात्मविषयो दृश्यते, प्रागुत्पत्तेः आत्मैकत्वावधारणात्, ईक्षणपूर्वकस्रष्टृत्ववचनाच्च; नेत्युच्यते, लोकसृष्टिवचनात्—परमात्मनि हि स्रष्टरि परिगृह्यमाणे, महाभूतसृष्टिः आदौ वक्तव्या; लोकसृष्टिस्तु इह आदावुच्यते; लोकाश्च महाभूतसंनिवेशविशेषाः; तथा च अम्भःप्रभृतीन् लोकत्वेनैव निर्ब्रवीति— 'अदोऽम्भः परेण दिवम्' इत्यादिना। लोकसृष्टिश्च परमेश्वराधिष्ठितेन अपरेण केनचिदीश्वरेण क्रियत इति श्रुतिस्मृत्योरुपलभ्यते; तथा हि श्रुतिर्भवति— 'आत्मैवेदमग्र आसीत्पुरुषविधः' इत्याद्या; स्मृतिरपि— 'स वै शरीरी प्रथमः स वै पुरुष उच्यते। आदिकर्ता स भूतानां ब्रह्माग्रे समवर्तत' इति; ऐतरेयिणोऽपि 'अथातो रेतसः सृष्टिः प्रजापते रेतो देवाः' इत्यत्र पूर्वस्मिन्प्रकरणे प्रजापतिकर्तृकां विचित्रां सृष्टिमामनन्ति; आत्मशब्दोऽपि तस्मिन्प्रयुज्यमानो दृश्यते— 'आत्मैवेदमग्र आसीत्पुरुषविधः' इत्यत्र। एकत्वावधारणमपि प्रागुत्पत्तेः स्वविकारापेक्षमुपपद्यते; ईक्षणमपि तस्य चेतनत्वाभ्युपगमादुपपन्नम्। अपि च 'ताभ्यो गामानयत्' 'ताभ्योऽश्वमानयत्' 'ताभ्यः पुरुषमानयत्' 'ता अब्रुवन्' इत्येवंजातीयको भूयान् व्यापारविशेषः लौकिकेषु विशेषवत्सु आत्मसु प्रसिद्धः इहानुग-

म्यते । तस्मात् विशेषवानेव कश्चिदिह आत्मा स्यादित्येवं प्राप्ते—

ब्रूमः— पर एव आत्मा इह आत्मशब्देन गृह्यते; इतरवत्— यथा इतरेषु सृष्टिश्रवणेषु 'तस्माद्वा एतस्मादात्मन आकाशः संभूतः' इत्येवमादिषु परस्यात्मनो ग्रहणम्, यथा च इतरस्मिन् लौकिकात्मशब्दप्रयोगे प्रत्यगात्मैव मुख्य आत्मशब्देन गृह्यते— तथा इहापि भवितुमर्हति । यत्र तु 'आत्मैवेदमग्र आसीत्' इत्येवमादौ 'पुरुषविधः' इत्येवमादि विशेषणान्तरं श्रूयते, भवेत् तत्र विशेषवत आत्मनो ग्रहणम्; अत्र पुनः परमात्मग्रहणानुगुणमेव विशेषणमपि उत्तरम् उपलभ्यते—'स ईक्षत लोकान्नु सृजा इति' 'स इमाँल्लोकानसृजत इत्येवमादि; तस्मात् तस्यैव ग्रहणमिति न्याय्यम् ॥

## अन्वयादिति चेत्स्यादवधारणात् ॥ १७ ॥

वाक्यान्वयदर्शनात् न परमात्मग्रहणमिति पुनः यदुक्तम्, तत्परिहर्तव्यमिति—अत्रोच्यते—स्यादवधारणादिति। भवेदुपपन्नं परमात्मनो ग्रहणम्; कस्मात्? अवधारणात्; परमात्मग्रहणे हि प्रागुत्पत्तेरात्मैकत्वावधारणमाञ्जसमवकल्पते; अन्यथा हि अनाञ्जसं तत्परिकल्प्येत । लोकसृष्टिवचनं तु

श्रुत्यन्तरप्रसिद्धमहाभूतसृष्ट्यनन्तरमिति योजयिष्यामि ; यथा 'तत्तेजोऽसृजत' इत्येतत् श्रुत्यन्तरप्रसिद्धवियद्वायुसृष्ट्यनन्तरमिति अयूयुजम्, एवमिहापि; श्रुत्यन्तरप्रसिद्धो हि समानविषयो विशेष: श्रुत्यन्तरेषु उपसंहर्तव्यो भवति। योऽपि अयं व्यापारविशेषानुगमः 'ताभ्यो गामानयत्' इत्येवमादिः, सोऽपि विवक्षितार्थावधारणानुगुण्येनैव ग्रहीतव्यः; न ह्ययं सकलः कथाप्रबन्धो विवक्षित इति शक्यते वक्तुम्, तत्प्रतिपत्तौ पुरुषार्थाभावात्; ब्रह्मात्मत्वं तु इह विवक्षितम्; तथा हि——अम्भःप्रभृतीनां लोकानां लोकपालानां चाग्न्यादीनां सृष्टिं शिष्ट्वा, करणानि करणायतनं च शरीरमुपदिश्य, स एव स्रष्टा 'कथं न्विदं मदृते स्यात्' इति वीक्ष्य, इदं शरीरं प्रविवेशेति दर्शयति—'स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत' इति; पुनश्च 'यदि वाचाभिव्याहृतं यदि प्राणेनाभिप्राणितम्' इत्येवमादिना करणव्यापारविवेचनपूर्वकम् 'अथ कोऽहम्' इति वीक्ष्य, 'स एतमेव पुरुषं ब्रह्म ततममपश्यत्' इति ब्रह्मात्मत्वदर्शनमवधारयति; तथोपरिष्टात्—'एष ब्रह्मैष इन्द्रः' इत्यादिना समस्तं भेदजातं सह महाभूतैरनुक्रम्य, 'सर्वं तत्प्रज्ञानेत्रं प्रज्ञाने प्रतिष्ठितं प्रज्ञानेत्रो लोकः प्रज्ञा प्रतिष्ठा प्रज्ञानं ब्रह्म' इति ब्रह्मात्मत्वदर्श-

नमेव अवधारयति । तस्मात् इह आत्मगृहीतिरित्यनपवादम् ॥

अपरा योजना—**आत्मगृहीतिरितरवदुत्तरात्** । वाजसनेयके 'कतम आत्मेति योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः' इत्यात्मशब्देनोपक्रम्य, तस्यैव सर्वसङ्गविनिर्मुक्तत्वप्रतिपादनेन ब्रह्मात्मतामवधारयति; तथा हि उपसंहरति— 'स वा एष महानज आत्माजरोऽमरोऽमृतोऽभयो ब्रह्म' इति । छान्दोग्ये तु 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' इति अन्तरेणैवात्मशब्दम् उपक्रम्य उदर्के 'स आत्मा तत्त्वमसि' इति तादात्म्यमुपदिशति । तत्र संशयः—तुल्यार्थत्वं किमनयोराम्नानयोः स्यात्, अतुल्यार्थत्वं वेति । अतुल्यार्थत्वमिति तावत् प्राप्तम्, अतुल्यत्वादाम्नानयोः; न हि आम्नानवैषम्ये सति अर्थसाम्यं युक्तं प्रतिपत्तुम्, आम्नानतन्त्रत्वादर्थपरिग्रहस्य; वाजसनेयके च आत्मशब्दोपक्रमात् आत्मतत्त्वोपदेश इति गम्यते; छान्दोग्ये तु उपक्रमविपर्ययात् उपदेशविपर्ययः । ननु छन्दोगानामपि अस्त्युदर्के तादात्म्योपदेश इत्युक्तम्; सत्यमुक्तम्; उपक्रमतन्त्रत्वादुपसंहारस्य, तादात्म्यसंपत्तिः सा—इति मन्यते । तथा प्राप्ते, अभिधीयते—आत्मगृहीतिः 'सदेव सो-

स्येदमग्र आसीत्' इत्यत्र च्छन्दोगानामपि भवितुमर्हति; इतरवत्—यथा 'कतम आत्मा' इत्यत्र वाजसनेयिनामात्मगृहीतिः, तथैव; कस्मात्? उत्तरात् तादात्म्योपदेशात्। **अन्वयादिति चेत्स्यादवधारणात्**—यदुक्तम्, उपक्रमान्वयात् उपक्रमे च आत्मशब्दश्रवणाभावात् न आत्मगृहीतिरिति, तस्य कः परिहार इति चेत्, सोऽभिधीयते—स्यादवधारणादिति। भवेदुपपन्ना इह आत्मगृहीतिः, अवधारणात्; तथा हि—'येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम्' इत्येकविज्ञानेन सर्वविज्ञानमवधार्य, तत्संपिपादयिषया 'सदेव' इत्याह; तच्च आत्मगृहीतौ सत्यां संपद्यते; अन्यथा हि, योऽयं मुख्य आत्मा स न विज्ञात इति, नैव सर्वविज्ञानं संपद्येत। तथा प्रागुत्पत्तेः एकत्वावधारणम्, जीवस्य च आत्मशब्देन परामर्शः, स्वापावस्थायां च तत्स्वभावसंपत्तिकथनम्, परिचोदनापूर्वकं च पुनः पुनः 'तत्त्वमसि' इत्यवधारणम्— इति च सर्वमेतत् तादात्म्यप्रतिपादनायामेव अवकल्पते, न तादात्म्यसंपादनायाम्। न च अत्र उपक्रमतन्त्रत्वोपन्यासो न्याय्यः; न हि उपक्रमे आत्मत्वसंकीर्तनम् अनात्मत्वसंकीर्तनं वा अस्ति; सामान्योपक्रमश्च न वाक्यशेषगतेन विशेषेण

विरुध्यते, विशेषाकाङ्क्षित्वात्सामान्यस्य । सच्छब्दार्थोऽपि च पर्यालोच्यमानः न मुख्यादात्मनोऽन्यः संभवति, अतोऽन्यस्य वस्तुजातस्य आरम्भणशब्दादिभ्योऽनृतत्वोपपत्तेः । आम्नानवैषम्यमपि नावश्यमर्थवैषम्यमावहति, 'आहर पात्रम्' 'पात्रमाहर' इत्येवमादिषु अर्थसाम्येऽपि तद्दर्शनात् । तस्मात् एवंजातीयकेषु वाक्येषु प्रतिपादनप्रकारभेदेऽपि प्रतिपाद्यार्थाभेद इति सिद्धम् ॥

## कार्याख्यानादपूर्वम् ॥ १८ ॥

छन्दोगा वाजसनेयिनश्च प्राणसंवादे श्वादिमर्यादं प्राणस्य अन्नमाम्नाय, तस्यैव आपो वास आमनन्ति; अनन्तरं च
१. कार्याख्याना- छन्दोगा आमनन्ति— 'तस्माद्वा एत-
धिकरणम् । दशिष्यन्तः पुरस्ताच्चोपरिष्टाच्चाद्भिः परि-
दधति' इति; वाजसनेयिनश्चामनन्ति— 'तद्विद्वांसः श्रोत्रिया अशिष्यन्त आचामन्त्यशित्वा चाचामन्त्येतमेव तदनमनग्नं कुर्वन्तो मन्यन्ते' 'तस्मादेवंविदशिष्यन्नाचामेदशित्वा चाचामेदेतमेव तदनमनग्नं कुरुते' इति । तत्र च आचमनम् अनग्नताचिन्तनं च प्राणस्य प्रतीयते; तत्किमुभयमपि विधीयते, उत आचमनमेव, उत अनग्नताचिन्तनमेवेति विचार्यते । किं तावत्प्राप्तम्? उभयमपि विधीयत इति; कुतः?

उभयस्याप्यवगम्यमानत्वात्; उभयमपि च एतत् अपूर्वत्वात् विध्यर्हम्। अथवा आचमनमेव विधीयते; विस्पष्टा हि तस्मिन्विधिविभक्तिः— 'तस्मादेवंविदशिष्यन्नाचामेदशित्वा चाचामेत्' इति; तस्यैव स्तुत्यर्थम् अनग्नतासंकीर्तनमित्येवं प्राप्ते—

ब्रूमः— न आचमनस्य विधेयत्वमुपपद्यते, कार्याख्यानात्—प्राप्तमेव हि इदं कार्यत्वेन आचमनं प्रायत्यार्थं स्मृतिप्रसिद्धम् अन्वाख्यायते। ननु इयं श्रुतिः तस्याः स्मृतेर्मूलं स्यात्; नेत्युच्यते, विषयनानात्वात्; सामान्यविषया हि स्मृतिः पुरुषमात्रसंबद्धं प्रायत्यार्थमाचमनं प्रापयति; श्रुतिस्तु प्राणविद्याप्रकरणपठिता तद्विषयमेव आचमनं विदधती विदध्यात्; न च भिन्नविषययोः श्रुतिस्मृत्योः मूलमूलिभावोऽवकल्पते; न च इयं श्रुतिः प्राणविद्यासंयोगि अपूर्वमाचमनं विधास्यतीति शक्यमाश्रयितुम्, पूर्वस्यैव पुरुषमात्रसंयोगिन आचमनस्य इह प्रत्यभिज्ञायमानत्वात्; अत एव च नोभयविधानम्; उभयविधाने च वाक्यं भिद्येत; तस्मात् प्राप्तमेव अशिशिषतामशितवतां च उभयत आचमनम् अनूद्य, 'एतमेव तदनमनग्नं कुर्वन्तो मन्यन्ते' इति प्राणस्य अनग्नताकरणसंकल्पः अनेन वाक्येन आचमनीयास्वप्सु

प्राणविद्यासंबन्धित्वेन अपूर्वं उपदिश्यते । न च अयमनग्नतावादः आचमनस्तुत्यर्थ इति न्याय्यम्, आचमनस्याविधेयत्वात् । स्वयं च अनग्नतासंकल्पस्य विधेयत्वप्रतीतेः । न च एवं सति एकस्य आचमनस्य उभयार्थता अभ्युपगता भवति—प्रायत्यार्थता परिधानार्थता चेति, क्रियान्तरत्वाभ्युपगमात्— क्रियान्तरमेव हि आचमनं नाम प्रायत्यार्थं पुरुषस्य अभ्युपगम्यते; तदीयासु तु अप्सु वासःसंकल्पनं नाम क्रियान्तरमेव परिधानार्थं प्राणस्य अभ्युपगम्यत इत्यनवद्यम् । अपि च 'यदिदं किंचा श्वभ्य आ कृमिभ्य आ कीटपतंगेभ्यस्तत्तेऽन्नम्' इत्यत्र तावत् न सर्वान्नाभ्यवहारश्चोद्यत इति शक्यं वक्तुम्, अशब्दत्वादशक्यत्वाच्च; सर्वं तु प्राणस्यान्नमिति इयमन्नदृष्टिश्चोद्यते; तत्साहचर्याच्च 'आपो वासः' इत्यत्रापि न अपामाचमनं चोद्यते; प्रसिद्धास्वेव तु आचमनीयास्वप्सु परिधानदृष्टिश्चोद्यत इति युक्तम्; न हि अर्धवैशसं संभवति । अपि च आचामन्तीति वर्तमानापदेशित्वात् नायं शब्दो विधिक्षमः । ननु मन्यन्त इत्यपि समानं वर्तमानापदेशित्वम्; सत्यमेव तत्; अवश्यविधेये तु अन्यतरस्मिन् वासःकार्याख्यानात् अपां वासःसंकल्पनमेव अपूर्वं विधीयते; न आचमनम्; पूर्ववद्धि तत्—इत्युपपादितम् ।

यदप्युक्तम्—विस्पष्टा च आचमने विधिविभक्तिरिति, तदपि पूर्ववत्त्वेनैव आचमनस्य प्रत्युक्तम्; अत एव आचमनस्याविधित्सितत्वात् 'एतमेव तदनमनग्नं कुर्वन्तो मन्यन्ते' इत्यत्रैव काण्वाः पर्यवस्यन्ति, न आमनन्ति 'तस्मादेवंवित्' इत्यादि; तस्मात् माध्यंदिनानामपि पाठे आचमनानुवादेन एवंवित्त्वमेव प्रकृतप्राणवासोवित्त्वं विधीयत इति प्रतिपत्तव्यम्। योऽप्ययमभ्युपगमः— क्वचिदाचमनं विधीयताम्, क्वचिद्वासोविज्ञानमिति—सोऽपि न साधुः, 'आपो वासः' इत्यादिकाया वाक्यप्रवृत्तेः सर्वत्रैकरूप्यात्। तस्मात् वासोविज्ञानमेव इह विधीयते, न आचमनमिति न्याय्यम्॥

## समान एवं चाभेदात्॥ १९॥

वाजसनेयिशाखायाम् अग्निरहस्ये शाण्डिल्यनामाङ्किता विद्या विज्ञाता; तत्र च गुणाः श्रूयन्ते— 'स आत्मानमुपासीत मनोमयं प्राणशरीरं भारूपम्' इत्येवमादयः; तस्यामेव शाखायां बृहदारण्यके पुनः पठ्यते— 'मनोमयोऽयं पुरुषो भाःसत्यस्तस्मिन्नन्तर्हृदये यथा व्रीहिर्वा यवो वा स एष सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति यदिदं किंच' इति। तत्र संशयः— किमियम् एका विद्या अग्निरहस्यबृहदारण्य-

१०. समानाधिकरणम्।

कयोः गुणोपसंहारश्च, उत द्वे इमे विद्ये गुणानुपसंहारश्चेति। किं तावत्प्राप्तम्? विद्याभेदः गुणव्यवस्था चेति; कुतः? पौनरुक्त्यप्रसङ्गात्— भिन्नासु हि शाखासु अध्येतृवेदितृभेदात् पौनरुक्त्यपरिहारमालोक्य विद्यैकत्वमध्यवसाय एकत्रातिरिक्ता गुणा इतरत्रोपसंह्रियन्ते प्राणसंवादादिषु— इत्युक्तम्; एकस्यां पुनः शाखायाम् अध्येतृवेदितृभेदाभावात् अशक्यपरिहारे पौनरुक्त्ये न विप्रकृष्टदेशस्था एका विद्या भवितुमर्हति। न च अत्र एकमाम्नानं विद्याविधानार्थम्, अपरं गुणविधानार्थम्— इति विभागः संभवति; तदा हि अतिरिक्ता एव गुणा इतरत्रेतरत्र च आम्नायेरन्, न समानाः; समाना अपि तु उभयत्राम्नायन्ते मनोमयत्वादयः। तस्मात् नान्योन्यगुणोपसंहार इत्येवं प्राप्ते—

ब्रूमहे— यथा भिन्नासु शाखासु विद्यैकत्वं गुणोपसंहारश्च भवति एवमेकस्यामपि शाखायां भवितुमर्हति, उपास्याभेदात्। तदेव हि ब्रह्म मनोमयत्वादिगुणकम् उभयत्रापि उपास्यम् अभिन्नं प्रत्यभिजानीमः; उपास्यं च रूपं विद्यायाः; न च विद्यमाने रूपाभेदे विद्याभेदमध्यवसातुं शक्नुमः; नापि विद्याभेदे गुणव्यवस्थानम्। ननु पौनरुक्त्यप्रसङ्गात् विद्याभेदोऽध्यवसितः; नेत्युच्यते, अर्थविभागोपपत्तेः— एकं

हि आम्नानं विद्याविधानार्थम्, अपरं गुणविधानार्थम्—इति न किंचिन्नोपपद्यते। ननु एवं सति यदपठितमग्निरहस्ये, तदेव बृहदारण्यके पठितव्यम्—'स एष सर्वस्येशानः' इत्यादि; यत्तु पठितमेव 'मनोमयः' इत्यादि, तन्न पठितव्यम्—नैष दोषः, तद्बलेनैव प्रदेशान्तरपठितविद्याप्रत्यभिज्ञानात्; समानगुणाम्नानेन हि विप्रकृष्टदेशां शाण्डिल्यविद्यां प्रत्यभिज्ञाप्य तस्याम् ईशानत्वादि उपदिश्यते; अन्यथा हि कथं तस्याम् अयं गुणविधिरभिधीयते। अपि च अप्राप्तांशोपदेशेन अर्थवति वाक्ये संजाते, प्राप्तांशपरामर्शस्य नित्यानुवादतयापि उपपद्यमानत्वात् न तद्बलेन प्रत्यभिज्ञा उपेक्षितुं शक्यते। तस्मादत्र समानायामपि शाखायां विद्यैकत्वं गुणोपसंहारश्चेत्युपपन्नम्॥

## संबन्धादेवमन्यत्रापि॥ २०॥

बृहदारण्यके 'सत्यं ब्रह्म' इत्युपक्रम्य, तद्यत्तत्सत्यमसौ स आदित्यो य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणे-

११. संबन्धाधिकरणम्।

ऽक्षन्पुरुषः' इति तस्यैव सत्यस्य ब्रह्मणः अधिदैवतमध्यात्मं च आयतनविशेषमुपदिश्य, व्याहृतिशरीरत्वं च संपाद्य, द्वे उपनिषदावादिश्येते—'तस्योपनिषदहः' इति—अधिदैवतम्, 'तस्योपनिषद-

हम्' इति—अध्यात्मम् । तत्र संशयः—किमविभागेनैव उभे अपि उपनिषदावुभयत्रानुसंधातव्ये, उत विभागेन—एका अधिदैवतम्, एका अध्यात्ममिति । तत्र सूत्रेणैवोपक्रमते—यथा शाण्डिल्यविद्यायां विभागेनाप्यधीतायां गुणोपसंहार उक्तः, एवमन्यत्रापि एवंजातीयके विषये भवितुमर्हति, एकविद्याभिसंबन्धात्—एका हि इयं सत्यविद्या अधिदैवतम् अध्यात्मं च अधीता, उपक्रमाभेदात् व्यतिषक्तपाठाच्च; कथं तस्यामुदितो धर्मः तस्यामेव न स्यात् । यो ह्याचार्ये कश्चिदनुगमनादिराचारश्चोदितः, स ग्रामगतेऽरण्यगते च तुल्यवदेव भवति । तस्मात् उभयोरप्युपनिषदोः उभयत्र प्राप्तिरिति ॥

एवं प्राप्ते, प्रतिविधत्ते—

**न वा विशेषात् ॥ २१ ॥**

नैव उभयोः उभयत्र प्राप्तिः; कस्मात्? विशेषात्, उपासनस्थानविशेषोपनिबन्धादित्यर्थः । कथं स्थानविशेषोपनिबन्ध इति, उच्यते— 'य एष एतस्मिन्मण्डले पुरुषः' इति हि आधिदैविकं पुरुषं प्रकृत्य, 'तस्योपनिषदहः' इति श्रावयति; 'योऽयं दक्षिणेऽक्षन्पुरुषः' इति च आध्यात्मिकं पुरुषं प्रकृत्य, 'तस्योपनिषदहम्' इति; तस्येति च एतत् संनिहि-

तावलम्बनं सर्वनाम; तस्मात् आयतनविशेषव्यपाश्रयेणैव एते उपनिषदावुपदिश्येते; कुत उभयोरुभयत्र प्राप्तिः। ननु एक एवायम् अधिदैवतमध्यात्मं च पुरुषः, एकस्यैव सत्यस्य ब्रह्मण आयतनद्वयप्रतिपादनात्; सत्यमेवमेतत्; एकस्यापि तु अवस्थाविशेषोपादानेनैव उपनिषद्विशेषोपदेशात् तदवस्थस्यैव सा भवितुमर्हति; अस्ति चायं दृष्टान्तः— सत्यपि आचार्यस्वरूपानपाये, यत् आचार्यस्य आसीनस्य अनुवर्तनमुक्तम्, न तत् तिष्ठतो भवति; यच्च तिष्ठत उक्तम्, न तदासीनस्येति। ग्रामारण्ययोस्तु आचार्यस्वरूपानपायात् तत्स्वरूपानुबद्धस्य च धर्मस्य ग्रामारण्यकृतविशेषाभावात् उभयत्र तुल्यवद्भाव इति अदृष्टान्तः सः। तस्मात् व्यवस्था अनयोरुपनिषदोः॥

## दर्शयति च॥ २२॥

अपि च एवंजातीयकानां धर्माणां व्यवस्थेति लिङ्गदर्शनं भवति— 'तस्यैतस्य तदेव रूपं यदमुष्य रूपं यावमुष्य गेष्णौ तौ गेष्णौ यन्नाम तन्नाम' इति। कथमस्य लिङ्गत्वमिति, तदुच्यते— अक्ष्यादित्यस्थानभेदभिन्नान् धर्मान् अन्योन्यस्मिन्ननुपसंहार्यान् पश्यन् इह अतिदेशेन आदित्यपुरुषगतान्रूपादीन् अक्षिपुरुषे उपसंहरति— 'तस्यैतस्य

तदेव रूपम्' इत्यादिना। तस्माद्व्यवतिष्ठेते एव एते उपनिषदाविति निर्णयः॥

## संभृतिद्युव्याप्त्यपि चातः॥ २३॥

'ब्रह्मज्येष्ठा वीर्या संभृतानि ब्रह्माग्रे ज्येष्ठं दिवमाततान' इत्येवं राणायनीयानां खिलेषु वीर्यसंभृतिद्युनिवेशप्रभृतयो

१२. संभृत्यधिकरणम्। ब्रह्मणो विभूतयः पठ्यन्ते; तेषामेव च उपनिषदि शाण्डिल्यविद्याप्रभृतयो ब्रह्मविद्याः पठ्यन्ते; तासु ब्रह्मविद्यासु ता ब्रह्मविभूतय उपसंह्रियेरन्, न वेति विचारणायाम्, ब्रह्मसंबन्धादुपसंहारप्राप्तौ एवं पठति। संभृतिद्युव्याप्तिप्रभृतयो विभूतयः शाण्डिल्यविद्याप्रभृतिषु नोपसंहर्तव्याः, अत एव च आयतनविशेषयोगात्। तथा हि शाण्डिल्यविद्यायां हृदयायतनत्वं ब्रह्मण उक्तम्—'एष म आत्मान्तर्हृदये' इति; तद्वदेव दहरविद्यायामपि—'दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशः' इति; उपकोसलविद्यायां तु अक्ष्यायतनत्वम्—'य एषोऽक्षिणि पुरुषो दृश्यते' इति; एवं तत्र तत्र तत्तत् आध्यात्मिकमायतनम् एतासु विद्यासु प्रतीयते; आधिदैविक्यस्तु एता विभूतयः संभृतिद्युव्याप्तिप्रभृतयः; तासां कुत एतासु प्राप्तिः। नन्वेतास्वपि आधिदैवि-

क्यो विभूतयः श्रूयन्ते—'ज्यायान्दिवो ज्यायानेभ्यो लोकेभ्यः' 'एष उ एव भामनीरेष हि सर्वेषु लोकेषु भाति' 'यावान्वायमाकाशस्तावानेषोऽन्तर्हृदय आकाश उभे अस्मिन्द्यावाप्रृथिवी अन्तरेव समाहिते' इत्येवमाद्याः; सन्ति च अन्या आयतनविशेषहीना अपि इह ब्रह्मविद्याः षोडशकलाद्याः—सत्यमेवमेतत्; तथाप्यत्र विद्यते विशेषः संभृत्याद्यनुपसंहारहेतुः— समानगुणाम्नानेन हि प्रत्युपस्थापितासु विप्रकृष्टदेशास्वपि विद्यासु विप्रकृष्टदेशगुणा उपसंह्रियेरन्निति युक्तम्; संभृत्यादयस्तु शाण्डिल्यादिवाक्यगोचराश्च गुणाः परस्परव्यावृत्तस्वरूपत्वात् न प्रदेशान्तरवर्तिविद्याप्रत्युपस्थापनक्षमाः। न च ब्रह्मसंबन्धमात्रेण प्रदेशान्तरवर्तिविद्याप्रत्युपस्थापनमित्युच्यते, विद्याभेदेऽपि तदुपपत्तेः; एकमपि हि ब्रह्म विभूतिभेदैरनेकधा उपास्यत इति स्थितिः, परोवरीयस्त्वादिवद्भेददर्शनात्। तस्मात् वीर्यसंभृत्यादीनां शाण्डिल्यविद्यादिषु अनुपसंहार इति ॥

## पुरुषविद्यायामिव चेतरेषाम-नाम्नानात् ॥ २४ ॥

अस्ति ताण्डिनां पैङ्गिनां च रहस्यब्राह्मणे पुरुषविद्या; तत्र पुरुषो यज्ञः कल्पितः; तदीयमायुः त्रेधा विभज्य सव-

न्त्रयं कल्पितम्; अशिशिषादीनि च दीक्षादिभावेन क-
१३. पुरुषविद्याधिकरणम् । ल्पितानि; अन्ये च धर्मास्तत्र समधिगता आशीर्मन्त्रप्रयोगादयः। तैत्तिरीयका अपि कंचित् पुरुषयज्ञं कल्पयन्ति—'तस्यैवंविदुषो यज्ञस्यात्मा यजमानः श्रद्धा पत्नी' इत्येतेनानुवाकेन। तत्र संशयः—किमितरत्र उक्ताः पुरुषयज्ञस्य धर्माः तैत्तिरीयकेषु उपसंहर्तव्याः, किं वा नोपसंहर्तव्या इति। पुरुषयज्ञत्वाविशेषात् उपसंहारप्राप्तौ, आचक्ष्महे— नोपसंहर्तव्या इति; कस्मात्? तद्रूपप्रत्यभिज्ञानाभावात्; तदाह्याचार्यः पुरुषविद्यायामिवेति— यथा एकेषां शाखिनां ताण्डिनां पैङ्गिनां च पुरुषविद्यायामाम्नानम्, नैवम् इतरेषां तैत्तिरीयाणामाम्नानमस्ति; तेषां हि इतरविलक्षणमेव यज्ञसंपादनं दृश्यते, पत्नीयजमानवेदिवेदबर्हिर्यूपाज्यपश्वृत्विगाद्यनुक्रमणात्। यदपि सवनसंपादनम्, तदपि इतरविलक्षणमेव—'यत्प्रातर्मध्यंदिनᳲ सायं च तानि' इति। यदपि किंचित्, मरणावभृथत्वादिसामान्यम्, तदपि अल्पीयस्त्वात् भूयसा वैलक्षण्येन अभिभूयमानं न प्रत्यभिज्ञापनक्षमम्। न च तैत्तिरीयके पुरुषस्य यज्ञत्वं श्रूयते; 'विदुषः' 'यज्ञस्य' इति हि न च एते समानाधिकरणे षष्ठ्यौ— विद्वानेव यो यज्ञ-

स्तस्येति; न हि पुरुषस्य मुख्यं यज्ञत्वमस्ति; व्यधिकरणे तु एते षष्ठ्यौ—विदुषो यो यज्ञस्तस्येति; भवति हि पुरुषस्य मुख्यो यज्ञसंबन्धः; सत्यां च गतौ, मुख्य एवार्थ आश्रयितव्यः, न भाक्तः। 'आत्मा यजमानः' इति च यजमानत्वं पुरुषस्य निर्ब्रुवन् वैयधिकरण्येनैव अस्य यज्ञसंबन्धं दर्शयति। अपि च 'तस्यैवंविदुषः' इति सिद्धवदनुवादश्रुतौ सत्याम्, पुरुषस्य यज्ञभावम् आत्मादीनां च यजमानादिभावं प्रतिपित्समानस्य वाक्यभेदः स्यात्। अपि च ससंन्यासामात्मविद्यां पुरस्तादुपदिश्य अनन्तरम् 'तस्यैवंविदुषः' इत्याद्यनुक्रमणं पश्यन्तः—पूर्वशेष एव एष आम्नायः, न स्वतन्त्र इति प्रतीमः; तथा च एकमेव फलमुभयोरप्यनुवाकयोरुपलभामहे—'ब्रह्मणो महिमानमाप्नोति' इति; इतरेषां तु अनन्यशेषः पुरुषविद्याम्नायः; आयुरभिवृद्धिफलो ह्यसौ, 'प्र ह षोडशं वर्षशतं जीवति य एवं वेद' इति समभिव्याहारात्। तस्मात् शाखान्तराधीतानां पुरुषविद्याधर्माणामाशीर्मन्त्रादीनामप्राप्तिः तैत्तिरीयके ॥

## वेधाद्यर्थभेदात् ॥ २५ ॥

अस्त्याथर्वणिकानामुपनिषदारम्भे मन्त्रसमाम्नायः—'सर्वं प्रविध्य हृदयं प्रविध्य धमनीः प्रवृज्य शिरोऽभिप्रवृज्य त्रिधा

विपृक्तः' इत्यादिः; ताण्डिनाम्— 'देव सवितः प्रसुव यज्ञम्' इत्यादिः; शाट्यायनिनाम्— 'श्वेताश्वो हरितनीलोऽसि' इत्यादिः;

१४. वेधाद्यधिकरणम्।

कठानां तैत्तिरीयाणां च— 'शं नो मित्रः शं वरुणः' इत्यादिः; वाजसनेयिनां तु उपनिषदारम्भे प्रवर्ग्यब्राह्मणं पठ्यते— 'देवा ह वै सत्रं निषेदुः' इत्यादि; कौषीतकिनामपि अग्निष्टोमब्राह्मणम्— 'ब्रह्म वा अग्निष्टोमो ब्रह्मैव तदहर्ब्रह्मणैव ते ब्रह्मोपयन्ति तेऽमृतत्वमाप्नुवन्ति य एतदहरुपयन्ति' इति। किमिमे सर्वे प्रविध्यादयो मन्त्राः प्रवर्ग्यादीनि च कर्माणि विद्यासु उपसंह्रियेरन्, किं वा न उपसंह्रियेरन्— इति मीमांसामहे। किं तावत् नः प्रतिभाति? उपसंहार एव एषां विद्यास्विति; कुतः? विद्याप्रधानानामुपनिषद्ग्रन्थानां समीपे पाठात्। ननु एषां विद्यार्थतया विधानं नोपलभामहे— बाढम्, अनुपलभमाना अपि तु अनुमास्यामहे, संनिधिसामर्थ्यात्; न हि संनिधेः अर्थवत्त्वे संभवति, अकस्मादसावनाश्रयितुं युक्तः। ननु नैषां मन्त्राणां विद्याविषयं किंचित्सामर्थ्यं पश्यामः; कथं च प्रवर्ग्यादीनि कर्माणि अन्यार्थत्वेनैव विनियुक्तानि सन्ति विद्यार्थत्वेनापि प्रतिपद्येमहीति—नैष दोषः; सामर्थ्यं तावत् मन्त्राणां विद्या-

विषयमपि किंचित् शक्यं कल्पयितुम, हृदयादिसंकीर्तनात्; हृदयादीनि हि प्रायेण उपासनेषु आयतनादिभावेनोपदिष्टानि; तद्द्वारेण च 'हृदयं प्रविध्य' इत्येवंजातीयकानां मन्त्राणाम् उपपन्नमुपासनाङ्गत्वम्; दृष्टश्च उपासनेष्वपि मन्त्रविनियोगः— 'भूः प्रपद्येऽमुनामुनामुना' इत्येवमादिः; तथा प्रवर्ग्यादीनां कर्मणाम् अन्यत्रापि विनियुक्तानां सताम् अविरुद्धो विद्यासु विनियोगः— वाजपेय इव बृहस्पतिसवस्य— इत्येवं प्राप्ते——

ब्रूमः—— नैषामुपसंहारो विद्यास्विति; कस्मात्? वेधाद्यर्थभेदात्— 'हृदयं प्रविध्य' इत्येवंजातीयकानां हि मन्त्राणां येऽर्था हृदयवेधादयः, भिन्ना: अनभिसंबद्धा: ते उपनिषदुदिताभिर्विद्याभिः; न तेषां ताभिः संगन्तुं सामर्थ्यमस्ति। ननु हृदयस्य उपासनेष्वप्युपयोगात् तद्द्वारक उपासनासंबन्ध उपन्यस्तः—— नेत्युच्यते; हृदयमात्रसंकीर्तनस्य हि एवमुपयोगः कथंचिदुत्प्रेक्ष्येत; न च हृदयमात्रमत्र मन्त्रार्थः; 'हृदयं प्रविध्य धमनीः प्रवृज्य' इत्येवंजातीयको हि न सकलो मन्त्रार्थो विद्याभिरभिसंबध्यते; अभिचारविषयो ह्येषोऽर्थः; तस्मादाभिचारिकेण कर्मणा 'सर्वं प्रविध्य' इत्येतस्य मन्त्रस्याभिसंबन्धः; तथा 'देव सवितः प्रसुव यज्ञम्'

इत्यस्य यज्ञप्रसवलिङ्गत्वात् यज्ञेन कर्मणा अभिसंबन्धः; तद्विशेषसंबन्धस्तु प्रमाणान्तरादनुसर्तव्यः; एवमन्येषामपि मन्त्राणाम्—केषांचित् लिङ्गेन, केषांचिद्वचनेन, केषांचित्प्रमाणान्तरेणेत्येवम्— अर्थान्तरेषु विनियुक्तानाम्, रहस्यपठितानामपि सताम्, न संनिधिमात्रेण विद्याशेषत्वोपपत्तिः; दुर्बलो हि संनिधिः श्रुत्यादिभ्य इत्युक्तं प्रथमे तन्त्रे— 'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्' इत्यत्र। तथा कर्मणामपि प्रवर्ग्यादीनामन्यत्र विनियुक्तानां न विद्याशेषत्वोपपत्तिः; न ह्येषां विद्याभिः सह ऐकार्थ्यं किंचिदस्ति; वाजपेये तु बृहस्पतिसवस्य स्पष्टं विनियोगान्तरम्— 'वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेत' इति; अपि च एकोऽयं प्रवर्ग्यः सकृदुत्पन्नो बलीयसा प्रमाणेन अन्यत्र विनियुक्तः न दुर्बलेन प्रमाणेन अन्यत्रापि विनियोगमर्हति; अगृह्यमाणविशेषत्वे हि प्रमाणयोः एवं स्यात्; न तु बलवदबलवतोः प्रमाणयोरगृह्यमाणविशेषता संभवति, बलवदबलवत्त्वविशेषादेव। तस्मात् एवंजातीयकानां मन्त्राणां कर्मणां वा न संनिधिपाठमात्रेण विद्याशेषत्वमाशङ्कितव्यम्; अरण्यानुवचनादिधर्मसामान्यात्तु संनिधिपाठ इति संतोष्टव्यम् ॥

## हानौ तूपायनशब्दशेषत्वात्कुशाच्छन्दस्तुत्युपगानवत्तदुक्तम् ॥ २६ ॥

अस्ति ताण्डिनां श्रुतिः— 'अश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात्प्रमुच्य धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसंभवामि' इति; तथा आथर्वणिकानाम् — 'तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम्' इति; तथा शाट्यायनिनः पठन्ति— 'तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्याम्' इति; तथैव कौषीतकिनः— 'तत्सुकृतदुष्कृते विधूनुते तस्य प्रिया ज्ञातयः सुकृतमुपयन्त्यप्रिया दुष्कृतम्' इति । तदिह क्वचित् सुकृतदुष्कृतयोर्हानं श्रूयते; क्वचित्तयोरेव विभागेन प्रियैरप्रियैश्चोपायनम्; क्वचित्तु उभयमपि हानमुपायनं च; तद्यत्रोभयं श्रूयते तत्र तावत् न किंचिद्वक्तव्यमस्ति; यत्राप्युपायनमेव श्रूयते, न हानम्, तत्राप्यर्थादेव हानं संनिपतति, अन्यैरात्मीययोः सुकृतदुष्कृतयोरुपेयमानयोः आवश्यकत्वात्तद्धानस्य; यत्र तु हानमेव श्रूयते, नोपायनम्—तत्रोपायनं संनिपतेद्वा, न वेति विचिकित्सायाम्—अश्रवणादसंनिपातः, विद्यान्तरगोचरत्वाच्च शाखान्तरीयस्य श्रवणस्य । अपि च आत्म-

१५. हान्यधिकरणम् ।

कर्तृकं सुकृतदुष्कृतयोर्हानम्; परकर्तृकं तु उपायनम्; तयोरसत्यावश्यकभावे, कथं हानेनोपायनमाक्षिप्येत? तस्मादसंनिपातो हानावुपायनस्येति ॥

अस्यां प्राप्तौ पठति— हानाविति। हानौ तु एतस्यां केवलायामपि श्रूयमाणायाम् उपायनं संनिपतितुमर्हति; तच्छेषत्वात्—हानशब्दशेषो हि उपायनशब्दः समधिगतः कौषीतकिरहस्ये; तस्मादन्यत्र केवलहानश्रवणेऽप्युपायनानुवृत्तिः। यदुक्तम्—अश्रवणात् विद्यान्तरगोचरत्वात् अनावश्यकत्वाच्च असंनिपात इति, तदुच्यते—भवेदेषा व्यवस्थोक्तिः, यद्यनुष्ठेयं किंचिदन्यत्र श्रुतम् अन्यत्र निनीष्येत; न त्विह हानमुपायनं वा अनुष्ठेयत्वेन संकीर्त्यते; विद्यास्तुत्यर्थं तु अनयोः संकीर्तनम्—इत्थं महाभागा विद्या, यत्सामर्थ्यादस्य विदुषः सुकृतदुष्कृते संसारकारणभूते विधूयेते, ते च अस्य सुहृद्दुर्हृत्सु निविशेते इति; स्तुत्यर्थे च अस्मिन्संकीर्तने, हानानन्तरभावित्वेनोपायनस्य, क्वचिच्छ्रुतत्वात् अन्यत्रापि हानश्रुतावुपायनानुवृत्तिं मन्यते—स्तुतिप्रकर्षलाभाय; प्रसिद्धा च अर्थवादान्तरापेक्षा अर्थवादान्तरप्रवृत्तिः—'एकविंशो वा इतोऽसावादित्यः' इत्येवमादिषु; कथं हि इह एकविंशता आदित्यस्याभिधीयेत, अनपेक्ष्यमाणेऽर्थवादान्तरे—'द्वादश मासाः

पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविंशः’ इत्यस्मिन्? तथा ‘त्रिष्टुभौ भवतः सेन्द्रियत्वाय’ इत्येवमादिवादेषु ‘इन्द्रियं वै त्रिष्टुप्’ इत्येवमाद्यर्थवादान्तरापेक्षा दृश्यते। विद्यास्तुत्यर्थत्वाच्च अस्योपायनवादस्य, कथमन्यदीये सुकृतदुष्कृते अन्यैरुपेयेते इति नातीवाभिनिवेष्टव्यम्। उपायनशब्दशेषत्वादिति च शब्दशब्दं समुच्चारयन् स्तुत्यर्थामेव हानावुपायनानुवृत्तिं सूचयति; गुणोपसंहारविवक्षायां हि उपायनार्थस्यैव हानावनुवृत्तिं ब्रूयात्। तस्मात् गुणोपसंहारविचारप्रसङ्गेन स्तुत्युपसंहारप्रदर्शनार्थमिदं सूत्रम्। कुशाच्छन्दस्तुत्युपगानवदिति उपमोपादानम्; तद्यथा— भाल्लविनाम् ‘कुशा वानस्पत्याः स्थ ता मा पात’ इत्येतस्मिन्निगमे कुशानामविशेषेण वनस्पतियोनित्वश्रवणे, शाट्यायनिनाम् ‘औदुम्बराः’ इति विशेषवचनात् औदुम्बर्यः कुशा आश्रीयन्ते; यथा च कचित् देवासुरच्छन्दसामविशेषेण पौर्वापर्यप्रसङ्गे, देवच्छन्दांसि पूर्वाणीति पैङ्ग्याम्नानात्प्रतीयते; यथा च षोडशिस्तोत्रे केषांचित्कालाविशेषप्राप्तौ, ‘समयाध्युषिते सूर्ये’ इत्यार्चश्रुतेः कालविशेषप्रतिपत्तिः; यथैव च अविशेषेणोपगानं केचित्समामनन्ति विशेषेण भाल्लविनः— यथा एतेषु कुशादिषु श्रुत्यन्तरगतविशेषान्वयः, एवं हानावप्युपायनान्वय इत्यर्थः।

श्रुत्यन्तरकृतं हि विशेषं श्रुत्यन्तरेऽनभ्युपगच्छतः सर्वत्रैव विकल्पः स्यात्; स च अन्याय्यः सत्यां गतौ; तदुक्तं द्वादशलक्षण्याम्— 'अपि तु वाक्यशेषत्वादितरपर्युदासः स्यात्प्रतिषेधे विकल्पः स्यात्' इति ॥

अथवा एतास्वेव विधूननश्रुतिषु एतेन सूत्रेण एतच्चिन्तयितव्यम्— किमनेन विधूननवचनेन सुकृतदुष्कृतयोर्हानमभिधीयते, किं वा अर्थान्तरमिति । तत्र च एवं प्रापयितव्यम्— न हानं विधूननमभिधीयते, 'धूञ् कम्पने' इति स्मरणात्, 'दोधूयन्ते ध्वजाग्राणि' इति च वायुना चाल्यमानेषु ध्वजाग्रेषु प्रयोगदर्शनात्; तस्मात् चालनं विधूननमभिधीयते; चालनं तु सुकृतदुष्कृतयोः कंचित्कालं फलप्रतिबन्धनात्— इत्येवं प्रापय्य, प्रतिवक्तव्यम्— हानावेव एष विधूननशब्दो वर्तितुमर्हति, उपायनशब्दशेषत्वात्; न हि परपरिग्रहभूतयोः सुकृतदुष्कृतयोः अप्रहीणयोः परैरुपायनं संभवति; यद्यपि इदं परकीययोः सुकृतदुष्कृतयोः परैरुपायनं न आञ्जसं संभाव्यते, तथापि तत्संकीर्तनात्तावत् तदानुगुण्येन हानमेव विधूननं नामेति निर्णेतुं शक्यते । क्वचिदपि च इदं विधूननसंनिधावुपायनं श्रूयमाणं कुशाच्छन्दस्तुत्युपगानवत् विधूननश्रुत्या सर्वत्रापेक्ष्यमाणं सार्वत्रिकं निर्णय-

कारणं संपद्यते । न च चालनं ध्वजाग्रवत् सुकृतदुष्कृतयोर्मुख्यं संभवति, अद्रव्यत्वात् । अश्वश्च रोमाणि विधून्वानः त्यजन् रजः सहैव तेन रोमाण्यपि जीर्णानि शातयति— 'अश्व इव रोमाणि विधूय पापम्' इति च ब्राह्मणम्; अनेकार्थत्वाभ्युपगमाच्च धातूनां न स्मरणविरोधः । तदुक्तमिति व्याख्यातम् ॥

## सांपराये तर्तव्याभावात्तथा ह्यन्ये ॥ २७ ॥

देवयानेन पथा पर्यङ्कस्थं ब्रह्म अभिप्रस्थितस्य व्यध्वनि सुकृतदुष्कृतयोर्वियोगं कौषीतकिनः पर्यङ्कविद्यायामामनन्ति
१६. सांपराया- —'स एतं देवयानं पन्थानमासाद्याग्नि-
धिकरणम् । लोकमागच्छति' इत्युपक्रम्य, 'स आग-
च्छति विरजां नदीं तां मनसैवात्येति तत्सुकृतदुष्कृते विधूनुते' इति । तत् किं यथाश्रुतं व्यध्वन्येव वियोगवचनं प्रतिपत्तव्यम्, आहोस्वित् आदावेव देहादपसर्पणे— इति विचारणायाम्, श्रुतिप्रामाण्यात् यथाश्रुति प्रतिपत्तिप्रसक्तौ, पठति —सांपराय इति । सांपराये गमन एव देहादपसर्पणे, इदं विद्यासामर्थ्यात्सुकृतदुष्कृतहानं भवति— इति प्रतिजानीते; हेतुं च आचष्टे— तर्तव्याभावादिति; न हि विदुषः संपरेतस्य विद्यया ब्रह्म संप्रेप्सतः अन्तराले सुकृतदुष्कृताभ्यां किं-

चित्प्राप्तव्यमस्ति, यदर्थं कतिचित्क्षणानक्षीणे ते कल्पेयाताम् । विद्याविरुद्धफलत्वाच्च विद्यासामर्थ्येन तयोः क्षयः; स च यदैव विद्या फलाभिमुखी तदैव भवितुमर्हति । तस्मात् प्रागेव सन् अयं सुकृतदुष्कृतक्षयः पश्चात्पठ्यते । तथा हि अन्येऽपि शाखिनः ताण्डिनः शाट्यायनिनश्च प्रागवस्थायामेव सुकृतदुष्कृतहानमामनन्ति—'अश्व इव रोमाणि विधूय पापम्' इति, 'तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्याम्' इति च ॥

## छन्दत उभयाविरोधात् ॥ २८ ॥

यदि च देहादपसृप्तस्य देवयानेन पथा प्रस्थितस्य अर्धपथे सुकृतदुष्कृतक्षयोऽभ्युपगम्येत, ततः पतिते देहे यमनियमविद्याभ्यासात्मकस्य सुकृतदुष्कृतक्षयहेतोः पुरुषयत्नस्य इच्छातोऽनुष्ठानानुपपत्तेः अनुपपत्तिरेव तद्धेतुकस्य सुकृतदुष्कृतक्षयस्य स्यात्; तस्मात् पूर्वमेव साधकावस्थायां छन्दतोऽनुष्ठानं तस्य स्यात्, तत्पूर्वकं च सुकृतदुष्कृतहानम्— इति द्रष्टव्यम्; एवं निमित्तनैमित्तिकयोरुपपत्तिः ताण्डिशाट्यायनिश्रुत्योश्च संगतिरिति ॥

## गतेरर्थवत्त्वमुभयथान्यथा हि विरोधः ॥ २९ ॥

कचित् पुण्यपापापहानसंनिधौ देवयानः पन्थाः श्रूयते, कचिन्न; तत्र संशयः— किं हानावविशेषेणैव देवयानः
१७. गतेरर्थ- पन्थाः संनिपतेत्, उत विभागेन कचित्सं-
वत्त्वाधि- निपतेत् कचिन्नेति। यथा तावत् हानाव-
करणम्। विशेषेणैव उपायनानुवृत्तिरुक्ता एवं देवयानानुवृत्तिरपि भवितुमर्हतीत्यस्यां प्राप्तौ, आचक्ष्महे— गतेः देवयानस्य पथः, अर्थवत्त्वम्, उभयथा विभागेन भवितुमर्हति— कचिदर्थवती गतिः कचिन्नेति; न अविशेषेण। अन्यथा हि अविशेषेणैव एतस्यां गतावङ्गीक्रियमाणायां विरोधः स्यात्— 'पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति' इत्यस्यां श्रुतौ देशान्तरप्रापणी गतिर्विरुध्येत; कथं हि निरञ्जनोऽगन्ता देशान्तरं गच्छेत्; गन्तव्यं च परमं साम्यं न देशान्तरप्राप्त्यायत्तम्— इत्यानर्थक्यमेवात्र गतेर्मन्यामहे॥

## उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत्॥ ३०॥

उपपन्नश्चायम् उभयथाभावः— कचिदर्थवती गतिः कचिन्नेति; तल्लक्षणार्थोपलब्धेः— गतिकारणभूतोऽर्थः पर्यङ्कविद्यादिषु सगुणेषु उपासनेषु उपलभ्यते; तत्र हि पर्यङ्कारोहणम्, पर्यङ्कस्थेन ब्रह्मणा सह संवदनम्, विशिष्टगन्धादि-

प्राप्तिश्च— इत्येवमादि बहुदेशान्तरप्राप्त्यायत्तं फलं श्रूयते; तत्र अर्थवती गतिः; न तु सम्यग्दर्शने तल्लक्षणार्थोपलब्धिरस्ति; न हि आत्मैकत्वदर्शिनामाप्तकामानाम् इहैव दग्धाशेषक्लेश-बीजानाम् आरब्धभोगकर्माशयक्षपणव्यतिरेकेण अपेक्षितव्यं किंचिदस्ति; तत्र अनर्थिका गतिः। लोकवच्च एष विभागो द्रष्टव्यः— यथा लोके ग्रामप्राप्तौ देशान्तरप्रापणः पन्था अपेक्ष्यते, न आरोग्यप्राप्तौ, एवमिहापीति। भूयश्च एनं विभागं चतुर्थाध्याये निपुणतरमुपपादयिष्यामः ॥

## अनियमः सर्वासामविरोधः शब्दानुमानाभ्याम् ॥ ३१ ॥

१८. अनियमाधिकरणम्।

सगुणासु विद्यासु गतिरर्थवती, न निर्गुणायां परमात्म-विद्यायाम्— इत्युक्तम्; सगुणास्वपि विद्यासु कासुचिद्गतिः श्रूयते— यथा पर्यङ्कविद्यायाम् उपकोसलविद्यायां पञ्चाग्निविद्यायां दहरविद्याया-मिति; न अन्यासु—यथा मधुविद्यायां शाण्डिल्यविद्यायां षोडशकलविद्यायां वैश्वानरविद्यायामिति। तत्र संशयः— किं यास्वेषा गतिः श्रूयते, तास्वेव नियम्येत; उत अनियमेन सर्वाभिरेव एवंजातीयकाभिर्विद्याभिरभिसंबध्येतेति। किं तावत्प्राप्तम्? नियम इति; यत्रैव श्रूयते, तत्रैव भवि-

तुमर्हति, प्रकरणस्य नियामकत्वात्; यद्यन्यत्र अश्रूयमाणापि गतिः विद्यान्तरं गच्छेत्, श्रुत्यादीनां प्रामाण्यं हीयेत, सर्वस्य सर्वार्थत्वप्रसङ्गात्। अपि च अर्चिरादिका एकैव गतिः उपकोसलविद्यायां पञ्चाग्निविद्यायां च तुल्यवत्पठ्यते; तत् सर्वार्थत्वेऽनर्थकं पुनर्वचनं स्यात्। तस्मान्नियम इत्येवं प्राप्ते—

पठति—अनियम इति। सर्वासामेव अभ्युदयप्राप्तिफलानां सगुणानां विद्यानाम् अविशेषेण एषा देवयानाख्या गतिर्भवितुमर्हति। ननु अनियमाभ्युपगमे प्रकरणविरोध उक्तः—नैषोऽस्ति विरोधः; शब्दानुमानाभ्यां श्रुतिस्मृतिभ्यामित्यर्थः; तथा हि श्रुतिः—'तद्य इत्थं विदुः' इति पञ्चाग्निविद्यावतां देवयानं पन्थानमवतारयन्ती 'ये चेमेऽरण्ये श्रद्धा तप इत्युपासते' इति विद्यान्तरशीलिनामपि पञ्चाग्निविद्याविद्भिः समानमार्गतां गमयति। कथं पुनरवगम्यते—विद्यान्तरशीलिनामियं गतिरिति? ननु श्रद्धातपःपरायणानामेव स्यात्, तन्मात्रश्रवणात्—नैष दोषः; न हि केवलाभ्यां श्रद्धातपोभ्याम् अन्तरेण विद्याबलम् एषा गतिर्लभ्यते—'विद्यया तदारोहन्ति यत्र कामाः परागताः। न तत्र दक्षिणा यन्ति नाविद्वांसस्तपस्विनः' इति श्रुत्यन्त-

रात्; तस्मात् इह श्रद्धातपोभ्यां विद्यान्तरोपलक्षणम्। वाजसनेयिनस्तु पञ्चाग्निविद्याधिकारेऽधीयते— 'य एवमेतद्विदुर्ये चामी अरण्ये श्रद्धां सत्यमुपासते' इति; तत्र श्रद्धालवो ये सत्यं ब्रह्मोपासते इति व्याख्येयम्, सत्यशब्दस्य ब्रह्मणि असकृत्प्रयुक्तत्वात्। पञ्चाग्निविद्याविदां च इत्थंवित्तयैव उपात्तत्वात्, विद्यान्तरपरायणानामेव एतदुपादानं न्याय्यम्। 'अथ य एतौ पन्थानौ न विदुस्ते कीटाः पतङ्गा यदिदं दन्दशूकम्' इति च मार्गद्वयभ्रष्टानां कष्टामधोगतिं गमयन्ती श्रुतिः देवयानपितृयाणयोरेव एनान् अन्तर्भावयति। तत्रापि विद्याविशेषादेषां देवयानप्रतिपत्तिः। स्मृतिरपि — 'शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते। एकया यात्यनावृत्तिमन्ययावर्तते पुनः' इति। यत्पुनः देवयानस्य पथो द्विराम्नानम् उपकोसलविद्यायां पञ्चाग्निविद्यायां च, तत् उभयत्रापि अनुचिन्तनार्थम्। तस्मादनियमः॥

**यावदधिकारमवस्थितिराधिकारिकाणाम्॥ ३२॥**

विदुषो वर्तमानदेहपातानन्तरं देहान्तरमुत्पद्यते, न वा— इति चिन्त्यते। ननु विद्यायाः साधनभूतायाः संपत्तौ कैव-

ल्यनिर्वृत्तिः स्यात्, न वेति नेयं चिन्ता उपपद्यते; न हि
१९. यावदधिकाराधिकरणम्। पाकसाधनसंपत्तौ, ओदनो भवेत्, न वेति
चिन्ता संभवति; नापि भुञ्जानः तृप्ये-
त्, न वेति चिन्त्यते—उपपन्ना तु इयं चिन्ता, ब्रह्मविदाम-
पि केषांचित् इतिहासपुराणयोर्देहान्तरोत्पत्तिदर्शनात्; तथा
हि—अपान्तरतमा नाम वेदाचार्यः पुराणर्षिः विष्णुनियो-
गात् कलिद्वापरयोः संधौ कृष्णद्वैपायनः संबभूवेति स्मरन्ति;
वसिष्ठश्च ब्रह्मणो मानसः पुत्रः सन् निमिशापादपगतपूर्वदे-
हः पुनर्ब्रह्मादेशान्मित्रावरुणाभ्यां संबभूवेति; भृग्वादीनाम-
पि ब्रह्मण एव मानसपुत्राणां वारुणे यज्ञे पुनरुत्पत्तिः स्मर्य-
ते; सनत्कुमारोऽपि ब्रह्मण एव मानसः पुत्रः स्वयं रुद्राय
वरप्रदानात् स्कन्दत्वेन प्रादुर्बभूव; एवमेव दक्षनारदप्रभृती-
नां भूयसी देहान्तरोत्पत्तिः कथ्यते तेन तेन निमित्तेन स्मृ-
तौ। श्रुतावपि मन्त्रार्थवादयोः प्रायेणोपलभ्यते। ते च के-
चित् पतिते पूर्वदेहे देहान्तरमाददते, केचित्तु स्थित एव त-
स्मिन् योगैश्वर्यवशात् अनेकदेहादानन्यायेन। सर्वे च एते स-
माधिगतसकलवेदार्थाः स्मर्यन्ते। तत् एतेषां देहान्तरोत्पत्ति-
दर्शनात् प्राप्तं ब्रह्मविद्यायाः पाक्षिकं मोक्षहेतुत्वम्, अहेतुत्वं
वेति॥

अत उत्तरमुच्यते—न, तेषाम् अपान्तरतमःप्रभृतीनां वेदप्रवर्तनादिषु लोकस्थितिहेतुष्वधिकारेषु नियुक्तानाम् अधिकारतन्त्रत्वात्स्थितेः। यथासौ भगवान्सविता सहस्रयुगपर्यन्तं जगतोऽधिकारं चरित्वा तदवसाने उदयास्तमयवर्जितं कैवल्यमनुभवति—'अथ तत ऊर्ध्व उदेत्य नैवोदेता नास्तमेतैकल एव मध्ये स्थाता' इति श्रुतेः; यथा च वर्तमाना ब्रह्मविदः आरब्धभोगक्षये कैवल्यमनुभवन्ति—'तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये' इति श्रुतेः—एवम् अपान्तरतमःप्रभृतयोऽपीश्वराः परमेश्वरेण तेषु तेष्वधिकारेषु नियुक्ताः सन्तः सत्यपि सम्यग्दर्शने कैवल्यहेतौ अक्षीणकर्माणो यावदधिकारमवतिष्ठन्ते, तदवसाने च अपवृज्यन्त इत्यविरुद्धम्। सकृत्प्रवृत्तमेव हि ते फलदानाय कर्माशयमतिवाहयन्तः, स्वातन्त्र्येणैव गृहादिव गृहान्तरम् अन्यमन्यं देहं संचरन्तः स्वाधिकारनिर्वर्तनाय, अपरिमुषितस्मृतय एव देहेन्द्रियप्रकृतिवशित्वात् निर्माय देहान् युगपत् क्रमेण वा अधितिष्ठन्ति; न च एते जातिस्मरा इत्युच्यन्ते—स एवैते इति स्मृतिप्रसिद्धेः—यथा हि सुलभा नाम ब्रह्मवादिनी जनकेन विवदितुकामा व्युदस्य स्वं देहम्, जानकं देहमाविश्य, व्युद्य तेन, पश्चात् स्वमेव देहमाविवेश—इति स्मर्यते। यदि हि उपयुक्ते सकृत्प्रवृ-

न्ते कर्मणि कर्मान्तरं देहान्तरारम्भकारणमाविर्भवेत्, ततः अन्यदप्यदग्धबीजं कर्मान्तरं तद्वदेव प्रसज्येतेति ब्रह्मविद्यायाः पाक्षिकं मोक्षहेतुत्वम् अहेतुत्वं वा शङ्क्येत; न तु इयमाशङ्का युक्ता, ज्ञानात्कर्मबीजदाहस्य श्रुतिस्मृतिप्रसिद्धत्वात्। तथा हि श्रुतिः— 'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे' इति, 'स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः' इति चैवमाद्या। स्मृतिरपि— 'यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन। ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा' इति, 'बीजान्यग्न्युपदग्धानि न रोहन्ति यथा पुनः। ज्ञानदग्धैस्तथा क्लेशैर्नात्मा संपद्यते पुनः' इति चैवमाद्या। न च अविद्यादिक्लेशदाहे सति क्लेशबीजस्य कर्माशयस्य एकदेशदाहः एकदेशप्ररोहश्च इत्युपपद्यते; न हि अग्निदग्धस्य शालिबीजस्य एकदेशप्ररोहो दृश्यते; प्रवृत्तफलस्य तु कर्माशयस्य मुक्तेषोरिव वेगक्षयात् निवृत्तिः, 'तस्य तावदेव चिरम्' इति शरीरपातावधिक्षेपकरणात्। तस्मादुपपन्ना यावदधिकारम् आधिकारिकाणामवस्थितिः। न च ज्ञानफलस्य अनैकान्तिकता; तथा च श्रुतिः अविशेषेणैव सर्वेषां ज्ञानान्मोक्षं दर्शयति— 'तद्यो यो देवानां प्रत्यबुध्यत स एव

तद्भवत्तथर्षीणां तथा मनुष्याणाम्' इति । ज्ञानान्तरेषु च ऐश्वर्यादिफलेष्वासक्ताः स्युर्महर्षयः; ते पश्चादैश्वर्यक्षयदर्शनेन निर्विण्णाः परमात्मज्ञाने परिनिष्ठाय कैवल्यं प्रापुरित्युपपद्यते— 'ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे । परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम्' इति स्मरणात् । प्रत्यक्षफलत्वाच्च ज्ञानस्य फलविरहाशङ्कानुपपत्तिः; कर्मफले हि स्वर्गादावनुभवानारूढे स्यादाशङ्का— भवेद्वा न वेति; अनुभवारूढं तु ज्ञानफलम्— 'यत्साक्षादपरोक्षाद्ब्रह्म' इति श्रुतेः, 'तत्त्वमसि' इति सिद्धवदुपदेशात्; न हि 'तत्त्वमसि' इत्यस्य वाक्यस्य अर्थः— तत् त्वं मृतो भविष्यसीति— एवं परिणेतुं शक्यः । 'तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदेऽहं मनुरभवं सूर्यश्च' इति च सम्यग्दर्शनकालमेव तत्फलं सर्वात्मत्वं दर्शयति । तस्मात् ऐकान्तिकी विदुषः कैवल्यसिद्धिः ॥

## अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम् ॥ ३३ ॥

वाजसनेयके श्रूयते— 'एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहम्' इत्यादि;

तथा आथर्वणे श्रूयते— 'अथ परा यया तदक्षरमधिग-
२०. अक्षरध्य-धिकरणम्। म्यते यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णम्' इत्यादि; तथैव अन्यत्रापि विशेषनिराकरणद्वारेण अक्षरं परं ब्रह्म श्राव्यते; तत्र च क्वचित् केचित् अतिरिक्ता विशेषाः प्रतिषिध्यन्ते; तासां विशेषप्रतिषेधबुद्धीनां किं सर्वासां सर्वत्र प्राप्तिः, उत व्यवस्थेति संशये, श्रुतिविभागात् व्यवस्थाप्राप्तौ, उच्यते— अक्षरविषयास्तु विशेषप्रतिषेधबुद्धयः सर्वाः सर्वत्रावरोद्धव्याः, सामान्यतद्भावाभ्याम्— समानो हि सर्वत्र विशेषनिराकरणरूपो ब्रह्मप्रतिपादनप्रकारः; तदेव च सर्वत्र प्रतिपाद्यं ब्रह्म अभिन्नं प्रत्यभिज्ञायते; तत्र किमिति अन्यत्र कृता बुद्धयः अन्यत्र न स्युः। तथा च 'आनन्दादयः प्रधानस्य' इत्यत्र व्याख्यातम्; तत्र विधिरूपाणि विशेषणानि चिन्तितानि, इह प्रतिषेधरूपाणीति विशेषः; प्रपञ्चार्थश्चायं चिन्ताभेदः। औपसदवदिति निदर्शनम्; यथा जामदग्न्येऽहीने पुरोडाशिनीषूपसत्सु चोदितासु, पुरोडाशप्रदानमन्त्राणाम् 'अग्नेर्वेर्होत्रं वेरध्वरम्' इत्येवमादीनाम् उद्गातृवेदोत्पन्नानामपि अध्वर्युभिरभिसंबन्धो भवति, अध्वर्युकर्तृकत्वात्पुरोडाशप्रदानस्य, प्रधानतन्त्रत्वाच्चाङ्गानाम्—एवमिहापि अक्षरत-

न्त्रत्वात् तद्विशेषणानां यत्र क्वचिदप्युत्पन्नानाम् अक्षरेण सर्वत्राभिसंबन्ध इत्यर्थः । तदुक्तं प्रथमे काण्डे—'गुणमुख्यव्यतिक्रमे तदर्थत्वान्मुख्येन वेदसंयोगः' इत्यत्र ॥

## इयदामननात् ॥ ३४ ॥

'द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते। तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति'—इत्यध्यात्माधिकारे मन्त्रमाथर्वणिकाः श्वेताश्वतराश्च पठन्ति; तथा कठाः—'ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्ध्ये । छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेताः' इति । किमत्र विद्यैकत्वम्, उत विद्यानानात्वमिति संशयः । किं तावत्प्राप्तम्? विद्यानानात्वमिति; कुतः? विशेषदर्शनात्—'द्वा सुपर्णा' इत्यत्र हि एकस्य भोक्तृत्वं दृश्यते, एकस्य च अभोक्तृत्वं दृश्यते; 'ऋतं पिबन्तौ' इत्यत्र उभयोरपि भोक्तृत्वमेव दृश्यते; तत् वेद्यरूपं भिद्यमानं विद्यां भिन्द्यादित्येवं प्राप्ते—

२१. इयदधिकरणम् ।

ब्रवीति— विद्यैकत्वमिति; कुतः? यतः उभयोरप्यनयोर्मन्त्रयोः इयत्तापरिच्छिन्नं द्वित्वोपेतं वेद्यं रूपम् अभिन्नम् आमनन्ति । ननु दर्शितो रूपभेदः—नेत्युच्यते; उभा-

वप्येतौ मन्त्रौ जीवद्वितीयमीश्वरं प्रतिपादयतः, नार्थान्तरम् । ‘द्वा सुपर्णा’ इत्यत्र तावत्— ‘अनश्नन्नन्यो अभिचाकशीति’ इत्यशनायाद्यतीतः परमात्मा प्रतिपाद्यते; वाक्यशेषेऽपि च स एव प्रतिपाद्यमानो दृश्यते ‘जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानम्’ इति; ‘ऋतं पिबन्तौ’ इत्यत्र तु जीवे पिबति, अशनायाद्यतीतः परमात्मापि साहचर्यात् छत्रिन्यायेन पिबतीत्युपचर्यते; परमात्मप्रकरणं हि एतत्—‘अन्यत्र धर्मादन्यत्राधर्मात्’ इत्युपक्रमात्; तद्विषय एव च अत्रापि वाक्यशेषो भवति—‘यः सेतुरीजानानामक्षरं ब्रह्म यत्परम्’ इति। ‘गुहां प्रविष्टावात्मानौ हि’ इत्यत्र च एतत्प्रपञ्चितम् । तस्मान्नास्ति वेद्यभेदः; तस्माच्च विद्यैकत्वम् । अपि च त्रिष्वप्येतेषु वेदान्तेषु पौर्वापर्यालोचने परमात्मविद्यैव अवगम्यते; तादात्म्यविवक्षयैव जीवोपादानम्, नार्थान्तरविवक्षया; न च परमात्मविद्यायां भेदाभेदविचारावतारोऽस्तीत्युक्तम् । तस्मात्प्रपञ्चार्थ एव एष प्रयोगः; तस्माच्चाधिकधर्मोपसंहार इति ॥

## अन्तरा भूतग्रामवत्स्वात्मनः ॥ ३५ ॥

‘यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरः’ इत्येवं द्विः उषस्तकहोलप्रश्नयोः नैरन्तर्येण वाजसनेयिनः समामनन्ति ।

तत्र संशयः—विद्यैकत्वं वा स्यात्, विद्यानानात्वं वेति । वि-
२२. अन्तरत्वा- द्यानानात्वमिति तावत्प्राप्तम्, अभ्याससा-
धिकरणम्। मर्थ्यात्; अन्यथा हि अनूनानतिरिक्तार्थे
द्विराम्नानम् अनर्थकमेव स्यात्; तस्मात् यथा अभ्यासा-
त्कर्मभेदः, एवमभ्यासाद्विद्याभेद इत्येवं प्राप्ते, प्रत्याह—
अन्तरा आम्नानाविशेषात् स्वात्मनः विद्यैकत्वमिति ; सर्वा-
न्तरो हि स्वात्मा उभयत्राप्यविशिष्टः पृच्छ्यते, प्रत्यु-
च्यते च; न हि द्वावात्मानौ एकस्मिन्देहे सर्वान्तरौ सं-
भवतः; तदा हि एकस्य आञ्जसं सर्वान्तरत्वमवकल्पेत,
एकस्य तु भूतग्रामवत् नैव सर्वान्तरत्वं स्यात् ; यथा च
पञ्चभूतसमूहे देहे— पृथिव्या आपोऽन्तराः, अद्भ्यस्तेजो-
ऽन्तरमिति— सत्यप्यापेक्षिकेऽन्तरत्वे, नैव मुख्यं सर्वा-
न्तरत्वं भवति, तथेहापीत्यर्थः । अथवा भूतग्रामवदिति
श्रुत्यन्तरं निदर्शयति; यथा— 'एको देवः सर्वभूतेषु गूढः
सर्वव्यापी सर्वभूतान्तरात्मा' इत्यस्मिन्मन्त्रे समस्तेषु भूत-
ग्रामेष्वेक एव सर्वान्तर आत्मा आम्नायते— एवमनयोरपि
ब्राह्मणयोरित्यर्थः । तस्मात् वेद्यैक्यात् विद्यैकत्वमिति ॥

## अन्यथा भेदानुपपत्तिरिति चेन्नो-
## पदेशान्तरवत् ॥ ३६ ॥

अथ यदुक्तम्— अनभ्युपगम्यमाने विद्याभेदे आम्नानभेदानुपपत्तिरिति, तत्परिहर्तव्यम्; अत्रोच्यते— नायं दोषः; उपदेशान्तरवदुपपत्तेः; यथा ताण्डिनामुपनिषदि षष्ठे प्रपाठके— 'स आत्मा तत्त्वमसि श्वेतकेतो' इति नवकृत्वोऽप्युपदेशे न विद्याभेदो भवति, एवमिहापि भविष्यति। कथं च नवकृत्वोऽप्युपदेशे विद्याभेदो न भवति? उपक्रमोपसंहाराभ्यामेकार्थतावगमात्— 'भूय एव मा भगवान्विज्ञापयतु' इति च एकस्यैवार्थस्य पुनः पुनः प्रतिपिपादयिषितत्वेन उपक्षेपात् आशङ्कान्तरनिराकरणेन च असकृदुपदेशोपपत्तेः। एवमिहापि प्रश्नरूपाभेदात्, 'अतोऽन्यदार्तम्' इति च परिसमाप्त्यविशेषात् उपक्रमोपसंहारौ तावदेकार्थविषयौ दृश्येते; 'यदेव साक्षादपरोक्षाद्ब्रह्म' इति द्वितीये प्रश्ने एवकारं प्रयुञ्जानः पूर्वप्रश्नगतमेवार्थम् उत्तरत्रानुकृष्यमाणं दर्शयति; पूर्वस्मिंश्च ब्राह्मणे कार्यकरणव्यतिरिक्तस्य आत्मनः सद्भावः कथ्यते; उत्तरस्मिंस्तु तस्यैव अशनायादिसंसारधर्मातीतत्वं विशेषः कथ्यते—इत्येकार्थतोपपत्तिः। तस्मात् एका विद्येति ॥

## व्यतिहारो विशिंषन्ति हीतरवत् ॥ ३७ ॥

यथा—'त्वंवाऽहं सोऽसौ योऽसौ सोऽहम्' इत्यादित्य-

पुरुषं प्रकृत्यैतरेयिणः समामनन्ति, तथा जाबालाः—'त्वं
२३. व्यतिहारा- वा अहमस्मि भगवो देवतेऽहं वै त्वमसि'
धिकरणम् । इति । तत्र संशयः—किमिह व्यतिहा-
रेण उभयरूपा मतिः कर्तव्या, उत एकरूपैवेति । एकरू-
पैवेति तावदाह; न हि अत्र आत्मन ईश्वरेणैकत्वं मुक्त्वा
अन्यत्किंचिच्चिन्तयितव्यमस्ति; यदि चैवं चिन्तयितव्यवि-
शेषः परिकल्प्येत, संसारिणश्च ईश्वरात्मत्वम्, ईश्वरस्य
संसार्यात्मत्वमिति—तत्र संसारिणस्तावदीश्वरात्मत्वे उ-
त्कर्षो भवेत्; ईश्वरस्य तु संसार्यात्मत्वे निकर्षः कृतः
स्यात् । तस्मात् ऐकरूप्यमेव मतेः । व्यतिहाराम्नायस्तु
एकत्वदृढीकारार्थः इत्येवं प्राप्ते, प्रत्याह—व्यतिहारोऽयम्
आध्यानायाम्नायते; इतरवत्—यथा इतरे गुणाः सर्वात्म-
त्वप्रभृतयः आध्यानाय आम्नायन्ते, तद्वत् । तथा हि विशिं-
षन्ति समाम्नातारः उभयोच्चारणेन—'त्वमहमस्म्यहं च
त्वमसि' इति; तच्च उभयरूपायां मतौ कर्तव्यायाम् अर्थ-
वद्भवति; अन्यथा हि इदं विशेषेणोभयाम्नानम् अनर्थकं
स्यात्, एकेनैव कृतत्वात् । ननु उभयाम्नानस्य अर्थविशेषे
परिकल्प्यमाने देवतायाः संसार्यात्मत्वापत्तेः निकर्षः प्रस-
ज्येतेत्युक्तम्—नैष दोषः; ऐकात्म्यस्यैव अनेन प्रकारेणा-

नुचिन्त्यमानत्वात् । ननु एवं सति स एव एकत्वदृढीकार आपद्येत—न वयमेकत्वदृढीकारं वारयामः; किं तर्हि, व्यतिहारेण इह द्विरूपा मतिः कर्तव्या वचनप्रामाण्यात्, नैकरूपेत्येतावत् उपपादयामः; फलतस्तु एकत्वमपि दृढीभवति । यथा आध्यानार्थेऽपि सत्यकामादिगुणोपदेशे तद्गुण ईश्वरः प्रसिध्यति, तद्वत् । तस्मादयमाध्यातव्यो व्यतिहारः समाने च विषये उपसंहर्तव्यो भवतीति ॥

## सैव हि सत्यादयः ॥ ३८ ॥

२४. सत्याद्यधिकरणम् ।

'स यो हैतं महद्यक्षं प्रथमजं वेद सत्यं ब्रह्म' इत्यादिना वाजसनेयके सत्यविद्यां सनामाक्षरोपासनां विधाय, अनन्तरमाम्नायते— 'तद्यत्तत्सत्यमसौ स आदित्यो य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन्पुरुषः' इत्यादि । तत्र संशयः— किं द्वे एते सत्यविद्ये, किं वा एकैवेति । द्वे इति तावत्प्राप्तम्; भेदेन हि फलसंयोगो भवति— 'जयतीमाँल्लोकान्' इति पुरस्तात्, 'हन्ति पाप्मानं जहाति च' इत्युपरिष्टात् । प्रकृताकर्षणं तु उपास्यैकत्वादित्येवं प्राप्ते—

ब्रूमः— एकैवेयं सत्यविद्येति; कुतः? 'तद्यत्तत्सत्यम्' इति प्रकृताकर्षणात् । ननु विद्याभेदेऽपि प्रकृताकर्षणम् उपा-

स्यैकत्वादुपपद्यत इत्युक्तम्— नैतदेवम्; यत्र तु विस्पष्टात् कारणान्तरात् विद्याभेदः प्रतीयते, तत्र एतदेवं स्यात्; अत्र तु उभयथा संभवे 'तद्यत्तत्सत्यम्' इति प्रकृताकर्षणात् पूर्वविद्यासंबद्धमेव सत्यम् उत्तरत्र आकृष्यत इति एकविद्यात्वनिश्चयः। यत्पुनरुक्तम्— फलान्तरश्रवणाद्विद्यान्तरमिति, अत्रोच्यते—— 'तस्योपनिषदहः...अहम्' इति च अङ्गान्तरोपदेशस्य स्तावकमिदं फलान्तरश्रवणमित्यदोषः। अपि च अर्थवादादेव फले कल्पयितव्ये सति, विद्यैकत्वे च अवयवेषु श्रूयमाणानि बहून्यपि फलानि अवयविन्यामेव विद्यायाम् उपसंहर्तव्यानि भवन्ति; तस्मात्सैवेयम् एका सत्यविद्या तेन तेन विशेषेणोपेता आम्नाता— इत्यतः सर्व एव सत्यादयो गुणा एकस्मिन्प्रयोगे उपसंहर्तव्याः॥

केचित्पुनरस्मिन्सूत्रे इदं च वाजसनेयकमक्ष्यादित्यपुरुषविषयं वाक्यम्, छान्दोग्ये च 'अथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते' 'य एषोऽक्षिणि पुरुषो दृश्यते' इति—उदाहृत्य, सैवेयम् अक्ष्यादित्यपुरुषविषया विद्या उभयत्र एकैवेति कृत्वा, सत्यादीन्गुणान् वाजसनेयिभ्यश्छन्दोगानामुपसंहार्यान् मन्यन्ते। तन्न साधु लक्ष्यते; छान्दोग्ये हि कर्मसंबन्धिनी उद्गीथव्यपाश्रया विद्या विज्ञायते; तत्र हि

आदिमध्यावसानेषु कर्मसंबन्धिचिह्नानि भवन्ति—'इयमेवर्गग्निः साम' इत्युपक्रमे, 'तस्यर्क्च साम च गेष्णौ तस्मादुद्गीथः' इति मध्ये, 'य एवं विद्वान्साम गायति' इत्युपसंहारे । नैवं वाजसनेयके किंचित् कर्मसंबन्धि चिह्नम् अस्ति; तत्र प्रक्रमभेदात् विद्याभेदे सति गुणव्यवस्थैव युक्तेति ॥

## कामादीतरत्र तत्र चायतनादिभ्यः ॥ ३९ ॥

'अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशः' इति प्रस्तुत्य, छन्दोगा अधीयते——

२५. कामाद्यधिकरणम् ।

'एष आत्मापहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्पः' इत्यादि; तथा वाजसनेयिनः—— 'स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते सर्वस्य वशी' इत्यादि । तत्र विद्यैकत्वं परस्परगुणयोगश्च, किं वा नेति संशये—विद्यैकत्वमिति । तत्रेदमुच्यते— कामादीति, सत्यकामादीत्यर्थः— यथा देवदत्तो दत्तः, सत्यभामा भामेति । यदेतत् छान्दोग्ये हृदयाकाशस्य सत्यकामत्वादिगुणजातमुपलभ्यते, तदितरत्र वाजसनेयके 'स वा एष महानज आत्मा' इत्यत्र संबध्येत; यच्च वाजसनेयके वशित्वादि

उपलभ्यते, तदपि इतरत्र छान्दोग्ये 'एष आत्मापहतपाप्मा' इत्यत्र संबध्येत; कुतः? आयतनादिसामान्यात्; समानं हि उभयत्रापि हृदयमायतनम्, समानश्च वेद्य ईश्वरः, समानं च तस्य सेतुत्वं लोकासंभेदप्रयोजनम्— इत्येवमादि बहुसामान्यं दृश्यते। ननु विशेषोऽपि दृश्यते— छान्दोग्ये हृदयाकाशस्य गुणयोगः, वाजसनेयके तु आकाशाश्रयस्य ब्रह्मण इति—न, 'दहर उत्तरेभ्यः' इत्यत्र च्छान्दोग्येऽपि आकाशशब्दं ब्रह्मैवेति प्रतिष्ठापितत्वात्। अयं तु अत्र विद्यते विशेषः— सगुणा हि ब्रह्मविद्या छान्दोग्ये उपदिश्यते—'अथ य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान्कामान्' इत्यात्मवत् कामानामपि वेद्यत्वश्रवणात्, वाजसनेयके तु निर्गुणमेव ब्रह्म उपदिश्यमानं दृश्यते— 'अथ उर्ध्वं विमोक्षाय ब्रूहि' 'असङ्गो ह्ययं पुरुषः' इत्यादिप्रश्नप्रतिवचनसमन्वयात्। वशित्वादि तु स्तुत्यर्थमेव गुणजातं वाजसनेयके संकीर्त्यते; तथा च उपरिष्टात् 'स एष नेति नेत्यात्मा' इत्यादिना निर्गुणमेव ब्रह्म उपसंहरति। गुणवतस्तु ब्रह्मण एकत्वात् विभूतिप्रदर्शनाय अयं गुणोपसंहारः सूत्रितः, नोपासनाय— इति द्रष्टव्यम्॥

## आदरादलोपः॥ ४०॥

छान्दोग्ये वैश्वानरविद्यां प्रकृत्य श्रूयते— 'तद्यद्भक्तं प्रथममागच्छेत्तद्धोमीयं स यां प्रथमामाहुतिं जुहुयात्तां
२६. आदरा- जुहुयात्प्राणाय स्वाहा' इत्यादि; तत्र
धिकरणम्। पञ्च प्राणाहुतयो विहिताः; तासु च परस्तादग्निहोत्रशब्दः प्रयुक्तः 'य एतदेवं विद्वानग्निहोत्रं जुहोति' इति, 'यथेह क्षुधिता बाला मातरं पर्युपासते। एवं सर्वाणि भूतान्यग्निहोत्रमुपासते' इति च। तत्रेदं विचार्यते— किं भोजनलोपे लोपः प्राणाग्निहोत्रस्य, उत अलोप इति। 'तद्यद्भक्तम्' इति भक्तागमनसंयोगश्रवणात्, भक्तागमनस्य च भोजनार्थत्वात्, भोजनलोपे लोपः प्राणाग्निहोत्रस्येत्येवं प्राप्ते, न लुप्येतेति तावदाह; कस्मात्? आदरात्; तथा हि वैश्वानरविद्यायामेव जाबालानां श्रुतिः— 'पूर्वोऽतिथिभ्योऽश्नीयात्। यथा ह वै स्वयमहुत्वाग्निहोत्रं परस्य जुहुयादेवं तत्' इति अतिथिभोजनस्य प्राथम्यं निन्दित्वा, स्वामिभोजनं प्रथमं प्रापयन्ती प्राणाग्निहोत्रे आदरं करोति; या हि न प्राथम्यलोपं सहते, नतरां सा प्राथम्यवतोऽग्निहोत्रस्य लोपं सहेतेति मन्यते। ननु भोजनार्थभक्तागमनसंयोगाद्भोजनलोपे लोपः प्रापितः— न, तस्य द्रव्यविशेषविधानार्थत्वात्; प्रा-

कृते हि अग्निहोत्रे पयःप्रभृतीनां द्रव्याणां नियत-त्वात् इहापि अग्निहोत्रशब्दात् कौण्डपायिनामयनवत् तद्धर्मप्राप्तौ सत्याम्, भक्तद्रव्यतागुणविशेषविधानार्थम् इदं वाक्यम् 'तद्यद्भक्तम्' इति; अतो गुणलोपे न मुख्यस्येत्येवं प्राप्तम्; भोजनलोपेऽपि अद्भिर्वा अन्येन वा द्रव्येणाविरुद्धेन प्रतिनिधानन्यायेन प्राणाग्निहोत्रस्यानुष्ठानमिति ॥

अत उत्तरं पठति—

## उपस्थितेऽतस्तद्वचनात् ॥ ४१ ॥

उपस्थिते भोजने अतः तस्मादेव भोजनद्रव्यात् प्रथमो-पनिपतितात् प्राणाग्निहोत्रं निर्वर्तयितव्यम्; कस्मात्? तद्व-चनात्; तथा हि—'तद्यद्भक्तं प्रथममागच्छेत्तद्धोमीयम्' इति सिद्धवद्भक्तोपनिपातपरामर्शेन परार्थद्रव्यसाध्यतां प्राणा-हुतीनां विदधाति । ताः अप्रयोजकलक्षणापन्नाः सत्यः, कथं भोजनलोपे द्रव्यान्तरं प्रतिनिधापयेयुः । न च अत्र प्राकृता-ग्निहोत्रधर्मप्राप्तिरस्ति; कुण्डपायिनामयने हि 'मासमग्निहोत्रं जुहोति' इति विध्युद्देशगतोऽग्निहोत्रशब्दः तद्वद्भावं विधाप-येदिति युक्ता तद्धर्मप्राप्तिः; इह पुनः अर्थवादगतोऽग्निहोत्र-शब्दः न तद्वद्भावं विधापयितुमर्हति; तद्धर्मप्राप्तौ च अभ्युपगम्यमानायाम्, अग्न्युद्धरणादयोऽपि प्राप्येरन्; न

च अस्ति संभवः; अग्न्युद्धरणं तावत् होमाधिकरणभावाय ; न च अयम् अग्नौ होमः, भोजनार्थताव्याघातप्रसङ्गात् ; भोजनार्थोपनीतद्रव्यसंबन्धाच्च आस्य एव एष होमः ; तथा च जाबालश्रुतिः 'पूर्वोऽतिथिभ्योऽश्नीयात्' इति आस्याधारामेव इमां होमनिर्वृत्तिं दर्शयति; अत एव च इहापि सांपादिकान्येवाग्निहोत्राङ्गानि दर्शयति—'उर एव वेदिर्लोमानि बर्हिर्हृदयं गार्हपत्यो मनोऽन्वाहार्यपचन आस्यमाहवनीयः' इति ; वेदिश्रुतिश्चात्र स्थण्डिलमात्रोपलक्षणार्था द्रष्टव्या, मुख्याग्निहोत्रे वेद्यभावात् , तदङ्गानां च इह संपिपादयिषितत्वात् ; भोजनेनैव च कृतकालेन संयोगात् न अग्निहोत्रकालावरोधसंभवः; एवमन्येऽपि उपस्थानादयो धर्माः केचित्कथंचित् विरुध्यन्ते । तस्माद्भोजनपक्ष एव एते मन्त्रद्रव्यदेवतासंयोगात् पञ्च होमा निर्वर्तयितव्याः । यत्तु आदरदर्शनवचनम् , तत् भोजनपक्षे प्राथम्यविधानार्थम् ; न ह्यस्ति वचनस्य अतिभारः; न तु अनेन अस्य नित्यता शक्यते दर्शयितुम् । तस्मात् भोजनलोपे लोप एव प्राणाग्निहोत्रस्येति ॥

**तन्निर्धारणानियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धः फलम् ॥ ४२ ॥**

सन्ति कर्माङ्गव्यपाश्रयाणि विज्ञानानि— 'ओमित्येत-
दक्षरमुद्गीथमुपासीत' इत्येवमादीनि । किं तानि नित्यान्येव
२७. तन्निर्धारणा- स्युः कर्मसु, पर्णमयीत्वादिवत्; उत अनि-
धिकरणम्। त्यानि, गोदोहनादिवदिति विचारयामः ।
किं तावत्प्राप्तम्? नित्यानीति; कुतः? प्रयोगवचनपरि-
ग्रहात्— अनारभ्याधीतान्यपि हि एतानि उद्गीथादिद्वा-
रेण क्रतुसंबन्धात् क्रतुप्रयोगवचनेनैव अङ्गान्तरवत् संस्पृ-
श्यन्ते; यत्तु एषां स्ववाक्येषु फलश्रवणम् — 'आपयिता
ह वै कामानां भवति' इत्यादि, तद्वर्तमानापदेशरूपत्वाद-
र्थवादमात्रमेव, अपापश्लोकश्रवणादिवत्, न फलप्रधानम्;
तस्मात् यथा 'यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं
शृणोति' इत्येवमादीनाम् अप्रकरणपठितानामपि जुह्वादि-
द्वारेण क्रतुप्रवेशात् प्रकरणपठितवत् नित्यता, एवमुद्गीथाद्यु-
पासनानामपीत्येवं प्राप्ते—

ब्रूमः—तन्निर्धारणानियम इति । यान्येतानि उद्गीथादि-
कर्मगुणयाथात्म्यनिर्धारणानि—रसतमः, आप्तिः, समृद्धिः,
मुख्यप्राणः, आदित्यः—इत्येवमादीनि, नैतानि नित्यवत् कर्म-
सु नियम्येरन्; कुतः? तद्दृष्टेः; तथा हि अनित्यत्वमेवंजातीय-
कानां दर्शयति श्रुतिः—'तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च

न वेद' इत्यविदुषोऽपि क्रियाभ्यनुज्ञानात्; प्रस्तावादिदेवताविज्ञानविहीनानामपि प्रस्तोत्रादीनां याजनाध्यवसानदर्शनात्—'प्रस्तोतर्या देवता प्रस्तावमन्वायत्ता तां चेदविद्वान्प्रस्तोष्यसि' 'तां चेदविद्वानुद्गास्यसि' 'तां चेदविद्वान्प्रतिहरिष्यसि' इति च। अपि च एवंजातीयकस्य कर्मव्यपाश्रयस्य विज्ञानस्य पृथगेव कर्मणः फलम् उपलभ्यते—कर्मफलसिद्ध्यप्रतिबन्धः तत्समृद्धिः अतिशयविशेषः कश्चित्—'तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेद। नाना तु विद्या चाविद्या च यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति' इति; तत्र 'नाना तु' इति विद्वदविद्वत्प्रयोगयोः पृथक्करणात्, 'वीर्यवत्तरम्' इति च तरप्प्रत्ययप्रयोगात् विद्याहीनमपि वीर्यवदिति गम्यते; तच्च अनित्यत्वे विद्याया उपपद्यते; नित्यत्वे तु कथं तद्विहीनं कर्म वीर्यवदित्यनुज्ञायेत; सर्वाङ्गोपसंहारे हि वीर्यवत्कर्मेति स्थितिः। तथा लोकसामादिषु प्रतिनियतानि प्रत्युपासनं फलानि शिष्यन्ते—'कल्पन्ते हास्मै लोका ऊर्ध्वाश्चावृत्ताश्च' इत्येवमादीनि। न चेदं फलश्रवणम् अर्थवादमात्रं युक्तं प्रतिपत्तुम्; तथा हि गुणवाद आपद्येत; फलोपदेशे तु मुख्यवादोपपत्तिः; प्रयाजादिषु तु इतिकर्तव्यताकाङ्क्षस्य क्रतोः

प्रकृतत्वात् तादर्थ्ये सति युक्तं फलश्रुतेरर्थवादत्वम् । तथा अनारभ्याधीतेष्वपि पर्णमयीत्वादिषु—न हि पर्णमयीत्वादीनामक्रियात्मकानाम् आश्रयमन्तरेण फलसंबन्धोऽवकल्पते ; गोदोहनादीनां हि प्रकृताप्प्रणयनाद्याश्रयलाभादुपपन्नः फलविधिः ; तथा बैल्वादीनामपि प्रकृतयूपाद्याश्रयलाभादुपपन्नः फलविधिः ; न तु पर्णमयीत्वादिषु एवंविधः कश्चिदाश्रयः प्रकृतोऽस्ति ; वाक्येनैव तु जुह्वाद्याश्रयतां विवक्षित्वा फलेऽपि विधिं विवक्षतो वाक्यभेदः स्यात् । उपासनानां तु क्रियात्मकत्वात् विशिष्टविधानोपपत्तेः उद्गीथाद्याश्रयाणां फले विधानं न विरुध्यते । तस्मात् यथा क्रत्वाश्रयाण्यपि गोदोहनादीनि फलसंयोगादनित्यानि, एवमुद्गीथाद्युपासनान्यपि इति द्रष्टव्यम् । अत एव च कल्पसूत्रकारा नैवंजातीयकान्युपासनानि क्रतुषु कल्पयांचक्रुः ॥

## प्रदानवदेव तदुक्तम् ॥ ४३ ॥

वाजसनेयके 'वदिष्याम्येवाहमिति वाग्दध्रे' इत्यत्र अध्यात्मं वागादीनां प्राणः श्रेष्ठोऽवधारितः, अधिदैवतमग्न्यादीनां वायुः ; तथा छान्दोग्ये 'वायुर्वाव संवर्गः' इत्यत्र अधिदैवतम् अग्न्यादीनां वायुः संवर्गोऽवधारितः, प्राणो वाव संवर्गः' इत्यत्र

२८. प्रदानाधिकरणम् ।

अध्यात्मं वागादीनां प्राणः । तत्र संशयः—किं पृथगेवेमौ वायुप्राणावुपगन्तव्यौ स्याताम्, उत अपृथगिति । अपृथगिति तावत्प्राप्तम्, तत्त्वाभेदात्; न हि अभिन्ने तत्त्वे पृथगनुचिन्तनं न्याय्यम्; दर्शयति च श्रुतिः अध्यात्ममधिदैवतं च तत्त्वाभेदम्—'अग्निर्वाग्भूत्वा मुखं प्राविशत्' इत्यारभ्य; तथा 'त एते सर्व एव समाः सर्वेऽनन्ताः' इति आध्यात्मिकानां प्राणानाम् आधिदैविकीं विभूतिमात्मभूतां दर्शयति। तथा अन्यत्रापि तत्र तत्र अध्यात्ममधिदैवतं च बहुधा तत्त्वाभेददर्शनं भवति; कचिच्च 'यः प्राणः स वायुः' इति स्पष्टमेव वायुं प्राणं च एकं करोति। तथा उदाहृतेऽपि वाजसनेयिब्राह्मणे 'यतश्चोदेति सूर्यः' इत्यस्मिन् उपसंहारश्लोके, 'प्राणाद्वा एष उदेति प्राणेऽस्तमेति' इति प्राणेनैव उपसंहरन् एकत्वं दर्शयति; 'तस्मादेकमेव व्रतं चरेत्प्राण्याच्चैवापान्याच्च' इति च प्राणव्रतेनैव एकेनोपसंहरन् एतदेव द्रढयति। तथा छान्दोग्येऽपि परस्तात् 'महात्मनश्चतुरो देव एकः कः स जगार भुवनस्य गोपाः' इत्येकमेव संवर्गं गमयति; न ब्रवीति—एक एव एषां चतुर्णां संवर्गः, अपरोऽपरेषामिति। तस्मादपृथक्त्वमुपगमनस्येत्येवं प्राप्ते—

ब्रूमः— पृथगेव वायुप्राणावुपगन्तव्याविति; कस्मात्? पृथगुपदेशात्; आध्यानार्थो हि अयम् अध्यात्माधिदैवविभागोपदेशः; सः असत्याध्यानपृथक्त्वे अनर्थक एव स्यात् । ननु उक्तम्, अपृथगनुचिन्तनं तत्त्वाभेदादिति—नैष दोषः; तत्त्वाभेदेऽप्यवस्थाभेदात् उपदेशभेदवशेन अनुचिन्तनभेदोपपत्तेः, श्लोकोपन्यासस्य च तत्त्वाभेदाभिप्रायेणापि उपपद्यमानस्य पूर्वोदितध्येयभेदनिराकरणसामर्थ्याभावात्, 'स यथैषां प्राणानां मध्यमः प्राण एवमेतासां देवतानां वायुः' इति च उपमानोपमेयकरणात् । एतेन व्रतोपन्यासो व्याख्यातः; 'एकमेव व्रतम्' इति च एवकारः वागादिव्रतनिवर्तनेन प्राणव्रतप्रतिपत्त्यर्थः; भग्नव्रतानि हि वागादीन्युक्तानि, 'तानि मृत्युः श्रमो भूत्वोपयेमे' इति श्रुतेः; न वायुव्रतनिवृत्त्यर्थः, 'अथातो व्रतमीमांसा' इति प्रस्तुत्य तुल्यवत् वायुप्राणयोरभग्नव्रतत्वस्य निर्धारितत्वात्; 'एकमेव व्रतं चरेत्' इति च उक्त्वा, 'तेनो एतस्यै देवतायै सायुज्यं सलोकतां जयति' इति वायुप्राप्तिं फलं ब्रुवन् वायुव्रतमनिवर्तितं दर्शयति; देवतेत्यत्र वायुः स्यात्, अपरिच्छिन्नात्मकत्वस्य प्रेप्सितत्वात्, पुरस्तात्प्रयोगाच्च—'सैषानस्तमिता देवता य-

द्वायुः' इति । तथा 'तौ वा एतौ द्वौ संवर्गौ वायुरेव देवेषु प्राणः प्राणेषु' इति भेदेन व्यपदिशति; 'ते वा एते पञ्चान्ये पञ्चान्ये दश सन्तस्तत्कृतम्' इति च भेदेनैव उपसंहरति; तस्मात्पृथगेव उपगमनम् । प्रदानवत्—यथा 'इन्द्राय राज्ञे पुरोडाशमेकादशकपालमिन्द्रायाधिराजायेन्द्राय स्वराज्ञे' इत्यस्यां त्रिपुरोडाशिन्यामिष्टौ, 'सर्वेषामभिगमयन्नवद्यत्यछंबट्कारम्' इत्यतो वचनात्, इन्द्राभेदाच्च, सहप्रदानाशङ्कायाम्— राजादिगुणभेदात् याज्यानुवाक्याव्यत्यासविधानाच्च यथान्यासमेव देवतापृथक्त्वात्प्रदानपृथक्त्वं भवति; एवं तत्त्वाभेदेऽपि आध्येयांशपृथक्त्वात् आध्यानपृथक्त्वमित्यर्थः । तदुक्तं संकर्षे— 'नाना वा देवता पृथग्ज्ञानात्' इति । तत्र तु द्रव्यदेवताभेदात् यागभेदो विद्यते; नैवमिह विद्याभेदोऽस्ति, उपक्रमोपसंहाराभ्याम् अध्यात्माधिदैवोपदेशेषु एकविद्याविधानप्रतीतेः; विद्यैक्येऽपि तु अध्यात्माधिदैवभेदात् प्रवृत्तिभेदो भवति— अग्निहोत्र इव सायंप्रातःकालभेदात्— इत्येतावदभिप्रेत्य प्रदानवदित्युक्तम् ॥

## लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि ॥ ४४ ॥

वाजसनेयिनोऽग्निरहस्ये 'नैव वा इदमग्रे सदासीत्' इत्ये-

तस्मिन्ब्राह्मणे मनोऽधिकृत्य अधीयते—'तत्षट्त्रिंशतं सहस्रा-
ण्यपश्यदात्मनोऽग्नीनर्कान्मनोमयान्मनश्चितः' इत्यादि ; तथैव
२९. लिङ्गभूय- 'वाक्चितः प्राणचितश्चक्षुश्चितः श्रोत्रचितः
स्त्वाधि- कर्मचितोऽग्निचितः' इति पृथगग्नीन् आम-
करणम् । नन्ति सांपादिकान् । तेषु संशयः—किमेते
मनश्चिदादयः क्रियानुप्रवेशिनः तच्छेषभूताः, उत स्वतन्त्राः
केवलविद्यात्मका इति । तत्र प्रकरणात् क्रियानुप्रवेशे प्राप्ते,
स्वातन्त्र्यं तावत्प्रतिजानीते— लिङ्गभूयस्त्वादिति । भूयांसि
हि लिङ्गानि अस्मिन्ब्राह्मणे केवलविद्यात्मकत्वमेषामुपोद्बल-
यन्ति दृश्यन्ते— 'तद्यत्किंचेमानि भूतानि मनसा संकल्प-
यन्ति तेषामेव सा कृतिः' इति, 'तान्हैतानेवंविदे सर्वदा
सर्वाणि भूतानि चिन्वन्त्यपि स्वपते' इति च एवंजाती-
यकानि । तद्धि लिङ्गं प्रकरणाद्बलीयः । तदप्युक्तं पूर्वस्मि-
न्काण्डे— 'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां सम-
वाये पारदौर्बल्यमर्थविप्रकर्षात्' इति ॥

## पूर्वविकल्पः प्रकरणात्स्यात्क्रिया मानसवत् ॥ ४५ ॥

नैतद्युक्तम्—स्वतन्त्रा एतेऽग्नयः अनन्यशेषभूता इति ;
पूर्वस्य क्रियामयस्य अग्नेः प्रकरणात् तद्विषय एव अयं

विकल्पविशेषोपदेशः स्यात् , न स्वतन्त्रः । ननु प्रकरणा-ल्लिङ्गं बलीयः— सत्यमेवमेतत् ; लिङ्गमपि तु एवंजातीयकं न प्रकरणाद्बलीयो भवति ; अन्यार्थदर्शनं हि एतत् , सांपादिकाग्निप्रशंसारूपत्वात् ; अन्यार्थदर्शनं च असत्यामन्यस्यां प्राप्तौ गुणवादेनाप्युपपद्यमानं न प्रकरणं बाधितुमुत्सहते ; तस्मात् सांपादिका अप्येतेऽग्नयः प्रकरणात्क्रियानुप्रवेशिन एव स्युः । मानसवत्— यथा दशरात्रस्य दशमेऽहनि अविवाक्ये पृथिव्या पात्रेण समुद्रस्य सोमस्य प्रजापतये देवतायै गृह्यमाणस्य ग्रहणासादनहवनाहरणोपह्वानभक्षणानि मानसान्येव आम्नायन्ते, स च मानसोऽपि ग्रहकल्पः क्रियाप्रकरणात् क्रियाशेष एव भवति— एवमयमप्यग्नि-कल्प इत्यर्थः ॥

## अतिदेशाच्च ॥ ४६ ॥

अतिदेशश्च एषामग्नीनां क्रियानुप्रवेशमुपोद्बलयति— ‘ षट्त्रिंशत्सहस्राण्यग्नयोऽर्कास्तेषामेकैक एव तावान्यावा-नसौ पूर्वः ’ इति ; सति हि सामान्ये अतिदेशः प्रवर्तते ; ततश्च पूर्वेण इष्टकाचितेन क्रियानुप्रवेशिना अग्निना सांपा-दिकानग्नीनतिदिशन् क्रियानुप्रवेशमेव एषां द्योतयति ॥

## विद्यैव तु निर्धारणात् ॥ ४७ ॥

तु-शब्दः पक्षं व्यावर्तयति । विद्यात्मका एव एते स्वतन्त्रा मनश्चिदादयोऽग्नयः स्युः, न क्रियाशेषभूताः । तथा हि निर्धारयति—'ते हैते विद्याचित एव' इति, 'विद्यया हैवैत एवंविदश्चिता भवन्ति' इति च ॥

## दर्शनाच्च ॥ ४८ ॥

दृश्यते च एतेषां स्वातन्त्र्ये लिङ्गम्; तत्पुरस्ताद्दर्शितम्—'लिङ्गभूयस्त्वात्' इत्यत्र ॥

ननु लिङ्गमपि असत्यामन्यस्यां प्राप्तौ असाधकं कस्यचिदर्थस्येति, अपास्य तत्, प्रकरणसामर्थ्यात् क्रियाशेषत्वमध्यवसितम्—इत्यत उत्तरं पठति—

## श्रुत्यादिबलीयस्त्वाच्च न बाधः ॥ ४९ ॥

नैवं प्रकरणसामर्थ्यात्क्रियाशेषत्वमध्यवसाय स्वातन्त्र्यपक्षो बाधितव्यः, श्रुत्यादेर्बलीयस्त्वात्; बलीयांसि हि प्रकरणात् श्रुतिलिङ्गवाक्यानीति स्थितं श्रुतिलिङ्गसूत्रे; तानि च इह स्वातन्त्र्यपक्षं साधयन्ति दृश्यन्ते; कथम्? श्रुतिस्तावत्—'ते हैते विद्याचित एव' इति; तथा लिङ्गम्—'सर्वदा सर्वाणि भूतानि चिन्वन्त्यपि स्वपते' इति; तथा वाक्यमपि—'विद्यया हैवैत एवंविदश्चिता भवन्ति' इति ।

'विद्याचित एव' इति हि सावधारणा इयं श्रुतिः क्रियानुप्रवेशेऽमीषामभ्युपगम्यमाने पीडिता स्यात् । ननु अबाह्यसाधनत्वाभिप्रायमिदमवधारणं भविष्यति—नेत्युच्यते ; तदभिप्रायतायां हि 'विद्याचितः' इति इयता स्वरूपसंकीर्तनेनैव कृतत्वात् , अनर्थकमवधारणं भवेत्—स्वरूपमेव हि एषाम् अबाह्यसाधनत्वमिति ; अबाह्यसाधनत्वेऽपि तु मानसग्रहवत् क्रियानुप्रवेशशङ्कायां तन्निवृत्तिफलम् अवधारणम् अर्थवद्भविष्यति । तथा 'स्वपते जाग्रते चैवंविदे सर्वदा सर्वाणि भूतान्येतानग्नींश्चिन्वन्ति' इति सातत्यदर्शनम् एषां स्वातन्त्र्येऽवकल्पते—यथा सांपादिके वाक्प्राणमयेऽग्निहोत्रे 'प्राणं तदा वाचि जुहोति...वाचं तदा प्राणे जुहोति' इति च उक्त्वा उच्यते—'एते अनन्ते अमृते आहुती जाग्रच्च स्वपंश्च सततं जुहोति' इति— तद्वत् ; क्रियानुप्रवेशे तु क्रियाप्रयोगस्य अल्पकालत्वात् न सातत्येन एषां प्रयोगः कल्पेत । न च इदमर्थवादमात्रमिति न्याय्यम् ; यत्र हि विस्पष्टो विधायको लिङादिः उपलभ्यते, युक्तं तत्र संकीर्तनमात्रस्यार्थवादत्वम् ; इह तु विस्पष्टविध्यन्तरानुपलब्धेः संकीर्तनादेव एषां विज्ञानविधानं कल्पनीयम् ; तच्च यथासंकीर्तनमेव कल्पयितुं शक्यत इति, सातत्यदर्शनात् तथाभूतमेव कल्प्यते ; ततश्च

सामर्थ्यादेषां स्वातन्त्र्यसिद्धिः । एतेन 'तद्यत्किंचेमानि भूतानि मनसा संकल्पयन्ति तेषामेव सा कृतिः' इत्यादि व्याख्यातम् । तथा वाक्यमपि 'एवंविदे' इति पुरुषविशेषसंबन्धमेव एषामाचक्षाणं न क्रतुसंबन्धं मृष्यते । तस्मात् स्वातन्त्र्यपक्ष एव ज्यायानिति ॥

## अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववद्दृष्टश्च तदुक्तम् ॥ ५० ॥

इतश्च प्रकरणमुपमृद्य स्वातन्त्र्यं मनश्चिदादीनां प्रतिपत्तव्यम्, यत् क्रियावयवान् मनआदिव्यापारेष्वनुबध्नाति—'ते मनसैवाधीयन्त मनसाचीयन्त मनसैव ग्रहा अगृह्यन्त मनसास्तुवन्मनसाशंसन्यत्किंच यज्ञे कर्म क्रियेत यत्किंच यज्ञियं कर्म मनसैव तेषु तन्मनोमयेषु मनश्चित्सु मनोमयमेव क्रियते' इत्यादिना; संपत्फलो हि अयमनुबन्धः; न च प्रत्यक्षाः क्रियावयवाः सन्तः संपदा लिप्सितव्याः । न च अत्र उद्गीथाद्युपासनवत् क्रियाङ्गसंबन्धात् तदनुप्रवेशित्वमाशङ्कितव्यम्, श्रुतिवैरूप्यात्; न हि अत्र क्रियाङ्गं किंचिदादाय तस्मिन् अदो नामाध्यवसितव्यमिति वदति; षट्त्रिंशत्सहस्राणि तु मनोवृत्तिभेदान् आदाय तेष्वग्नित्वं ग्रहादींश्च कल्पयति, पुरुषयज्ञादिवत्; संख्या च इयं पुरुषायुषस्याहःसु

दृष्टा सती तत्संबन्धिनीषु मनोवृत्तिष्वारोप्यत इति द्रष्टव्यम् । एवमनुबन्धात्स्वातन्त्र्यं मनश्चिदादीनाम् । आदिशब्दात् अतिदेशाद्यपि यथासंभवं योजयितव्यम्; तथा हि—'तेषामेकैक एव तावान्यावानसौ पूर्वः' इति क्रियामयस्याग्नेर्माहात्म्यं ज्ञानमयानामेकैकस्य अतिदिशन् क्रियायामनादरं दर्शयति; न च सत्येव क्रियासंबन्धे विकल्पः पूर्वेणोत्तरेषामिति शक्यं वक्तुम्; न हि, येन व्यापारेण आहवनीयधारणादिना पूर्वः क्रियायामुपकरोति, तेन उत्तरे उपकर्तुं शक्नुवन्ति । यत्तु पूर्वपक्षेऽप्यतिदेश उपोद्बलक इत्युक्तम्— सति हि सामान्येऽतिदेशः प्रवर्तेत इति, तत् अस्मत्पक्षेऽप्यग्नित्वसामान्येनातिदेशसंभवात्प्रत्युक्तम्— अस्ति हि सांपादिकानामप्यग्नीनामग्नित्वमिति । श्रुत्यादीनि च कारणानि दर्शितानि । एवमनुबन्धादिभ्यः कारणेभ्यः स्वातन्त्र्यं मनश्चिदादीनाम्; प्रज्ञान्तरपृथक्त्ववत्— यथा प्रज्ञान्तराणि शाण्डिल्यविद्याप्रभृतीनि स्वेन स्वेन अनुबन्धेन अनुबध्यमानानि पृथगेव कर्मभ्यः प्रज्ञान्तरेभ्यश्च स्वतन्त्राणि भवन्ति, एवमिति; दृष्टश्च अवेष्टेः राजसूयप्रकरणपठितायाः प्रकरणादुत्कर्षः— वर्णत्रयानुबन्धात्; राजयज्ञत्वाच्च राजसूयस्य; तदुक्तं प्रथमे काण्डे— 'क्रत्वर्थायामिति चेन्न वर्णत्रयसंयोगात्' इति ॥

## न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः ॥ ५१ ॥

यदुक्तं मानसवदिति, तत्प्रत्युच्यते । न मानसग्रहसामान्यादपि मनश्चिदादीनां क्रियाशेषत्वं कल्प्यम्, पूर्वोक्तेभ्यः श्रुत्यादिहेतुभ्यः केवलपुरुषार्थत्वोपलब्धेः; न हि किंचित् कस्यचित् केनचित् सामान्यं न संभवति; न च तावता यथास्वं वैषम्यं निवर्तते; मृत्युवत्—यथा 'स वा एष एव मृत्युर्य एष एतस्मिन्मण्डले पुरुषः' इति, 'अग्निर्वै मृत्युः' इति च अग्न्यादित्यपुरुषयोः समानेऽपि मृत्युशब्दप्रयोगे, न अत्यन्तसाम्यापत्तिः; यथा च 'असौ वाव लोको गौतमाग्निस्तस्यादित्य एव समित्' इत्यत्र न समिदादिसामान्यात् लोकस्याग्निभावापत्तिः— तद्वत् ॥

## परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबन्धः ॥ ५२ ॥

परस्तादपि 'अयं वाव लोक एषोऽग्निश्चितः' इत्यस्मिन् अनन्तरे ब्राह्मणे, ताद्विध्यं केवलविद्याविधित्वम् शब्दस्य प्रयोजनं लक्ष्यते, न शुद्धकर्माङ्गविधित्वम्; तत्र हि— 'विद्यया तदारोहन्ति यत्र कामाः परागताः । न तत्र

दक्षिणा यन्ति नाविद्वांसस्तपस्विनः' इत्यनेन श्लोकेन केवलं कर्म निन्दन् विद्यां च प्रशंसन् इदं गमयति । तथा पुरस्तादपि 'यदेतन्मण्डलं तपति' इत्यस्मिन्ब्राह्मणे विद्याप्रधानत्वमेव लक्ष्यते— 'सोऽमृतो भवति मृत्युर्ह्यस्यात्मा भवति' इति विद्याफलेनैव उपसंहारात् न कर्मप्रधानता । तत्सामान्यात् इहापि तथात्वम् । भूयांस्तु अग्न्यवयवाः संपादयितव्या विद्यायाम्— इत्येतस्मात्कारणात् अग्निना अनुबध्यते विद्या, न कर्माङ्गत्वात् । तस्मात् मनश्चिदादीनां केवलविद्यात्मकत्वसिद्धिः ॥

## एक आत्मनः शरीरे भावात् ॥ ५३ ॥

इह देहव्यतिरिक्तस्य आत्मनः सद्भावः समर्थ्यते, बन्धमोक्षाधिकारसिद्धये; न हि असति देहव्यतिरिक्त आत्मनि
३०. शरीरेभावाधिकरणम् । परलोकफलाश्चोदना उपपद्येरन्; कस्य वा ब्रह्मात्मत्वमुपदिश्येत । ननु शास्त्रप्रमुख एव प्रथमे पादे शास्त्रफलोपभोगयोग्यस्य देहव्यतिरिक्तस्य आत्मनोऽस्तित्वमुक्तम्—सत्यमुक्तं भाष्यकृता; न तु तत्रात्मास्तित्वे सूत्रमस्ति; इह तु स्वयमेव सूत्रकृता तदस्तित्वमाक्षेपपुरःसरं प्रतिष्ठापितम्; इत एव च आकृष्य आचार्येण शबरस्वामिना प्रमाणलक्षणे वर्णितम्; अत एव च भ-

गवता उपवर्षेण प्रथमे तन्त्रे आत्मास्तित्वाभिधानप्रसक्तौ शारीरके वक्ष्याम इत्युद्धारः कृतः । इह च इदं चोदनालक्षणेषु उपासनेषु विचार्यमाणेषु आत्मास्तित्वं विचार्यते, कृत्स्नशास्त्रशेषत्वप्रदर्शनाय; अपि च पूर्वस्मिन्नधिकरणे प्रकरणोत्कर्षाभ्युपगमेन मनश्चिदादीनां पुरुषार्थत्वं वर्णितम्; कोऽसौ पुरुषः, यदर्था एते मनश्चिदादयः—इत्यस्यां प्रसक्तौ इदं देहव्यतिरिक्तस्य आत्मनोऽस्तित्वमुच्यते; तदस्तित्वाक्षेपार्थमिदमादिमं सूत्रम्—आक्षेपपूर्विका हि परिहारोक्तिः विवक्षितेऽर्थे स्थूणानिखननन्यायेन दृढां बुद्धिमुत्पादयेदिति ॥

अत्र एके देहमात्रात्मदर्शिनो लोकायतिकाः देहव्यतिरिक्तस्य आत्मनोऽभावं मन्यमानाः, समस्तव्यस्तेषु बाह्येषु पृथिव्यादिष्वदृष्टमपि चैतन्यं शरीराकारपरिणतेषु भूतेषु स्यादिति—संभावयन्तस्तेभ्यश्चैतन्यम्, मदशक्तिवत् विज्ञानम् चैतन्यविशिष्टः कायः पुरुषः—इति च आहुः । न स्वर्गगमनाय अपवर्गगमनाय वा समर्थो देहव्यतिरिक्त आत्मा अस्ति, यत्कृतं चैतन्यं देहे स्यात्; देह एव तु चेतनश्च आत्मा च इति प्रतिजानते । हेतुं च आचक्षते— शरीरे भावादिति; यद्धि यस्मिन्सति भवति, असति च न भवति, तत् तद्धर्मत्वेनाध्यवसीयते—यथा अग्निधर्मावौष्ण्य-

प्रकाशौ । प्राणचेष्टाचैतन्यस्मृत्यादयश्च आत्मधर्मत्वेनाभिमता आत्मवादिनाम्—तेऽपि अन्तरेव देहे उपलभ्यमानाः बहिश्च अनुपलभ्यमानाः असिद्धे देहव्यतिरिक्ते धर्मिणि देहधर्मा एव भवितुमर्हन्ति । तस्मादव्यतिरेको देहादात्मन इति ॥

एवं प्राप्ते, ब्रूमः—

## व्यतिरेकस्तद्भावाभावित्वान्न तूपलब्धिवत् ॥ ५४ ॥

न त्वेतदस्ति—यदुक्तमव्यतिरेको देहादात्मन इति; व्यतिरेक एव अस्य देहाद्भवितुमर्हति; तद्भावाभावित्वात्; यदि देहभावे भावात् देहधर्मत्वम् आत्मधर्माणां मन्येत—ततो देहभावेऽपि अभावात् अतद्धर्मत्वमेव एषां किं न मन्येत? देहधर्मवैलक्षण्यात्; ये हि देहधर्मा रूपादयः, ते यावद्देहं भवन्ति; प्राणचेष्टादयस्तु सत्यपि देहे मृतावस्थायां न भवन्ति; देहधर्माश्च रूपादयः परैरप्युपलभ्यन्ते, न त्वात्मधर्माश्चैतन्यस्मृत्यादयः । अपि च सति हि तावत् देहे जीवदवस्थायाम् एषां भावः शक्यते निश्चेतुम्, न तु असत्यभावः; पतितेऽपि कदाचिदस्मिन्देहे देहान्तरसंचारेण आत्मधर्मा अनुवर्तेरन्; संशयमात्रेणापि परपक्षः

प्रतिषिध्यते । किमात्मकं च पुनरिदं चैतन्यं मन्यते, यस्य भूतेभ्य उत्पत्तिमिच्छति—इति परः पर्यनुयोक्तव्यः, न हि भूतचतुष्टयव्यतिरेकेण लोकायतिकः किंचित् तत्त्वं प्रत्येति; यत् अनुभवनं भूतभौतिकानाम्, तत् चैतन्यमिति चेत्, तर्हि विषयत्वात्तेषाम् न तद्धर्मत्वमश्नुवीत, स्वात्मनि क्रियाविरोधात्। न हि अग्निरुष्णः सन् स्वात्मानं दहति, न हि नटः शिक्षितः सन् स्वस्कन्धमधिरोक्ष्यति । न हि भूतभौतिकधर्मेण सता चैतन्येन भूतभौतिकानि विषयीक्रियेरन्; न हि रूपादिभिः स्वरूपं पररूपं वा विषयीक्रियते; विषयीक्रियन्ते तु बाह्याध्यात्मिकानि भूतभौतिकानि चैतन्येन । अतश्च यथैव अस्या भूतभौतिकविषयाया उपलब्धेर्भावोऽभ्युपगम्यते, एवं व्यतिरेकोऽपि अस्यास्तेभ्यः अभ्युपगन्तव्यः; उपलब्धिस्वरूप एव च न आत्मेति आत्मनो देहव्यतिरिक्तत्वम् । नित्यत्वं च उपलब्धेः, ऐकरूप्यात्, 'अहम् इदम् अद्राक्षम्' इति च अवस्थान्तरयोगेऽप्युपलब्धृत्वेन प्रत्यभिज्ञानात्, स्मृत्याद्युपपत्तेश्च । यत्तूक्तम्— शरीरे भावाच्छरीरधर्म उपलब्धिरिति, तत् वर्णितेन प्रकारेण प्रत्युक्तम् । अपि च सत्सु प्रदीपादिषु उपकरणेषु उपलब्धिर्भवति असत्सु न भवतीति— न च एतावता प्रदीपादिधर्म एव उपलब्धिर्भवति; एवं सति

देहे उपलब्धिर्भवति, असति च न भवतीति— न देहधर्मो भवितुमर्हति; उपकरणत्वमात्रेणापि प्रदीपादिवत् देहोपयोगोपपत्तेः। न च अत्यन्तं देहस्य उपलब्धावुपयोगोऽपि दृश्यते, निश्चेष्टेऽप्यस्मिन्देहे स्वप्ने नानाविधोपलब्धिदर्शनात्। तस्मादनवद्यं देहव्यतिरिक्तस्य आत्मनोऽस्तित्वम् ॥

## अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम् ॥ ५५ ॥

समाप्ता प्रासङ्गिकी कथा; संप्रति प्रकृतामेवानुवर्तामहे। 'ओमित्येतदक्षरमुद्गीथमुपासीत' 'लोकेषु पञ्चविधं सामोपासीत' 'उक्थमुक्थमिति वै प्रजा वदन्ति तदिदमेवोक्थम्' 'इयमेव पृथिवी' 'अयं वाव लोकः' 'एषोऽग्निश्चितः' इत्येवमाद्या ये उद्गीथादिकर्माङ्गावबद्धाः प्रत्ययाः प्रतिवेदं शाखाभेदेषु विहिताः, ते तच्छाखागतेष्वेव उद्गीथादिषु भवेयुः, अथवा सर्वशाखागतेषु— इति विशयः। प्रतिशाखं च स्वरादिभेदात् उद्गीथादिभेदानुपादाय अयमुपन्यासः। किं तावत्प्राप्तम्? स्वशाखागतेष्वेव उद्गीथादिषु विधीयेरन्निति; कुतः? संनिधानात्— 'उद्गीथमुपसीत' इति हि सामान्यविहितानां विशेषाकाङ्क्षायां संनिकृष्टेनैव स्वशाखागतेन

३१. अङ्गावबद्धाधिकरणम्।

विशेषेण आकाङ्क्षादिनिवृत्तेः, तदतिलङ्घनेन शाखान्तरविहितविशेषोपादाने कारणं नास्ति । तस्मात्प्रतिशाखं व्यवस्थेत्येवं प्राप्ते, ब्रवीति— अङ्गावबद्धास्त्विति । तु-शब्दः पक्षं व्यावर्तयति । नैते प्रतिवेदं स्वशाखास्वेव व्यवतिष्ठेरन्' अपि तु सर्वशाखास्वनुवर्तेरन्; कुतः? उद्गीथादिश्रुत्यविशेषात्; स्वशाखाव्यवस्थायां हि 'उद्गीथमुपासीत' इति सामान्यश्रुतिरविशेषप्रवृत्ता सती संनिधानवशेन विशेषे व्यवस्थाप्यमाना पीडिता स्यात्; न चैतन्न्याय्यम्; संनिधानाद्धि श्रुतिर्बलीयसी; न च सामान्याश्रयः प्रत्ययो नोपपद्यते । तस्मात् स्वरादिभेदे सत्यपि उद्गीथत्वाद्यविशेषात् सर्वशाखागतेष्वेव उद्गीथादिषु एवंजातीयकाः प्रत्ययाः स्युः ॥

## मन्त्रादिवद्वाविरोधः ॥ ५६ ॥

अथवा नैवात्र विरोधः शङ्कितव्यः— कथमन्यशाखागतेषु उद्गीथादिषु अन्यशाखाविहिताः प्रत्यया भवेयुरिति, मन्त्रादिवत् अविरोधोपपत्तेः । तथा हि— मन्त्राणां कर्मणां गुणानां च शाखान्तरोत्पन्नानामपि शाखान्तरे उपसंग्रहो दृश्यते; येषामपि हि शाखिनाम् 'कुटरुरसि' इत्यश्मादानमन्त्रो नाम्नातः, तेषामपि असौ विनियोगो दृश्यते—'कुक्कुटोऽसीत्यश्मानमादत्ते, कुटरुरसीति वा' इति; येषामपि

समिदादयः प्रयाजा नाम्नाताः, तेषामपि तेषु गुणविधिराम्नायते— 'ऋतवो वै प्रयाजाः समानत्र होतव्याः' इति; तथा येषामपि 'अजोऽग्नीषोमीयः' इति जातिविशेषोपदेशो नास्ति, तेषामपि तद्विषयो मन्त्रवर्ण उपलभ्यते— 'छागस्य वपाया मेदसोऽनुब्रूहि' इति; तथा वेदान्तरोत्पन्नानामपि 'अग्नेर्वैहोत्रं वेरध्वरम्' इत्येवमादिमन्त्राणां वेदान्तरे परिग्रहो दृष्टः; तथा बह्वृचपठितस्य सूक्तस्य 'यो जात एव प्रथमो मनस्वान्' इत्यस्य, 'अध्वर्यवे सजनीयं शस्यम्' इत्यत्र परिग्रहो दृष्टः। तस्मात् यथा आश्रयाणां कर्माङ्गानां सर्वत्रानुवृत्तिः, एवम् आश्रितानामपि प्रत्ययानाम्——इत्यविरोधः॥

## भूम्नः क्रतुवज्ज्यायस्त्वं तथा हि दर्शयति॥ ५७॥

'प्राचीनशाल औपमन्यवः' इत्यस्यामाख्यायिकायां व्यस्तस्य समस्तस्य च वैश्वानरस्य उपासनं श्रूयते। व्यस्तोपासनं तावत्— 'औपमन्यव कं त्वमात्मानमुपास्स इति दिवमेव भगवो राजन्निति होवाचैष वै सुतेजा आत्मा वैश्वानरो यं त्वमात्मानमुपास्से' इत्यादि; तथा समस्तोपासन-

३२. भूमज्यायस्त्वाधिकरणम्।

मपि—'तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मात्मा संदेहो बहुलो बस्तिरेव रयिः पृथिव्येव पादौ' इत्यादि । तत्र संशयः—किमिह उभयथापि उपासनं स्यात् व्यस्तस्य समस्तस्य च, उत समस्तस्यैवेति । किं तावत्प्राप्तम्? प्रत्यवयवं सुतेजःप्रभृतिषु 'उपास्से' इति क्रियापदश्रवणात्, 'तस्मात्तव सुतं प्रसुतमासुतं कुले दृश्यते' इत्यादिफलभेदश्रवणाच्च, व्यस्तान्यप्युपासनानि स्युः— इति प्राप्तम् ॥

ततोऽभिधीयते— भूम्नः पदार्थोपचयात्मकस्य समस्तस्य वैश्वानरोपासनस्य ज्यायस्त्वं प्राधान्येन अस्मिन्वाक्ये विवक्षितं भवितुमर्हति, न प्रत्येकम् अवयवोपासनानामपि; क्रतुवत्—यथा क्रतुषु दर्शपूर्णमासप्रभृतिषु सामस्त्येन साङ्गप्रधानप्रयोग एव एको विवक्ष्यते, न व्यस्तानामपि प्रयोगः प्रयाजादीनाम्, नाप्येकदेशाङ्गयुक्तस्य प्रधानस्य—तद्वत् । कुत एतत्—भूमैव ज्यायानिति? तथा हि श्रुतिः भूम्नो ज्यायस्त्वं दर्शयति, एकवाक्यतावगमात्; एकं हि इदं वाक्यं वैश्वानरविद्याविषयं पौर्वापर्यालोचनात्प्रतीयते; तथा हि—प्राचीनशालप्रभृतय उद्दालकावसानाः षट् ऋषयः वैश्वानरविद्यायां परिनिष्ठामप्रतिपद्यमानाः अश्वपतिं कैकेयं राजानमभ्याजग्मुः—

इत्युपक्रम्य, एकैकस्य ऋषेरुपास्यं द्युप्रभृतीनामेकैकं श्रावयित्वा, 'मूर्धा त्वेष आत्मन इति होवाच' इत्यादिना मूर्धादिभावं तेषां विदधाति; 'मूर्धा ते व्यपतिष्यद्यन्मां नागमिष्यः' इत्यादिना च व्यस्तोपासनमपवदति; पुनश्च व्यस्तोपासनं व्यावर्त्य, समस्तोपासनमेवानुवर्त्य, 'स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ति' इति भूमाश्रयमेव फलं दर्शयति। यत्तु प्रत्येकं सुतेजःप्रभृतिषु फलभेदश्रवणम्, तत् एवं सति अङ्गफलानि प्रधान एवाभ्युच्चिनोति—इति द्रष्टव्यम्। तथा 'उपास्से' इत्यपि प्रत्यवयवमाख्यातश्रवणं पराभिप्रायानुवादार्थम्, न व्यस्तोपासनविधानार्थम्। तस्मात्समस्तोपासनपक्ष एव श्रेयानिति॥

केचित्तु अत्र समस्तोपासनपक्षं ज्यायांसं प्रतिष्ठाप्य, ज्यायस्त्ववचनादेव किल व्यस्तोपासनपक्षमपि सूत्रकारोऽनुमन्यत इति कल्पयन्ति। तदयुक्तम्, एकवाक्यतावगतौ सत्यां वाक्यभेदकल्पनस्यान्याय्यत्वात्, 'मूर्धा ते व्यपतिष्यत्' इति च एवमादिनिन्दाविरोधात्, स्पष्टे च उपसंहारस्थे समस्तोपासनावगमे तदभावस्य पूर्वपक्षे वक्तुमशक्यत्वात्, सौत्रस्य च ज्यायस्त्ववचनस्य प्रमाणवत्त्वाभिप्रायेणापि उपपद्यमानत्वात्॥

## नाना शब्दादिभेदात् ॥ ५८ ॥

पूर्वस्मिन्नधिकरणे सत्यामपि सुतेजःप्रभृतीनां फलभेदश्रुतौ समस्तस्योपासनं ज्याय इत्युक्तम्; अतः प्राप्ता बुद्धिः—

२३. शब्दादिभेदाधिकरणम् ।

अन्यान्यपि भिन्नश्रुतीन्युपासनानि समस्य उपासिष्यन्ते इति । अपि च नैव वेद्याभेदे विद्याभेदो विज्ञातुं शक्यते; वेद्यं हि रूपं विद्यायाः, द्रव्यदैवतमिव यागस्य; वेद्यश्च एक एव ईश्वरः श्रुतिनानात्वेऽप्यवगम्यते—'मनोमयः प्राणशरीरः' 'कं ब्रह्म खं ब्रह्म' 'सत्यकामः सत्यसंकल्पः' इत्येवमादिषु— तथा 'एक एव प्राणः' 'प्राणो वाव संवर्गः' 'प्राणो वाव ज्येष्ठश्च श्रेष्ठश्च' 'प्राणो ह पिता प्राणो माता' इत्येवमादिषु; वेद्यैकत्वाच्च विद्यैकत्वम् । श्रुतिनानात्वमपि अस्मिन्पक्षे गुणान्तरपरत्वात् न अनर्थकम् । तस्मात् स्वपरशाखाविहितम् एकवेद्यव्यपाश्रयं गुणजातमुपसंहर्तव्यं विद्याकार्त्स्न्यायेत्येवं प्राप्ते—

प्रतिपाद्यते— नानेति; वेद्याभेदेऽपि एवंजातीयका विद्या भिन्ना भवितुमर्हति; कुतः? शब्दादिभेदात्; भवति हि शब्दभेदः— 'वेद' 'उपासीत' 'स क्रतुं कुर्वीत' इत्येवमादिः; शब्दभेदश्च कर्मभेदहेतुः समधिगतः पुरस्तात् 'श-

ब्दान्तरे कर्मभेदः कृतानुबन्धत्वात्' इति । आदिग्रहणात् गुणादयोऽपि यथासंभवं भेदहेतवो योजयितव्याः । ननु 'वेद' इत्यादिषु शब्दभेद एव अवगम्यते, न 'यजति' इत्यादिवत् अर्थभेदः, सर्वेषामेवैषां मनोवृत्त्यर्थत्वाभेदात्, अर्थान्तरासंभवाच्च; तत् कथं शब्दभेदाद्विद्याभेद इति—नैष दोषः, मनोवृत्त्यर्थत्वाभेदेऽपि अनुबन्धभेदाद्वेद्यभेदे सति विद्याभेदोपपत्तेः; एकस्यापीश्वरस्य उपास्यस्य प्रतिप्रकरणं व्यावृत्ता गुणाः शिष्यन्ते; तथा एकस्यापि प्राणस्य तत्र तत्र उपास्यस्य अभेदेऽपि अन्यादृग्गुणोऽन्यत्रो-पासितव्यः अन्यादृग्गुणश्चान्यत्र— इत्येवमनुबन्धभेदा-द्विधिभेदे सति विद्याभेदो विज्ञायते । न च अत्र एको विद्याविधिः, इतरे गुणविधय इति शक्यं वक्तुम्— विनिगमनायां हेत्वभावात्, अनेकत्वाच्च प्रतिप्रकरणं गुणानां प्राप्तविद्यानुवादेन विधानानुपपत्तेः । न च अस्मिन्पक्षे समा-नाः सन्तः सत्यकामादयो गुणा असकृच्छ्रावयितव्याः । प्रति-प्रकरणं च— इदंकामेनेदमुपासितव्यम्, इदंकामेन च इदम्— इति नैराकाङ्क्ष्यावगमात् नैकवाक्यतापत्तिः । न च अत्र वैश्वा-नरविद्यायामिव समस्तचोदना अपरा अस्ति, यद्बलेन प्रति-प्रकरणवर्तीन्यवयवोपासनानि भूत्वा एकवाक्यताम् इयुः ।

वेद्यैकत्वनिमित्ते च विद्यैकत्वे सर्वत्र निरङ्कुशे प्रतिज्ञायमाने, समस्तगुणोपसंहारोऽशक्यः प्रतिज्ञायेत । तस्मात् सुष्ठु उच्यते— नाना शब्दादिभेदादिति । स्थिते च एतस्मिन्नधिकरणे, सर्ववेदान्तप्रत्ययमित्यादि द्रष्टव्यम् ॥

## विकल्पोऽविशिष्टफलत्वात् ॥ ५९ ॥

स्थिते विद्याभेदे विचार्यते— किमासामिच्छया समुच्चयो विकल्पो वा स्यात्, अथवा विकल्प एव नियमेनेति ।

३४. विकल्पाधिकरणम् । तत्र स्थितत्वात् तावद्विद्याभेदस्य न समुच्चयनियमे किंचित्कारणमस्ति । ननु भिन्नानामप्यग्निहोत्रदर्शपूर्णमासादीनां समुच्चयनियमो दृश्यते— नैष दोषः; नित्यताश्रुतिर्हि तत्र कारणम्; नैवं विद्यानां काचिन्नित्यताश्रुतिरस्ति; तस्मान्न समुच्चयनियमः । नापि विकल्पनियमः, विद्यान्तराधिकृतस्य विद्यान्तराप्रतिषेधात् । पारिशेष्यात् याथाकाम्यमापद्यते । ननु अविशिष्टफलत्वादासां विकल्पो न्याय्यः; तथा हि— 'मनोमयः प्राणशरीरः' 'कं ब्रह्म खं ब्रह्म' 'सत्यकामः सत्यसंकल्पः' इत्येवमाद्याः तुल्यवत् ईश्वरत्वप्राप्तिफला लक्ष्यन्ते— नैष दोषः, समानफलेष्वपि स्वर्गादिसाधनेषु कर्मसु याथाकाम्यदर्शनात् । तस्मात् याथाकाम्यप्राप्तौ, उच्यते— विकल्प एव आसां भवितुम-

र्हति, न समुच्चयः; कस्मात्? अविशिष्टफलत्वात्। अविशिष्टं हि आसां फलमुपास्यविषयसाक्षात्करणम्; एकेन च उपासनेन साक्षात्कृते उपास्ये विषये ईश्वरादौ, द्वितीयमनर्थकम्। अपि च असंभव एव, साक्षात्करणस्य समुच्चयपक्षे, चित्तविक्षेपहेतुत्वात्; साक्षात्करणसाध्यं च विद्याफलं दर्शयन्ति श्रुतयः—'यस्य स्यादद्धा न विचिकित्सास्ति' इति, 'देवो भूत्वा देवानप्येति' इति च एवमाद्याः; स्मृतयश्च—'सदा तद्भावभावितः' इत्येवमाद्याः। तस्मात् अविशिष्टफलानां विद्यानामन्यतमामादाय तत्परः स्यात्, यावदुपास्यविषयसाक्षात्करणेन तत्फलं प्राप्तमिति॥

## काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात्॥ ६०॥

अविशिष्टफलत्वादित्यस्य प्रत्युदाहरणम्। यासु पुनः काम्यासु विद्यासु 'स य एतमेवं वायुं दिशां वत्सं वेद न पुत्ररोदं रोदिति' 'स यो नाम ब्रह्मेत्युपास्ते यावन्नाम्नो गतं तत्रास्य यथाकामचारो भवति' इति चैवमाद्यासु क्रियावत् अदृष्टेनात्मना आत्मीयं फलं साधयन्तीषु, साक्षात्करणापेक्षा नास्ति;

३५. काम्याधिकरणम्।

ता यथाकामं समुच्चीयेरन्, न वा समुच्चीयेरन्—पूर्वहेत्वभावात्— पूर्वस्य अविशिष्टफलत्वादित्यस्य विकल्पहेतोः अभावात् ॥

## अङ्गेषु यथाश्रयभावः ॥ ६१ ॥

कर्माङ्गेषु उद्गीथादिषु ये आश्रिताः प्रत्यया वेदत्रय-
३६. यथाश्रयभावाधिकरणम् । विहिताः, किं ते समुच्चीयेरन्, किं वा यथाकामं स्युरिति संशये— यथाश्रयभाव इत्याह । यथैव एषामाश्रयाः स्तोत्रादयः संभूय भवन्ति, एवं प्रत्यया अपि, आश्रयतन्त्रत्वात्प्रत्ययानाम् ॥

## शिष्टेश्च ॥ ६२ ॥

यथा वा आश्रयाः स्तोत्रादयः त्रिषु वेदेषु शिष्यन्ते, एवमाश्रिता अपि प्रत्ययाः— नोपदेशकृतोऽपि कश्चिद्विशेषः अङ्गानां तदाश्रयाणां च प्रत्ययानामित्यर्थः ॥

## समाहारात् ॥ ६३ ॥

'होतृषदनाद्धैवापि दुरुद्गीतमनुसमाहरति' इति च— प्रणवोद्गीथैकत्वविज्ञानमाहात्म्यात् उद्गाता स्वकर्मण्युत्पन्नं

क्षतं हौत्रात्कर्मणः प्रतिसमादधाति— इति ब्रुवन् वेदान्तरोदितस्य प्रत्ययस्य वेदान्तरोदितपदार्थसंबन्धसामान्यात् सर्ववेदोदितप्रत्ययोपसंहारं सूचयति— इति लिङ्गदर्शनम् ॥

## गुणसाधारण्यश्रुतेश्च ॥ ६४ ॥

विद्यागुणं च विद्याश्रयं सन्तम् ओंकारं वेदत्रयसाधारणं श्रावयति—'तेनेयं त्रयी विद्या वर्तत ओमित्याश्रावयत्योमिति शंसत्योमित्युद्गायति' इति च; ततश्च आश्रयसाधारण्यात् आश्रितसाधारण्यमिति— लिङ्गदर्शनमेव । अथवा गुणसाधारण्यश्रुतेश्चेति; यदीमे कर्मगुणा उद्गीथादयः सर्वे सर्वप्रयोगसाधारणा न स्युः, न स्यात् ततः तदाश्रयाणां प्रत्ययानां सहभावः; ते तु उद्गीथादयः सर्वाङ्गग्राहिणा प्रयोगवचनेन सर्वे सर्वप्रयोगसाधारणाः श्राव्यन्ते; ततश्च आश्रयसहभावात्प्रत्ययसहभाव इति ॥

## न वा तत्सहभावाश्रुतेः ॥ ६५ ॥

न वेति पक्षव्यावर्तनम् । न यथाश्रयभाव आश्रितानामुपासनानां भवितुमर्हति; कुतः? तत्सहभावाश्रुतेः; यथा हि त्रिवेदविहितानामङ्गानां स्तोत्रादीनां सहभावः श्रूयते— 'ग्रहं वा गृहीत्वा चमसं वोन्नीय स्तोत्रमुपाकरोति, स्तुतमनु-

शंसति, प्रस्तोतः साम गाय, होतरेतद्यज ' इत्यादिना; नैव-मुपासनानां सहभावश्रुतिरस्ति । ननु प्रयोगवचन एषां सह-भावं प्रापयेत्—नेति ब्रूमः, पुरुषार्थत्वादुपासनानाम् ; प्रयो-गवचनो हि क्रत्वर्थानामुद्गीथादीनां सहभावं प्रापयेत् ; उद्गी-थाद्युपासनानि तु क्रत्वर्थाश्रयाण्यपि गोदोहनादिवत् पुरुषा-र्थानीत्यवोचाम 'पृथग्घ्यप्रतिबन्धः फलम्' इत्यत्र । अयमेव च उपदेशाश्रयो विशेषः अङ्गानां तदालम्बनानां च उपासनानाम्— यदेकेषां क्रत्वर्थत्वम्, एकेषां पुरुषार्थ-त्वमिति । परं च लिङ्गद्वयम् अकारणमुपासनसहभावस्य, श्रुतिन्यायाभावात् । न च प्रतिप्रयोगम् आश्रयकार्त्स्न्योप-संहारादाश्रितानामपि तथात्वं विज्ञातुं शक्यम्, अतत्प्रयु-क्तत्वादुपासनानाम्— आश्रयतन्त्राण्यपि हि उपासनानि का-मम् आश्रयाभावे मा भूवन्; न त्वाश्रयसहभावेन सहभाव-नियममर्हन्ति, तत्सहभावाश्रुतेरेव । तस्मात् यथाकाममेव उपासनान्यनुष्ठीयेरन् ॥

## दर्शनाच्च ॥ ६६ ॥

दर्शयति च श्रुतिरसहभावं प्रत्ययानाम्—'एवंविद्ध वै ब्रह्मा यज्ञं यजमानं सर्वांश्चर्त्विजोऽभिरक्षति' इति । सर्व-

प्रत्ययोपसंहारे हि, सर्वे सर्वविद इति न विज्ञानवता ब्रह्मणा परिपाल्यत्वमितरेषां संकीर्त्येत । तस्मात् यथाकाममुपासनानां समुच्चयो विकल्पो वेति ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्द-
भगवत्पूज्यपादशिष्यस्य श्रीमच्छंकरभगवतः कृतौ
**शारीरकमीमांसासूत्रभाष्ये**
तृतीयाध्यायस्य तृतीयः पादः ॥

श्रीमच्छंकरभगवत्पादैर्विरचितम्

# ॥ ब्रह्मसूत्रभाष्यम् ॥

## तृतीयाध्याये

## चतुर्थः पादः

# चतुर्थः पादः ॥

अथेदानीम् औपनिषदमात्मज्ञानं किमधिकारिद्वारेण कर्मण्येवानुप्रविशति, आहोस्वित् स्वतन्त्रमेव पुरुषार्थसाधनं भवतीति मीमांसमानः, सिद्धान्तेनैव तावदुपक्रमते—

**पुरुषार्थोऽतः शब्दादिति बादरायणः ॥ १ ॥**

१. पुरुषार्थाधिकरणम् ।

पुरुषार्थोऽत इति । अस्माद्वेदान्तविहितादात्मज्ञानात् स्वतन्त्रात् पुरुषार्थः सिध्यतीति बादरायण आचार्यो मन्यते ; कुत एतदवगम्यते? शब्दादित्याह । तथा हि— 'तरति शोकमात्मवित्' 'स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति' 'ब्रह्मविदाप्नोति परम्' 'आचार्यवान्पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये' 'य आत्मापहतपाप्मा' इत्युपक्रम्य, 'स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान्यस्तमात्मानमनुविद्य विजानाति' इति ; 'आत्मा वा अरे द्रष्टव्यः' इत्युपक्रम्य, 'एता-

वदरे खल्वमृतत्वम्' इति एवंजातीयका श्रुतिः केवलाया विद्यायाः पुरुषार्थहेतुत्वं श्रावयति ॥

अथात्र प्रत्यवतिष्ठते—

**शेषत्वात्पुरुषार्थवादो यथान्ये-ष्विति जैमिनिः ॥ २ ॥**

कर्तृत्वेन आत्मनः कर्मशेषत्वात्, तद्विज्ञानमपि व्रीहिप्रोक्षणादिवत् विषयद्वारेण कर्मसंबन्ध्येव— इत्यतः, तस्मिन् अवगतप्रयोजने आत्मज्ञाने या फलश्रुतिः, सा अर्थवादः— इति जैमिनिराचार्यो मन्यते। यथा अन्येषु द्रव्यसंस्कारकर्मसु 'यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति' 'यदाङ्क्ते चक्षुरेव भ्रातृव्यस्य वृङ्क्ते' 'यत्प्रयाजानूयाजा इज्यन्ते, वर्म वा एतद्यज्ञस्य क्रियते वर्म यजमानाय भ्रातृव्याभिभूत्यै' इत्येवंजातीयका फलश्रुतिः अर्थवादः— तद्वत्। कथं पुनः अस्य अनारभ्याधीतस्य आत्मज्ञानस्य प्रकरणादीनामन्यतमेनापि हेतुना विना क्रतुप्रवेश आशङ्क्यते? कर्तृद्वारेण वाक्यात् तद्विज्ञानस्य क्रतुसंबन्ध इति चेत्, न, वाक्याद्विनियोगानुपपत्तेः— अव्यभिचारिणा हि केनचिद्द्वारेण अनारभ्याधीतानामपि वाक्यनिमित्तः क्रतुसंबन्धोऽवकल्पते; कर्ता तु व्यभिचारि द्वारम्, लौकिकवैदिककर्म-

साधारण्यात्; तस्मान्न तद्द्वारेण आत्मज्ञानस्य क्रतुसंबन्धसिद्धिरिति— न, व्यतिरेकविज्ञानस्य वैदिकेभ्यः कर्मभ्योऽन्यत्र अनुपयोगात्; न हि देहव्यतिरिक्तात्मज्ञानं लौकिकेषु कर्मसु उपयुज्यते, सर्वथा दृष्टार्थप्रवृत्त्युपपत्तेः; वैदिकेषु तु देहपातोत्तरकालफलेषु देहव्यतिरिक्तात्मज्ञानमन्तरेण प्रवृत्तिः नोपपद्यत इति, उपयुज्यते व्यतिरेकविज्ञानम् । ननु अपहतपाप्मत्वादिविशेषणात् असंसार्यात्मविषयम् औपनिषदं दर्शनं न प्रवृत्त्यङ्गं स्यात्— न, प्रियादिसंसूचितस्य संसारिण एव आत्मनो द्रष्टव्यत्वोपदेशात्; अपहतपाप्मत्वादि विशेषणं तु स्तुत्यर्थं भविष्यति । ननु तत्र तत्र प्रसाधितमेतत्—अधिकमसंसारि ब्रह्म जगत्कारणम्; तदेव च संसारिण आत्मनः पारमार्थिकं स्वरूपम् उपनिषत्सु उपदिश्यत इति—सत्यं प्रसाधितम्; तस्यैव तु स्थूणानिखननवत् फलद्वारेण आक्षेपसमाधाने क्रियेते दार्ढ्याय ॥

## आचारदर्शनात् ॥ ३ ॥

'जनको ह वैदेहो बहुदक्षिणेन यज्ञेनेजे' 'यक्ष्यमाणो वै भगवन्तोऽहमस्मि' इत्येवमादीनि ब्रह्मविदामपि अन्यपरेषु वाक्येषु कर्मसंबन्धदर्शनानि भवन्ति । तथा उद्दालकादीनामपि पुत्रानुशासनादिदर्शनात् गार्हस्थ्यसंबन्धोऽवगम्य-

ते। केवलाच्चेत् ज्ञानात् पुरुषार्थसिद्धिः स्यात्, किमर्थम् अनेकायाससमन्वितानि कर्माणि ते कुर्युः? 'अक्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत्' इति न्यायात् ॥

## तच्छ्रुतेः ॥ ४ ॥

'यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति' इति च कर्मशेषत्वश्रवणात् विद्याया न केवलायाः पुरुषार्थहेतुत्वम् ॥

## समन्वारम्भणात् ॥ ५ ॥

'तं विद्याकर्मणी समन्वारभेते' इति च विद्याकर्मणोः फलारम्भे साहित्यदर्शनात् न स्वातन्त्र्यं विद्यायाः ॥

## तद्वतो विधानात् ॥ ६ ॥

'आचार्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्य कुटुम्बे शुचौ देशे स्वाध्यायमधीयानः' इति च एवंजातीयका श्रुतिः समस्तवेदार्थविज्ञानवतः कर्माधिकारं दर्शयति; तस्मादपि न विज्ञानस्य स्वातन्त्र्येण फलहेतुत्वम्। ननु अत्र 'अधीत्य' इत्यध्ययनमात्रं वेदस्य श्रूयते, न अर्थविज्ञानम्— नैष दोषः; दृष्टार्थत्वात् वेदाध्ययनम् अर्थावबोधपर्यन्तमिति स्थितम् ॥

**नियमाच्च ॥ ७ ॥**

'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः । एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे' इति— तथा 'एतद्वै जरामर्यं सत्रं यदग्निहोत्रं जरया वा ह्येवास्मान्मुच्यते मृत्युना वा'— इत्येवंजातीयकात् नियमादपि कर्मशेषत्वमेव विद्याया इति ॥

एवं प्राप्ते, प्रतिविधत्ते—

**अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात् ॥ ८ ॥**

तु-शब्दात् पक्षो विपरिवर्तते । यदुक्तम् 'शेषत्वात्पुरुषार्थवादः' इति, तत् नोपपद्यते; कस्मात्? अधिकोपदेशात्; यदि संसार्येव आत्मा शारीरः कर्ता भोक्ता च शरीरमात्रव्यतिरेकेण वेदान्तेषु उपदिष्टः स्यात्, ततो वर्णितेन प्रकारेण फलश्रुतेरर्थवादत्वं स्यात्; अधिकस्तावत् शारीरादात्मनः असंसारी ईश्वरः कर्तृत्वादिसंसारिधर्मरहितोऽपहतपाप्मत्वादिविशेषणः परमात्मा वेद्यत्वेनोपदिश्यते वेदान्तेषु । न च तद्विज्ञानं कर्मणां प्रवर्तकं भवति, प्रत्युत कर्माण्युच्छिनत्ति— इति वक्ष्यति 'उपमर्दं च' इत्यत्र । तस्मात्

'पुरुषार्थोऽतः शब्दात्' इति यन्मतं भगवतो बादरायणस्य, तत् तथैव तिष्ठति; न शेषत्वप्रभृतिभिर्हेत्वाभासैश्चालयितुं शक्यते। तथा हि तमधिकं शारीरात् ईश्वरमात्मानं दर्शयन्ति श्रुतयः— 'यः सर्वज्ञः सर्ववित्' 'भीषास्माद्वातः पवते' 'महद्भयं वज्रमुद्यतम्' 'एतस्य वा अक्षरस्य प्रशासने गार्गि' 'तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत' इत्येवमाद्याः। यत्तु प्रियादिसंसूचितस्य संसारिण एव आत्मनो वेद्यतया अनुकर्षणम्— 'आत्मनस्तु कामाय सर्वं प्रियं भवति। आत्मा वा अरे द्रष्टव्यः' 'यः प्राणेन प्राणिति स त आत्मा सर्वान्तरः' 'य एषोऽक्षिणि पुरुषो दृश्यते' इत्युपक्रम्य 'एतं त्वेव ते भूयोऽनुव्याख्यास्यामि' इति चैवमादि— तदपि, 'अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदः' 'योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येति' 'परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुषः' इत्येवमादिभिर्वाक्यशेषैः सत्यामेव अधिकोपदिदिक्षायाम्, अत्यन्ताभेदाभिप्रायमित्यविरोधः। पारमेश्वरमेव हि शारीरस्य पारमार्थिकं स्वरूपम्; उपाधिकृतं तु शारीरत्वम्, 'तत्त्वमसि' 'नान्यदतोऽस्ति द्रष्टृ' इत्यादिश्रुतिभ्यः। सर्वं च एतत् विस्तरेणास्माभिः पुरस्तात् तत्र तत्र वर्णितम्॥

## तुल्यं तु दर्शनम् ॥ ९ ॥

यत्तूक्तम्—आचारदर्शनात्कर्मशेषो विद्येति, अत्र ब्रूमः— तुल्यमाचारदर्शनम् अकर्मशेषत्वेऽपि विद्यायाः । तथा हि श्रुतिर्भवति— 'एतद्ध स्म वै तद्विद्वांस आहुर्ऋषयः कावषेयाः किमर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामहे । एतद्ध स्म वै तत्पूर्वे विद्वांसोऽग्निहोत्रं न जुहवांचक्रिरे' 'एतं वै तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति' इत्येवंजातीयका । याज्ञवल्क्यादीनामपि ब्रह्मविदाम् अकर्मनिष्ठत्वं दृश्यते— 'एतावदरे खल्वमृतत्वमिति होक्त्वा याज्ञवल्क्यः प्रवव्राज' इत्यादिश्रुतिभ्यः । अपि च 'यक्ष्यमाणो वै भगवन्तोऽहमस्मि' इत्येतत् लिङ्गदर्शनं वैश्वानरविद्याविषयम्; संभवति च सोपाधिकायां ब्रह्मविद्यायां कर्मसाहित्यदर्शनम्; न तु अत्रापि कर्माङ्गत्वमस्ति, प्रकरणाद्यभावात् ॥

यत्पुनरुक्तम्— 'तच्छ्रुतेः' इति, अत्र ब्रूमः—

## असार्वत्रिकी ॥ १० ॥

'यदेव विद्यया करोति' इत्येषा श्रुतिर्न सर्वविद्याविषया,

प्रकृतविद्याभिसंबन्धात् । प्रकृता च उद्गीथविद्या— 'ओमित्ये-तदक्षरमुद्गीथमुपासीत' इत्यत्र ॥

## विभागः शतवत् ॥ ११ ॥

यदप्युक्तम्— 'तं विद्याकर्मणी समन्वारभेते' इत्येतत् समन्वारम्भवचनम् अस्वातन्त्र्ये विद्याया लिङ्गमिति, तत् प्रत्युच्यते— विभागोऽत्र द्रष्टव्यः— विद्या अन्यं पुरुषमन्वारभते, कर्म अन्यमिति । शतवत्— यथा शतम् आभ्यां दीयतामित्युक्ते विभज्य दीयते— पञ्चाशदेकस्मै पञ्चाशदपरस्मै, तद्वत् । न च इदं समन्वारम्भवचनं मुमुक्षुविषयम्— 'इति नु कामयमानः' इति संसारिविषयत्वोपसंहारात्, 'अथाकामयमानः' इति च मुमुक्षोः पृथगुपक्रमात्; तत्र संसारिविषये विद्या विहिता प्रतिषिद्धा च परिगृह्यते, विशेषाभावात्; कर्मापि विहितं प्रतिषिद्धं च, यथाप्राप्तानुवादित्वात्; एवं सति अविभागेनापि इदं समन्वारम्भवचनमवकल्पते ॥

यच्चैतत्— 'तद्वतो विधानात्' इति, अत उत्तरं पठति—

## अध्ययनमात्रवतः ॥ १२ ॥

'आचार्यकुलाद्वेदमधीत्य' इत्यत्र अध्ययनमात्रस्य श्रव-

णात् अध्ययनमात्रवत एव कर्मविधिरित्यध्यवस्यामः । ननु एवं सति अविद्यत्वात् अनधिकारः कर्मसु प्रसज्येत— नैष दोषः ; न वयम् अध्ययनप्रभवं कर्मावबोधनम् अधिकारकारणं वारयामः ; किं तर्हि औपनिषदमात्मज्ञानम् , स्वातन्त्र्येणैव प्रयोजनवत् प्रतीयमानम् , न कर्माधिकारकारणतां प्रतिपद्यते— इत्येतत्प्रतिपादयामः । यथा च न क्रत्वन्तरज्ञानं क्रत्वन्तराधिकारेण अपेक्ष्यते, एवमेतदपि द्रष्टव्यमिति ॥

यदप्युक्तम्— 'नियमाच्च' इति, अत्राभिधीयते—

## नाविशेषात् ॥ १३ ॥

'कुर्वन्नेवेह कर्माणि जिजीविषेत्' इत्येवमादिषु नियमश्रवणेषु न विदुष इति विशेषोऽस्ति, अविशेषेण नियमविधानात् ॥

## स्तुतयेऽनुमतिर्वा ॥ १४ ॥

'कुर्वन्नेवेह कर्माणि' इत्यत्र अपरो विशेष आख्यायते । यद्यपि अत्र प्रकरणसामर्थ्यात् विद्वानेव— कुर्वन्— इति संबध्येत, तथापि विद्यास्तुतये कर्मानुज्ञानम् एतद्द्रष्टव्यम् ; 'न कर्म लिप्यते नरे' इति हि वक्ष्यति । एतदुक्तं भवति — यावज्जीवं कर्म कुर्वत्यपि त्वयि विदुषि पुरुषे न कर्म

लेपाय भवति, विद्यासामर्थ्यादिति— तदेवं विद्या स्तूयते ॥

**कामकारेण चैके ॥ १५ ॥**

अपि च एके विद्वांसः प्रत्यक्षीकृतविद्याफलाः सन्तः, तदवष्टम्भात् फलान्तरसाधनेषु प्रजादिषु प्रयोजनाभावं परामृशन्ति कामकारेण— इति श्रुतिर्भवति वाजसनेयिनाम्— 'एतद्ध स्म वै तत्पूर्वे विद्वांसः प्रजां न कामयन्ते किं प्रजया करिष्यामो येषां नोऽयमात्मायं लोक इति'। अनुभवारूढमेव च विद्याफलं न क्रियाफलवत् कालान्तरभावि— इत्यसकृदवोचाम । अतोऽपि न विद्यायाः कर्मशेषत्वं नापि तद्विषयायाः फलश्रुतेरयथार्थत्वं शक्यमाश्रयितुम् ॥

**उपमर्दं च ॥ १६ ॥**

अपि च कर्माधिकारहेतोः क्रियाकारकफललक्षणस्य समस्तस्य प्रपञ्चस्य अविद्याकृतस्य विद्यासामर्थ्यात् स्वरूपोपमर्दमामनन्ति— 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्तत्केन कं जिघ्रेत्' इत्यादिना । वेदान्तोदितात्मज्ञानपूर्विकां तु कर्माधिकारसिद्धिं प्रत्याशासानस्य कर्माधिकारोच्छित्तिरेव प्रसज्येत । तस्मादपि स्वातन्त्र्यं विद्यायाः ॥

**ऊर्ध्वरेतःसु च शब्दे हि ॥ १७ ॥**

ऊर्ध्वरेतःसु च आश्रमेषु विद्या श्रूयते; न च तत्र कर्माङ्गत्वं विद्याया उपपद्यते, कर्माभावात्; न हि अग्निहोत्रादीनि वैदिकानि कर्माणि तेषां सन्ति। स्यादेतत्, ऊर्ध्वरेतस आश्रमा न श्रूयन्ते वेद इति—तदपि नास्ति; तेऽपि हि वैदिकेषु शब्देष्ववगम्यन्ते—'त्रयो धर्मस्कन्धाः' 'ये चेमेऽरण्ये श्रद्धा तप इत्युपासते' 'तपःश्रद्धे ये ह्युपवसन्त्यरण्ये' 'एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति' 'ब्रह्मचर्यादेव प्रव्रजेत्' इत्येवमादिषु। प्रतिपन्नाप्रतिपन्नगार्हस्थ्यानाम् अपाकृतानपाकृतर्णत्रयाणां च ऊर्ध्वरेतस्त्वं श्रुतिस्मृतिप्रसिद्धम्। तस्मादपि स्वातन्त्र्यं विद्यायाः॥

## परामर्शं जैमिनिरचोदना चापवदति हि ॥ १८ ॥

'त्रयो धर्मस्कन्धाः' इत्यादयो ये शब्दा ऊर्ध्वरेतसामाश्रमाणां सद्भावाय उदाहृताः, न ते तत्प्रतिपादनाय प्रभवन्ति;

२. परामर्शाधिकरणम्।

यतः परामर्शम् एषु शब्देष्वाश्रमान्तराणां जैमिनिराचार्यो मन्यते, न विधिम्। कुतः? न हि अत्र लिङादीनामन्यतमश्चोदनाशब्दोऽस्ति; अर्थान्तरपरत्वं च एषु प्रत्येकमुपलभ्यते। 'त्रयो धर्मस्कन्धाः' इत्यत्र तावत् 'यज्ञोऽध्ययनं दानमिति प्रथमस्तप

एव द्वितीयो ब्रह्मचार्याचार्यकुलवासी तृतीयोऽत्यन्तमात्मानमाचार्यकुलेऽवसादयन्सर्व एते पुण्यलोका भवन्ति' इति परामर्शपूर्वकमाश्रमाणामनात्यन्तिकफलत्वं संकीर्त्य, आत्यन्तिकफलतया ब्रह्मसंस्थता स्तूयते— 'ब्रह्मसंस्थोऽमृतत्वमेति' इति। ननु परामर्शेऽपि आश्रमा गम्यन्त एव–सत्यं गम्यन्ते; स्मृत्याचाराभ्यां तु तेषां प्रसिद्धिः, न प्रत्यक्षश्रुतेः; अतश्च प्रत्यक्षश्रुतिविरोधे सति अनादरणीयास्ते भविष्यन्ति, अनधिकृतविषया वा। ननु गार्हस्थ्यमपि सहैवोर्ध्वरेतोभिः परामृष्टम्– 'यज्ञोऽध्ययनं दानमिति प्रथमः' इति— सत्यमेवम्; तथापि तु गृहस्थं प्रत्येव अग्निहोत्रादीनां कर्मणां विधानात् श्रुतिप्रसिद्धमेव हि तदस्तित्वम्; तस्मात्स्तुत्यर्थ एव अयं परामर्शः, न चोदनार्थः। अपि च अपवदति हि प्रत्यक्षा श्रुतिराश्रमान्तरम्— 'वीरहा वा एष देवानां योऽग्निमुद्वासयते' 'आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः' 'नापुत्रस्य लोकोऽस्तीति तत्सर्वे पशवो विदुः' इत्येवमाद्या। तथा 'ये चेमेऽरण्ये श्रद्धा तप इत्युपासते' 'तपःश्रद्धे ये ह्युपवसन्त्यरण्ये' इति च देवयानोपदेशः, न आश्रमान्तरोपदेशः। संदिग्धं च आश्रमान्तराभिधानम्– 'तप एव द्वितीयः' इत्येवमादिषु। तथा 'एतमेव

प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति' इति लोकसंस्तवोऽयम्, न पारिव्राज्यविधिः । ननु 'ब्रह्मचर्यादेव प्रव्रजेत्' इति विस्पष्टमिदं प्रत्यक्षं पारिव्राज्यविधानं जाबालानाम्— सत्यमेवमेतत्; अनपेक्ष्य तु एतां श्रुतिम् अयं विचार इति द्रष्टव्यम् ॥

## अनुष्ठेयं बादरायणः साम्यश्रुतेः ॥ १९ ॥

अनुष्ठेयम् आश्रमान्तरं बादरायण आचार्यो मन्यते— वेदेऽश्रवणादग्निहोत्रादीनां च अवश्यानुष्ठेयत्वात् तद्विरोधादनधिकृतानुष्ठेयमाश्रमान्तरम्— इति हि इमां मतिं निराकरोति, गार्हस्थ्यवदेव आश्रमान्तरमपि अनिच्छता प्रतिपत्तव्यमिति मन्यमानः । कुतः? साम्यश्रुतेः; समा हि गार्हस्थ्येनाश्रमान्तरस्य परामर्शश्रुतिर्दृश्यते— 'त्रयो धर्मस्कन्धाः' इत्याद्या; यथा इह श्रुत्यन्तरविहितमेव गार्हस्थ्यं परामृष्टम्, एवमाश्रमान्तरमपीति प्रतिपत्तव्यम्—यथा च शास्त्रान्तरप्राप्तयोरेव निवीतप्राचीनावीतयोः परामर्श उपवीतविधिपरे वाक्ये; तस्मात् तुल्यमनुष्ठेयत्वं गार्हस्थ्येन आश्रमान्तरस्य । तथा 'एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति' इत्यस्य वेदानुवचनादिभिः समभिव्याहारः; 'ये चेमेऽरण्ये श्रद्धा तप इत्युपासते' इत्यस्य च पञ्चाग्निविद्यया । यत्तूक्तम्—

'तप एव द्वितीयः' इत्यादिष्वाश्रमान्तराभिधानं संदिग्धमिति; नैष दोषः, निश्चयकारणसद्भावात्; 'त्रयो धर्मस्कन्धाः' इति हि धर्मस्कन्धत्रित्वं प्रतिज्ञातम्; न च यज्ञादयो भूयांसो धर्मा उत्पत्तिभिन्नाः सन्तः अन्यत्राश्रमसंबन्धात् त्रित्वेऽन्तर्भावयितुं शक्यन्ते; तत्र यज्ञादिलिङ्गो गृहाश्रम एको धर्मस्कन्धो निर्दिष्टः, ब्रह्मचारीति च स्पष्ट आश्रमनिर्देशः, तप इत्यपि कोऽन्यस्तपःप्रधानादाश्रमात् धर्मस्कन्धोऽभ्युपगम्येत। 'ये चेमेऽरण्ये' इति च अरण्यलिङ्गात् श्रद्धातपोभ्यामाश्रमगृहीतिः। तस्मात् परामर्शेऽप्यनुष्ठेयमाश्रमान्तरम्॥

## विधिर्वा धारणवत्॥ २०॥

विधिर्वा अयमाश्रमान्तरस्य, न परामर्शमात्रम्। ननु विधित्वाभ्युपगमे एकवाक्यताप्रतीतिरुपरुध्येत; प्रतीयते च अत्र एकवाक्यता— पुण्यलोकफलास्त्रयो धर्मस्कन्धाः, ब्रह्मसंस्थता त्वमृतत्वफलेति— सत्यमेतत्; सतीमपि तु एकवाक्यताप्रतीतिं परित्यज्य विधिरेवाभ्युपगन्तव्यः, अपूर्वत्वात्, विध्यन्तरस्यादर्शनात्, विस्पष्टाच्चाश्रमान्तरप्रत्ययात् गुणवादकल्पनया एकवाक्यत्वयोजनानुपपत्तेः। धारणवत्— यथा 'अधस्तात्समिधं धारयन्ननुद्रवेदुपरि हि देवे-

भ्यो धारयति' इत्यत्र सत्यामप्यधोधारणेन एकवाक्यताप्रतीतौ, विधीयत एव उपरिधारणम्, अपूर्वत्वात्; तथा च उक्तं शेषलक्षणे 'विधिस्तु धारणेऽपूर्वत्वात्' इति; तद्वत् इहापि आश्रमपरामर्शश्रुतिः विधिरेवेति कल्प्यते ॥

यद्यपि परामर्श एवायमाश्रमान्तराणाम्, तथापि ब्रह्मसंस्थता तावत्, संस्तवसामर्थ्यादवश्यं विधेया अभ्युपगन्तव्या। सा च किं चतुर्ष्वाश्रमेषु यस्य कस्य चित्, आहोस्वित्परिव्राजकस्यैवेति विवेक्तव्यम्। यदि च ब्रह्मचर्यान्तेष्वाश्रमेषु परामृश्यमानेषु परिव्राजकोऽपि परामृष्टः, ततश्चतुर्णामप्याश्रमाणां परामृष्टत्वाविशेषात् अनाश्रमित्वानुपपत्तेश्च यः कश्चिच्चतुर्ष्वाश्रमेषु ब्रह्मसंस्थो भविष्यति; अथ न परामृष्टः, ततः परिशिष्यमाणः परिव्राडेव ब्रह्मसंस्थ इति सेत्स्यति। तत्र तपःशब्देन वैखानसग्राहिणा परामृष्टः परिव्राडपि इति केचित्। तदयुक्तम्; न हि सत्यां गतौ वानप्रस्थविशेषणेन परिव्राजको ग्रहणमर्हति; यथा अत्र ब्रह्मचारिगृहमेधिनौ असाधारणेनैव स्वेन स्वेन विशेषणेन विशेषितौ, एवं भिक्षुवैखानसावपीति युक्तम्; तपश्च असाधारणो धर्मो वानप्रस्थानां कायक्लेशप्रधानत्वात्, तपःशब्दस्य तत्र रूढेः; भिक्षोस्तु धर्म इन्द्रियसंयमादिः लक्षणयैव तपःशब्देना-

भिलष्येत। चतुष्ट्वेन च प्रसिद्धा आश्रमाः त्रित्वेन परामृश्यन्त इत्यन्याय्यम्। अपि च भेदव्यपदेशोऽत्र भवति—त्रय एते पुण्यलोकभाजः, एकोऽमृतत्वभागिति; पृथक्त्वे च भेदव्यपदेशोऽवकल्पते; न ह्येवं भवति—देवदत्तयज्ञदत्तौ मन्दप्रज्ञौ, अन्यतरस्त्वनयोर्महाप्रज्ञ इति; भवति त्वेवम्—देवदत्तयज्ञदत्तौ मन्दप्रज्ञौ, विष्णुमित्रस्तु महाप्रज्ञ इति; तस्मात् पूर्वे त्रय आश्रमिणः पुण्यलोकभाजः, परिशिष्यमाणः परिव्राट् अमृतत्वभाक्। कथं पुनः ब्रह्मसंस्थशब्दो योगात्प्रवर्तमानः सर्वत्र संभवन् परिव्राजक एवावतिष्ठेत? रूढ्यभ्युपगमे च आश्रममात्रादमृतत्वप्राप्तेर्ज्ञानानर्थक्यप्रसङ्ग इति— अत्रोच्यते— ब्रह्मसंस्थ इति हि ब्रह्मणि परिसमाप्तिः अनन्यव्यापारतारूपं तन्निष्ठत्वमभिधीयते; तच्च त्रयाणामाश्रमाणां न संभवति, स्वाश्रमविहितकर्माननुष्ठाने प्रत्यवायश्रवणात्; परिव्राजकस्य तु सर्वकर्मसंन्यासात् प्रत्यवायो न संभवति अननुष्ठाननिमित्तः; शमदमादिस्तु तदीयो धर्मो ब्रह्मसंस्थाया उपोद्बलकः, न विरोधी; ब्रह्मनिष्ठत्वमेव हि तस्य शमदमाद्युपबृंहितं स्वाश्रमविहितं कर्म; यज्ञादीनि च इतरेषाम्; तद्व्यतिक्रमे च तस्य प्रत्यवायः। तथा च 'न्यास इति ब्रह्मा ब्रह्मा हि परः परो हि ब्रह्मा। तानि वा एतान्यवराणि

तपांसि न्यास एवात्यरेचयत्’ ‘वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः’ इत्याद्याः श्रुतयः, स्मृतयश्च ‘तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः’ इत्याद्याः— ब्रह्मसंस्थस्य कर्माभावं दर्शयन्ति । तस्मात् परिव्राजकस्य आश्रममात्रादमृतत्वप्राप्तेर्ज्ञानानर्थक्यप्रसङ्ग इत्येषोऽपि दोषो नावतरति । तदेवं परामर्शेऽपि इतरेषामाश्रमाणाम्, पारिव्राज्यं तावद्ब्रह्मसंस्थतालक्षणं लभ्यतैव । अनपेक्ष्यैव जाबालश्रुतिमाश्रमान्तरविधायिनीम् अयमाचार्येण विचारः प्रवर्तितः; विद्यत एव तु आश्रमान्तरविधिश्रुतिः प्रत्यक्षा— ‘ब्रह्मचर्यं समाप्य गृही भवेद्गृही भूत्वा वनी भवेद्वनी भूत्वा प्रव्रजेत् । यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेद्गृहाद्वा वनाद्वा’ इति; न च इयं श्रुतिः अनधिकृतविषया शक्या वक्तुम्, अविशेषश्रवणात्, पृथग्विधानाच्च अनधिकृतानाम्—‘अथ पुनरेव व्रती वाव्रती वा स्नातको वास्नातको वोत्सन्नाग्निरनग्निको वा’ इत्यादिना; ब्रह्मज्ञानपरिपाकाङ्गत्वाच्च पारिव्राज्यस्य न अनधिकृतविषयत्वम्, तच्च दर्शयति—‘अथ परिव्राड्विवर्णवासा मुण्डोऽपरिग्रहः शुचिरद्रोही भैक्षाणो ब्रह्मभूयाय भवति’ इति । तस्मात्सिद्धा ऊर्ध्वरेतसामाश्रमाः । सिद्धं च ऊर्ध्वरेतःसु विधानाद्विद्यायाः स्वातन्त्र्यमिति ॥

## स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् ॥ २१ ॥

३. स्तुतिमात्राधिकरणम्।

'स एष रसानां रसतमः परमः परार्ध्योऽष्टमो यदुद्गीथः' 'इयमेवर्गग्निः साम' 'अयं वाव लोकः, एषोऽग्निश्चितः, तदिदमेवोक्थम्, इयमेव पृथिवी' इत्येवंजातीयकाः श्रुतयः किमुद्गीथादेः स्तुत्यर्थाः, आहोस्वित् उपासनाविध्यर्था इत्यस्मिन्संशये—स्तुत्यर्था इति युक्तम्, उद्गीथादीनि कर्माङ्गान्युपादाय श्रवणात्; यथा 'इयमेव जुहूरादित्यः कूर्मः स्वर्गो लोक आहवनीयः' इत्याद्या जुह्वादिस्तुत्यर्थाः, तद्वत्—इति चेत्, नेत्याह; न हि स्तुतिमात्रमासां श्रुतीनां प्रयोजनं युक्तम्, अपूर्वत्वात्; विध्यर्थतायां हि अपूर्वोऽर्थो विहितो भवति; स्तुत्यर्थतायां त्वानर्थक्यमेव स्यात्; विधायकस्य हि शब्दस्य वाक्यशेषभावं प्रतिपद्यमाना स्तुतिरुपयुज्यत इत्युक्तम् 'विधिना त्वेकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्युः' इत्यत्र; प्रदेशान्तरविहितानां तु उद्गीथादीनाम् इयं प्रदेशान्तरपठिता स्तुतिः वाक्यशेषभावमप्रतिपद्यमाना अनर्थिकैव स्यात्; 'इयमेव जुहूः' इत्यादि तु विधिसंनिधावेवाम्नातमिति वैषम्यम्। तस्मात् विध्यर्था एव एवंजातीयकाः श्रुतयः ॥

## भावशब्दाच्च ॥ २२ ॥

'उद्गीथमुपासीत' 'सामोपासीत' 'अहमुक्थमस्मीति विद्यात्' इत्यादयश्च विस्पष्टा विधिशब्दाः श्रूयन्ते; ते च स्तुतिमात्रप्रयोजनतायां व्याहन्येरन् । तथा च न्यायविदां स्मरणम्— 'कुर्यात्क्रियेत कर्तव्यं भवेत्स्यादिति पञ्चमम् । एतत्स्यात्सर्ववेदेषु नियतं विधिलक्षणम्' इति; लिङाद्यर्थो विधिरिति मन्यमानास्त एवं स्मरन्ति। प्रतिप्रकरणं च फलानि श्राव्यन्ते— 'आपयिता ह वै कामानां भवति' 'एष ह्येव कामागानस्येष्टे' 'कल्पन्ते हास्मै लोका ऊर्ध्वाश्चावृत्ताश्च' इत्यादीनि; तस्मादप्युपासनविधानार्था उद्गीथादिश्रुतयः ॥

## पारिप्लवार्था इति चेन्न विशेषितत्वात् ॥ २३ ॥

'अथ ह याज्ञवल्क्यस्य द्वे भार्ये बभूवतुर्मैत्रेयी च कात्यायनी च' 'प्रतर्दनो ह वै दैवोदासिरिन्द्रस्य प्रियं धामो-
४. पारिप्लवाधिकरणम् । पजगाम' 'जानश्रुतिर्ह पौत्रायणः श्रद्धादेयो बहुदायी बहुपाक्य आस' इत्येवमादिषु वेदान्तपठितेष्वाख्यानेषु संशयः— किमिमानि पारिप्लवप्रयोगार्थानि, आहोस्वित्संनिहितविद्याप्रतिपत्त्यर्थानीति । पा-

रिप्लवार्था इमा आख्यानश्रुतयः, आख्यानसामान्यात्, आख्यानप्रयोगस्य च पारिप्लवे चोदितत्वात्; ततश्च विद्याप्रधानत्वं वेदान्तानां न स्यात्, मन्त्रवत् प्रयोगशेषत्वादिति चेत् —तन्न; कस्मात्? विशेषितत्वात्— 'पारिप्लवमाचक्षीत' इति हि प्रकृत्य, 'मनुर्वैवस्वतो राजा' इत्येवमादीनि कानिचिदेव आख्यानानि तत्र विशेष्यन्ते; आख्यानसामान्याच्चेत् सर्वगृहीतिः स्यात्, अनर्थकमेवेदं विशेषणं भवेत्। तस्मात् न पारिप्लवार्था एता आख्यानश्रुतयः॥

## तथा चैकवाक्यतोपबन्धात् ॥ २४ ॥

असति च पारिप्लवार्थत्वे आख्यानानां संनिहितविद्याप्रतिपादनोपयोगितैव न्याय्या, एकवाक्यतोपबन्धात्; तथा हि तत्र तत्र संनिहिताभिर्विद्याभिरेकवाक्यता दृश्यते प्ररोचनोपयोगात् प्रतिपत्तिसौकर्योपयोगाच्च—मैत्रेयीब्राह्मणे तावत्—'आत्मा वा अरे द्रष्टव्यः' इत्याद्यया विद्यया एकवाक्यता दृश्यते; प्रातर्दनेऽपि 'प्राणोऽस्मि प्रज्ञात्मा' इत्याद्यया; 'जानश्रुतिः' इत्यत्रापि 'वायुर्वाव संवर्गः' इत्याद्यया —यथा 'स आत्मनो वपामुदखिदत्' इत्येवमादीनां कर्मश्रुतिगतानामाख्यानानां संनिहितविधिस्तुत्यर्थता, तद्वत्। तस्मान्न पारिप्लवार्थत्वम्॥

## अत एव चाग्नीन्धनाद्यनपेक्षा ॥ २५ ॥

'पुरुषार्थोऽतः शब्दात्' इत्येतत् व्यवहितमपि संभवात्
५. अग्नीन्धनाद्य- 'अतः' इति परामृश्यते । अत एव च
धिकरणम् । विद्यायाः पुरुषार्थहेतुत्वात् अग्नीन्धनादीन्याश्रमकर्माणि विद्यया स्वार्थसिद्धौ नापेक्षितव्यानीति आद्यस्यैवाधिकरणस्य फलमुपसंहरत्यधिकविवक्षया ॥

## सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् ॥ २६ ॥

इदमिदानीं चिन्त्यते— किं विद्याया अत्यन्तमेवानपेक्षा आश्रमकर्मणाम्, उत अस्ति काचिदपेक्षेति । तत्र अत
६. सर्वापेक्षाधि- एवाग्नीन्धनादीन्याश्रमकर्माणि विद्यया स्वा-
करणम् । र्थसिद्धौ नापेक्ष्यन्ते; एवमत्यन्तमेवानपेक्षायां प्राप्तायाम्, इदमुच्यते— सर्वापेक्षा चेति; अपेक्षते च विद्या सर्वाण्याश्रमकर्माणि, नात्यन्तमनपेक्षैव । ननु विरुद्धमिदं वचनम्— अपेक्षते च आश्रमकर्माणि विद्या, नापेक्षते चेति । नेति ब्रूमः; उत्पन्ना हि विद्या फलसिद्धिं प्रति न किंचिदन्यदपेक्षते, उत्पत्तिं प्रति तु अपेक्षते; कुतः? यज्ञादिश्रुतेः; तथा हि श्रुतिः— 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेन' इति, यज्ञादीनां विद्यासाधनभावं दर्शयति; विविदिषासंयोगाच्चै-

षामुत्पत्तिसाधनभावोऽवसीयते ; 'अथ यद्यज्ञ इत्याचक्षते ब्रह्मचर्यमेव तत्' इत्यत्र च विद्यासाधनभूतस्य ब्रह्मचर्यस्य यज्ञादिभिः संस्तवात् यज्ञादीनामपि हि साधनभावः सूच्यते ; 'सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति । यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीमि' इत्येवमाद्या च श्रुतिः आश्रमकर्मणां विद्यासाधनभावं सूचयति ; स्मृतिरपि— 'कषायपक्तिः कर्माणि ज्ञानं तु परमा गतिः । कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्तते' इत्येवमाद्या । अश्ववदिति योग्यतानिदर्शनम्— यथा च योग्यतावशेन अश्वो न लाङ्गलाकर्षणे युज्यते, रथचर्यायां तु युज्यते, एवमाश्रमकर्माणि विद्यया फलसिद्धौ नापेक्ष्यन्ते, उत्पत्तौ च अपेक्ष्यन्त इति ॥

## शमदमाद्युपेतः स्यात्तथापि तु तद्विधेस्तदङ्गतया तेषामवश्यानुष्ठेयत्वात् ॥ २७ ॥

यदि कश्चिन्मन्येत— यज्ञादीनां विद्यासाधनभावो न न्याय्यः, विध्यभावात् ; 'यज्ञेन विविदिषन्ति' इत्येवंजातीयका हि श्रुतिः अनुवादस्वरूपा विद्याभिष्टवपरा, न यज्ञादिविधिपरा—इत्थं महाभागा विद्या, यत् यज्ञादिभिरेतामवाप्तुमिच्छन्तीति—तथापि तु शमदमाद्युपेतः स्यात् विद्यार्थी, 'तस्मा-

देवंविच्छान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्ये-वात्मानं पश्यति' इति विद्यासाधनत्वेन शमदमादीनां विधानात् विहितानां च अवश्यानुष्ठेयत्वात् । ननु अत्रापि शमाद्युपेतो भूत्वा पश्यतीति वर्तमानापदेश उपलभ्यते, न विधिः— नेति ब्रूमः, 'तस्मात्' इति प्रकृतप्रशंसापरिग्रहाद्विधित्वप्रतीतेः; 'पश्येत्' इति च माध्यंदिना विस्पष्टमेव विधिमधीयते । तस्मात् यज्ञाद्यनपेक्षायामपि शमादीन्यपेक्षितव्यानि । यज्ञादीन्यपि तु अपेक्षितव्यानि, यज्ञादिश्रुतेरेव । ननु उक्तम्—यज्ञादिभिर्विविदिषन्तीत्यत्र न विधिरुपलभ्यत इति— सत्यमुक्तम्; तथापि तु अपूर्वत्वात्संयोगस्य विधिः परिकल्प्यते ; न हि अयं यज्ञादीनां विविदिषासंयोगः पूर्वं प्राप्तः, येनानूद्येत ; 'तस्मात्पूषा प्रपिष्टभागोऽदन्तको हि' इत्येवमादिषु च अश्रुतविधिकेष्वपि वाक्येषु अपूर्वत्वाद्विधिं परिकल्प्य, 'पौष्णं पेषणं विकृतौ प्रतीयेत'— इत्यादिविचारः प्रथमे तन्त्रे प्रवर्तितः ; तथा च उक्तम् 'विधिर्वा धारणवत्' इति । स्मृतिष्वपि भगवद्गीताद्यासु अनभिसंधाय फलम् अनुष्ठितानि यज्ञादीनि मुमुक्षोर्ज्ञानसाधनानि भवन्तीति प्रपञ्चितम् । तस्माद्यज्ञादीनि शमदमादीनि च यथाश्रमं सर्वाण्येव आश्रमकर्माणि विद्योत्पत्तावपेक्षितव्यानि । तत्रापि 'एवंवित्' इति विद्यासंयो-

गात् प्रत्यासन्नानि विद्यासाधनानि शमादीनि, विविदिषासंयोगात्तु बाह्यतराणि यज्ञादीनीति विवेक्तव्यम् ॥

## सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् ॥ २८ ॥

७. सर्वान्नानुमत्यधिकरणम् ।

प्राणसंवादे श्रूयते छन्दोगानाम्—'न ह वा एवंविदि किंचनानन्नं भवति' इति ; तथा वाजसनेयिनाम्— 'न ह वा अस्यानन्नं जग्धं भवति नानन्नं प्रतिगृहीतम्' इति ; सर्वमस्यादनीयमेव भवतीत्यर्थः । किमिदं सर्वान्नानुज्ञानं शमादिवत् विद्याङ्गं विधीयते, उत स्तुत्यर्थं संकीर्त्यत इति संशये—विधिरिति तावत्प्राप्तम् ; तथा हि प्रवृत्तिविशेषकर उपदेशो भवति ; अतः प्राणविद्यासंनिधानात् तदङ्गत्वेन इयं नियमनिवृत्तिरुपदिश्यते । ननु एवं सति भक्ष्याभक्ष्यविभागशास्त्रव्याघातः स्यात्—नैष दोषः, सामान्यविशेषभावात् बाधोपपत्तेः ; यथा प्राणिहिंसाप्रतिषेधस्य पशुसंज्ञपनविधिना बाधः, यथा च 'न कांचन स्त्रियं परिहरेत्तद्व्रतम्' इत्यनेन वामदेव्यविद्याविषयेण सर्वस्त्र्यपरिहारवचनेन सामान्यविषयं गम्यागम्यविभागशास्त्रं बाध्यते—एवमनेनापि प्राणविद्याविषयेण सर्वान्नभक्षणवचनेन भक्ष्याभक्ष्यविभागशास्त्रं बाध्येतेत्येवं प्राप्ते—

ब्रूमः—नेदं सर्वान्नानुज्ञानं विधीयत इति ; न हि अत्र विधायकः शब्द उपलभ्यते, 'न ह वा एवंविदि किंचनानन्नं भवति' इति वर्तमानापदेशात् । न च असत्यामपि विधिप्रतीतौ प्रवृत्तिविशेषकरत्वलोभेनैव विधिरभ्युपगन्तुं शक्यते । अपि च श्वादिमर्यादं प्राणस्यान्नमित्युक्त्वा, इदमुच्यते—नैवंविदः किंचिदनन्नं भवतीति; न च श्वादिमर्यादमन्नं मानुषेण देहेनोपभोक्तुं शक्यते ; शक्यते तु प्राणस्यान्नमिदं सर्वमिति विचिन्तयितुम् । तस्मात् प्राणान्नविज्ञानप्रशंसार्थोऽयमर्थवादः, न सर्वान्नानुज्ञानविधिः । तद्दर्शयति—'सर्वान्नानुमतिश्च प्राणात्यये' इति ; एतदुक्तं भवति—प्राणात्यय एव हि परस्यामापदि सर्वमन्नमदनीयत्वेनाभ्यनुज्ञायते, तद्दर्शनात् ; तथा हि श्रुतिः चाक्रायणस्य ऋषेः कष्टायामवस्थायाम् अभक्ष्यभक्षणे प्रवृत्तिं दर्शयति 'मटचीहतेषु कुरुषु' इत्यस्मिन् ब्राह्मणे— चाक्रायणः किल ऋषिः आपद्गतः इभ्येन सामिखादितान्कुल्माषांश्चखाद ; अनुपानं तु तदीयम् उच्छिष्टदोषात्प्रत्याचचक्षे ; कारणं चात्रोवाच 'न वा अजीविष्यमिमानखादन्' इति, 'कामो म उदपानम्' इति च ; पुनश्च उत्तरेद्युः तानेव स्वपरोच्छिष्टान्पर्युषितान्कुल्माषान् भक्षयांबभूव— इति ; तदेतत् उच्छिष्टोच्छिष्टपर्युषितभक्षणं

दर्शयन्त्याः श्रुतेः आशयातिशयो लक्ष्यते– प्राणात्ययप्रसङ्गे प्राणसंधारणाय अभक्ष्यमपि भक्षयितव्यमिति; स्वस्थावस्थायां तु तन्न कर्तव्यं विद्यावतापि– इत्यनुपानप्रत्याख्यानाद्गम्यते। तस्मात् अर्थवादः 'न ह वा एवंविदि' इत्येवमादिः ॥

## अबाधाच्च ॥ २९ ॥

एवं च सति 'आहारशुद्धौ सत्त्वशुद्धिः' इत्येवमादि भक्ष्याभक्ष्यविभागशास्त्रम् अबाधितं भविष्यति ॥

## अपि च स्मर्यते ॥ ३० ॥

अपि च आपदि सर्वान्नभक्षणमपि स्मर्यते विदुषोऽविदुषश्च अविशेषेण—'जीवितात्ययमापन्नो योऽन्नमत्ति यतस्ततः। लिप्यते न स पापेन पद्मपत्रमिवाम्भसा' इति। तथा 'मद्यं नित्यं ब्राह्मणः' 'सुरापस्य ब्राह्मणस्योष्णामासिञ्चेयुः', 'सुरापाः कृमयो भवन्त्यभक्ष्यभक्षणात्' इति च–स्मर्यते वर्जनमनन्नस्य ॥

## शब्दश्चातोऽकामकारे ॥ ३१ ॥

शब्दश्च अनन्नस्य प्रतिषेधकः कामकारनिवृत्तिप्रयोजनः कठानां संहितायां श्रूयते—'तस्माद्ब्राह्मणः सुरां न पिबेत्' इति। सोऽपि 'न ह वा एवंविदि' इत्यस्यार्थवादत्वात् उपप-

न्तरो भवति । तस्मादेवंजातीयका अर्थवादा न विधय इति ॥

## विहितत्वाच्चाश्रमकर्मापि ॥ ३२ ॥

'सर्वापेक्षा च' इत्यत्र आश्रमकर्मणां विद्यासाधनत्वमवधारितम्; इदानीं तु किममुमुक्षोरप्याश्रममात्रनिष्ठस्य विद्यामकामयमानस्य तान्यनुष्ठेयानि, उताहो नेति चिन्त्यते । तत्र 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति' इत्यादिना आश्रमकर्मणां विद्यासाधनत्वेन विहितत्वात् विद्यामनिच्छतः फलान्तरं कामयमानस्य नित्यान्यननुष्ठेयानि; अथ तस्याप्यनुष्ठेयानि, न तर्हि एषां विद्यासाधनत्वम्, नित्यानित्यसंयोगविरोधात्—इत्यस्यां प्राप्तौ, पठति— आश्रममात्रनिष्ठस्याप्यमुमुक्षोः कर्तव्यान्येव नित्यानि कर्माणि, 'यावज्जीवमग्निहोत्रं जुहोति' इत्यादिना विहितत्वात्; न हि वचनस्यातिभारो नाम कश्चिदस्ति ॥

८. आश्रमकर्माधिकरणम् ।

अथ यदुक्तम्— नैवं सति विद्यासाधनत्वमेषां स्यादिति, अत उत्तरं पठति—

## सहकारित्वेन च ॥ ३३ ॥

विद्यासहकारीणि च एतानि स्युः, विहितत्वादेव 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति' इत्यादिना; तदुक्तम्—

'सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्' इति । न चेदं विद्यासहकारित्ववचनमाश्रमकर्मणां प्रयाजादिवत् विद्याफलविषयं मन्तव्यम्, अविधिलक्षणत्वाद्विद्यायाः, असाध्यत्वाच्च विद्याफलस्य; विधिलक्षणं हि साधनं दर्शपूर्णमासादि स्वर्गफलसिषाधयिषया सहकारिसाधनान्तरम् अपेक्षते, नैवं विद्या; तथा चोक्तम्—'अत एव चाग्नीन्धनाद्यनपेक्षा' इति; तस्मादुत्पत्तिसाधनत्व एव एषां सहकारित्ववाचोयुक्तिः । न च अत्र नित्यानित्यसंयोगविरोध आशङ्क्यः, कर्माभेदेऽपि संयोगभेदात्; नित्यो हि एकः संयोगो यावज्जीवादिवाक्यकल्पितः, न तस्य विद्याफलत्वम्; अनित्यस्तु अपरः संयोगः 'तमेतं वेदानुवचनेन' इत्यादिवाक्यकल्पितः, तस्य विद्याफलत्वम्—यथा एकस्यापि खादिरत्वस्य नित्येन संयोगेन क्रत्वर्थत्वम्, अनित्येन संयोगेन पुरुषार्थत्वम्, तद्वत् ॥

## सर्वथापि त एवोभयलिङ्गात् ॥ ३४ ॥

सर्वथापि आश्रमकर्मत्वपक्षे विद्यासहकारित्वपक्षे च, त एव अग्निहोत्रादयो धर्मा अनुष्ठेयाः । 'त एव' इत्यवधारयन्नाचार्यः किं निवर्तयति? कर्मभेदशङ्कामिति ब्रूमः; यथा कुण्डपायिनामयने 'मासमग्निहोत्रं जुह्वति' इत्यत्र नित्यादग्निहोत्रात्कर्मान्तरमुपदिश्यते, नैवमिह कर्मभेदोऽस्तीत्यर्थः ।

कुतः? उभयलिङ्गात्— श्रुतिलिङ्गात्स्मृतिलिङ्गाच्च । श्रुतिलिङ्गं तावत्— 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति' इति सिद्धवदुत्पन्नरूपाण्येव यज्ञादीनि विविदिषायां विनियुङ्क्ते, न तु 'जुहोति' इत्यादिवत् अपूर्वमेषां रूपमुत्पादयतीति । स्मृतिलिङ्गमपि— 'अनाश्रितः कर्मफलं कार्यं कर्म करोति यः' इति विज्ञातकर्तव्यताकमेव कर्म विद्योत्पत्त्यर्थं दर्शयति; 'यस्यैतेऽष्टाचत्वारिंशत्संस्काराः' इत्याद्या च संस्कारत्वप्रसिद्धिः वैदिकेषु कर्मसु तत्संस्कृतस्य विद्योत्पत्तिमभिप्रेत्य स्मृतौ भवति । तस्मात्साध्विदम् अभेदावधारणम् ॥

## अनभिभवं च दर्शयति ॥ ३५ ॥

सहकारित्वस्यैव एतदुपोद्बलकं लिङ्गदर्शनम् । अनभिभवं च दर्शयति श्रुतिः ब्रह्मचर्यादिसाधनसंपन्नस्य रागादिभिः क्लेशैः— 'एष ह्यात्मा न नश्यति यं ब्रह्मचर्येणानुविन्दते' इत्यादिना । तस्मात् यज्ञादीन्याश्रमकर्माणि च भवन्ति विद्यासहकारीणि चेति स्थितम् ॥

## अन्तरा चापि तु तद्दृष्टेः ॥ ३६ ॥

विधुरादीनां द्रव्यादिसंपद्रहितानां च अन्यतमाश्रमप्रतिपत्तिहीनानामन्तरालवर्तिनां किं विद्यायामधिकारोऽस्ति, किं-

वा नास्ति— इति संशये, नास्तीति तावत्प्राप्तम्, आश्रमकर्मणां विद्याहेतुत्वावधारणात्, आश्रमकर्मासंभवाच्चैतेषाम्— इत्येवं प्राप्ते, इदमाह— अन्तरा चापि तु— अनाश्रमित्वेन वर्तमानोऽपि विद्यायामधिक्रियते; कुतः? तद्दृष्टेः— रैक्वावाचक्नवीप्रभृतीनामेवंभूतानामपि ब्रह्मवित्त्वश्रुत्युपलब्धेः ॥

९. विधुराधिकरणम्।

## अपि च स्मर्यते ॥ ३७ ॥

संवर्तप्रभृतीनां च नग्नचर्यादियोगात् अनपेक्षिताश्रमकर्मणामपि महायोगित्वं स्मर्यते इतिहासे ॥

ननु लिङ्गमिदं श्रुतिस्मृतिदर्शनमुपन्यस्तम्; का नु खलु प्राप्तिरिति, सा अभिधीयते—

## विशेषानुग्रहश्च ॥ ३८ ॥

तेषामपि च विधुरादीनाम् अविरुद्धैः पुरुषमात्रसंबन्धिभिर्जपोपवासदेवताराधनादिभिर्धर्मविशेषैरनुग्रहो विद्यायाः संभवति। तथा च स्मृतिः— 'जप्येनैव तु संसिध्येद्ब्राह्मणो नात्र संशयः। कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते' इति असंभवदाश्रमकर्मणोऽपि जप्येऽधिकारं दर्शयति। जन्मान्तरानुष्ठितैरपि च आश्रमकर्मभिः संभवत्येव विद्याया

अनुग्रहः; तथा च स्मृतिः— 'अनेकजन्मसंसिद्धस्ततो याति परां गतिम्' इति जन्मान्तरसंचितानपि संस्कारविशेषान् अनुग्रहीतॄन् विद्यायां दर्शयति। दृष्टार्था च विद्या प्रतिषेधाभावमात्रेणापि अर्थिनमधिकरोति श्रवणादिषु। तस्मात् विधुरादीनामप्यधिकारो न विरुध्यते॥

## अतस्त्वितरज्ज्यायो लिङ्गाच्च ॥ ३९ ॥

अतस्तु अन्तरालवर्तित्वात् इतरत् आश्रमवर्तित्वं ज्यायो विद्यासाधनम्, श्रुतिस्मृतिसंदृब्धत्वात्; श्रुतिलिङ्गाच्च— 'तेनैति ब्रह्मवित्पुण्यकृत्तैजसश्च' इति; 'अनाश्रमी न तिष्ठेत दिनमेकमपि द्विजः। संवत्सरमनाश्रमी स्थित्वा कृच्छ्रमेकं चरेत्' इति च स्मृतिलिङ्गात्॥

## तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमातद्रूपाभावेभ्यः ॥ ४० ॥

१०. तद्भूताधिकरणम्।

सन्ति ऊर्ध्वरेतस आश्रमा इति स्थापितम्; तांस्तु प्राप्तस्य कथंचित् ततः प्रच्युतिरस्ति, नास्ति वेति संशयः। पूर्वधर्मस्वनुष्ठानचिकीर्षया वा रागादिवशेन वा प्रच्युतोऽपि स्यात् विशेषाभावादित्येवं प्राप्ते, उच्यते—तद्भूतस्य तु प्रतिपन्नोर्ध्वरेतोभावस्य न कथं-

चिदपि अतद्भावः, न ततः प्रच्युतिः स्यात्; कुतः? नियमातद्रूपाभावेभ्यः। तथा हि—'अत्यन्तमात्मानमाचार्यकुलेऽवसादयन्' इति, 'अरण्यमियादिति पदं ततो न पुनरेयादित्युपनिषत्' इति, 'आचार्येणाभ्यनुज्ञातश्चतुर्णामेकमाश्रमम्। आ विमोक्षाच्छरीरस्य सोऽनुतिष्ठेद्यथाविधि' इति च एवंजातीयको नियमः प्रच्युत्यभावं दर्शयति। यथा च 'ब्रह्मचर्यं समाप्य गृही भवेत्' 'ब्रह्मचर्यादेव प्रव्रजेत्' इति च एवमादीनि आरोहरूपाणि वचांस्युपलभ्यन्ते, नैवं प्रत्यवरोहरूपाणि। न चैवमाचाराः शिष्टा विद्यन्ते। यत्तु पूर्वधर्मस्वनुष्ठानचिकीर्षया प्रत्यवरोहणमिति, तदसत्—'श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्' इति स्मरणात्, न्यायाच्च— यो हि यं प्रति विधीयते स तस्य धर्मः, न तु यो येन स्वनुष्ठातुं शक्यते, चोदनालक्षणत्वाद्धर्मस्य। न च रागादिवशात्प्रच्युतिः, नियमशास्त्रस्य बलीयस्त्वात्। जैमिनेरपीति अपिशब्देन जैमिनिबादरायणयोरत्र संप्रतिपत्तिं शास्ति प्रतिपत्तिदाढ्यार्य॥

## न चाधिकारिकमपि पतनानुमानात्तदयोगात्॥ ४१॥

यदि नैष्ठिको ब्रह्मचारी प्रमादादवकीर्येत, किं तस्य

'ब्रह्मचार्यवकीर्णी नैर्ऋतं गर्दभमालभेत' इत्येतत्प्रायश्चित्तं
११. आधिका- स्यात्, उत नेति । नेत्युच्यते; यदपि अ-
रिकाधि- धिकारलक्षणे निर्णीतं प्रायश्चित्तम् 'अव-
करणम्। कीर्णिपशुश्च तद्वदाधानस्याप्राप्तकालत्वात्'
इति, तदपि न नैष्ठिकस्य भवितुमर्हति; किं कारणम्? 'आरूढो नैष्ठिकं धर्मं यस्तु प्रच्यवते पुनः । प्रायश्चित्तं न पश्यामि येन शुध्येत्स आत्महा' इति अप्रतिसमाधेयपतनस्मरणात् छिन्नशिरस इव प्रतिक्रियानुपपत्तेः; उपकुर्वाणस्य तु तादृकपतनस्मरणाभावादुपपद्यते तत्प्रायश्चित्तम् ॥

## उपपूर्वमपि त्वेके भावमशनवत्तदुक्तम् ॥ ४२ ॥

अपि तु एके आचार्या उपपातकमेवैतदिति मन्यन्ते; यत् नैष्ठिकस्य गुरुदारादिभ्योऽन्यत्र ब्रह्मचर्यं विशीर्येत, न तत् महापातकं भवति, गुरुतल्पादिषु महापातकेष्वपरिगणनात्; तस्मात् उपकुर्वाणवत् नैष्ठिकस्यापि प्रायश्चित्तस्य भावमिच्छन्ति, ब्रह्मचारित्वाविशेषात् अवकीर्णित्वाविशेषाच्च; अशनवत्—यथा ब्रह्मचारिणो मधुमांसाशने व्रतलोपः पुनः संस्कारश्च, एवमिति । ये हि प्रायश्चित्तस्याभावमिच्छन्ति, तेषां न मूलमुपलभ्यते; ये तु भावमिच्छन्ति, तेषां 'ब्रह्म-

चार्यवकीर्णी' इत्येतदविशेषश्रवणं मूलम्; तस्मात् भावो युक्ततरः; तदुक्तं प्रमाणलक्षणे—'समा विप्रतिपत्तिः स्यात्' 'शास्त्रस्था वा तन्निमित्तत्वात्' इति; प्रायश्चित्ताभावस्मरणं तु एवं सति यत्नगौरवोत्पादनार्थमिति व्याख्यातव्यम्। एवं भिक्षुवैखानसयोरपि—'वानप्रस्थो दीक्षाभेदे कृच्छ्रं द्वादशरात्रं चरित्वा महाकक्षं वर्धयेत्' 'भिक्षुर्वानप्रस्थवत्सोमवृद्धिवर्जं स्वशास्त्रसंस्कारश्च' इत्येवमादि प्रायश्चित्तस्मरणम् अनुसर्तव्यम्॥

## बहिस्तूभयथापि स्मृतेराचाराच्च॥ ४३॥

यदि ऊर्ध्वरेतसां स्वाश्रमेभ्यः प्रच्यवनं महापातकम्, यदि वा उपपातकम्, उभयथापि शिष्टैस्ते बहिष्कर्तव्याः—

१२. बहिरधिकरणम्।

'आरूढो नैष्ठिकं धर्मं यस्तु प्रच्यवते पुनः। प्रायश्चित्तं न पश्यामि येन शुध्येत्स आत्महा' इति, 'आरूढपतितं विप्रं मण्डलाच्च विनिःसृतम्। उद्बद्धं कृमिदष्टं च स्पृष्ट्वा चान्द्रायणं चरेत्' इति च एवमादिनिन्दातिशयस्मृतिभ्यः, शिष्टाचाराच्च— न हि यज्ञाध्ययनविवाहादीनि तैः सह आचरन्ति शिष्टाः॥

## स्वामिनः फलश्रुतेरित्यात्रेयः॥ ४४॥

अङ्गेषूपासनेषु संशयः— किं तानि यजमानकर्माणि

आहोस्वित् ऋत्विक्कर्माणीति। किं तावत्प्राप्तम्? यजमानकर्माणीति; कुतः? फलश्रुतेः; फलं हि श्रूयते— 'वर्षति हास्मै वर्षयति ह य एतदेवं विद्वान्वृष्टौ पञ्चविधं सामोपास्ते' इत्यादि; तच्च स्वामिगामि न्याय्यम्, तस्य साङ्गे प्रयोगेऽधिकृतत्वात्, अधिकृताधिकारत्वाच्च एवंजातीयकस्य; फलं च कर्तरि उपासनानां श्रूयते— 'वर्षत्यस्मै य उपास्ते' इत्यादि। ननु ऋत्विजोऽपि फलं दृष्टम् 'आत्मने वा यजमानाय वा यं कामं कामयते तमागायति' इति— न, तस्य वाचनिकत्वात्। तस्मात् स्वामिन एव फलवत्सु उपासनेषु कर्तृत्वम्— इत्यात्रेय आचार्यो मन्यते॥

१३. स्वाम्यधिकरणम्।

## आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रियते॥ ४५॥

नैतदस्ति— स्वामिकर्माण्युपासनानीति; ऋत्विक्कर्माण्येतानि स्युः— इत्यौडुलोमिराचार्यो मन्यते; किं कारणम्? तस्मै हि साङ्गाय कर्मणे यजमानेन ऋत्विक् परिक्रियते; तत्प्रयोगान्तःपातीनि च उद्गीथाद्युपासनानि अधिकृताधिकारत्वात्; तस्मात् गोदोहनादिनियमवदेव ऋत्विग्भिर्निर्वर्त्येरन्; तथा च 'तं ह बको दाल्भ्यो विदांचकार स ह

नैमिशीयानामुद्गाता बभूव' इत्युद्गातृकर्तृकतां विज्ञानस्य दर्शयति। यत्तूक्तं कर्त्राश्रयं फलं श्रूयत इति— नैष दोषः, परार्थत्वादृत्विजः अन्यत्र वचनात् फलसंबन्धानुपपत्तेः ॥

## श्रुतेश्च ॥ ४६ ॥

'यां वै कांचन यज्ञ ऋत्विज आशिषमाशासत इति यजमानायैव तामाशासत इति होवाच' इति, 'तस्मादु हैवंविदुद्गाता ब्रूयात्कं ते काममागायानि' इति च ऋत्विक्कर्तृकस्य विज्ञानस्य यजमानगामि फलं दर्शयति। तस्मात् अङ्गोपासनानामृत्विक्कर्मत्वसिद्धिः ॥

## सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ॥ ४७ ॥

'तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेद्बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिरमौनं च मौनं च निर्विद्याथ ब्राह्मणः' इति बृहदारण्यके श्रूयते। तत्र संशयः— मौनं विधीयते, न वेति। न विधीयत इति तावत्प्राप्तम्, 'बाल्येन तिष्ठासेत्' इत्यत्रैव विधेरवसितत्वात्; न हि 'अथ मुनिः' इत्यत्र विधायिका विभक्तिरुपलभ्यते; तस्मादयमनुवादो

१४. सहकार्यन्तरविध्यधिकरणम्।

युक्तः; कुतः प्राप्तिरिति चेत्— मुनिपण्डितशब्दयोर्ज्ञानार्थत्वात् 'पाण्डित्यं निर्विद्य' इत्येव प्राप्तं मौनम् । अपि च 'अमौनं च मौनं च निर्विद्याथ ब्राह्मणः' इत्यत्र तावत् न ब्राह्मणत्वं विधीयते, प्रागेव प्राप्तत्वात्; तस्मात् 'अथ ब्राह्मणः' इति प्रशंसावादः, तथैव 'अथ मुनिः' इत्यपि भवितुमर्हति, समाननिर्देशत्वादित्येवं प्राप्ते—

ब्रूमः— सहकार्यन्तरविधिरिति । विद्यासहकारिणो मौनस्य बाल्यपाण्डित्यवद्विधिरेव आश्रयितव्यः, अपूर्वत्वात् । ननु पाण्डित्यशब्देनैव मौनस्यावगतत्वमुक्तम्— नैष दोषः, मुनिशब्दस्य ज्ञानातिशयार्थत्वात्, मननान्मुनिरिति च व्युत्पत्तिसंभवात्, 'मुनीनामप्यहं व्यासः' इति च प्रयोगदर्शनात् । ननु मुनिशब्द उत्तमाश्रमवचनोऽपि श्रूयते 'गार्हस्थ्यमाचार्यकुलं मौनं वानप्रस्थम्' इत्यत्र— न, 'वाल्मीकिर्मुनिपुंगवः' इत्यादिषु व्यभिचारदर्शनात्; इतराश्रमसंनिधानात्तु पारिशेष्यात् तत्र उत्तमाश्रमोपादानम्, ज्ञानप्रधानत्वादुत्तमाश्रमस्य । तस्मात् बाल्यपाण्डित्यापेक्षया तृतीयमिदं मौनं ज्ञानातिशयरूपं विधीयते । यत्तु बाल्य एव विधिपर्यवसानमिति, तथापि अपूर्वत्वान्मुनित्वस्य विधेयत्वमाश्रीयते—मुनिः स्यादिति; निर्वेदनीयत्वनिर्देशादपि मौ-

नस्य बाल्यपाण्डित्यवद्विधेयत्वाश्रयणम् । तद्वतः विद्यावतः संन्यासिनः; कथं च विद्यावतः संन्यासिन इत्यवगम्यते? तदधिकारात्—आत्मानं विदित्वा पुत्राद्येषणाभ्यो व्युत्थाय 'अथ भिक्षाचर्यं चरन्ति' इति । ननु सति विद्यावत्त्वे प्राप्नोत्येव तत्रातिशयः, किं मौनविधिना—इत्यत आह—पक्षेणेति । एतदुक्तं भवति—यस्मिन्पक्षे भेददर्शनप्राबल्यान्न प्राप्नोति, तस्मिन् एष विधिरिति । विध्यादिवत्—यथा 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्येवंजातीयके विध्यादौ सहकारित्वेन अग्न्यन्वाधानादिकम् अङ्गजातं विधीयते, एवम् अविधिप्रधानेऽपि अस्मिन्विद्यावाक्ये मौनविधिरित्यर्थः ॥

एवं बाल्यादिविशिष्टे कैवल्याश्रमे श्रुतिमति विद्यमाने, कस्मात् छान्दोग्ये गृहिणा उपसंहारः 'अभिसमावृत्य कुटुम्बे' इत्यत्र? तेन हि उपसंहरन् तद्विषयमादरं दर्शयति—इत्यत उत्तरं पठति—

## कृत्स्नभावात्तु गृहिणोपसंहारः ॥ ४८ ॥

तु-शब्दो विशेषणार्थः; कृत्स्नभावोऽस्य विशेष्यते; बहुलायासानि हि बहून्याश्रमकर्माणि यज्ञादीनि तं प्रति कर्तव्यतयोपदिष्टानि, आश्रमान्तरकर्माणि च यथासंभवमहिंसेन्द्रियसंयमादीनि तस्य विद्यन्ते । तस्मात् गृहमेधिना उपसं-

हारो न विरुध्यते ॥

## मौनवदितरेषामप्युपदेशात् ॥ ४९ ॥

यथा मौनं गार्हस्थ्यं च एतावाश्रमौ श्रुतिमन्तौ, एवमितरावपि वानप्रस्थगुरुकुलावासौ; दर्शिता हि पुरस्ताच्छ्रुतिः—'तप एव द्वितीयो ब्रह्मचार्याचार्यकुलवासी तृतीयः' इत्याद्या । तस्मात् चतुर्णामप्याश्रमाणाम् उपदेशाविशेषात् तुल्यवत् विकल्पसमुच्चयाभ्यां प्रतिपत्तिः । इतरेषामिति द्वयोराश्रमयोर्बहुवचनं वृत्तिभेदापेक्षया अनुष्ठातृभेदापेक्षया वा— इति द्रष्टव्यम् ॥

## अनाविष्कुर्वन्नन्वयात् ॥ ५० ॥

१५. अनाविष्काराधिकरणम् ।

'तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत्' इति बाल्यमनुष्ठेयतया श्रूयते; तत्र बालस्य भावः कर्म वा बाल्यमिति तद्धिते सति, बालभावस्य वयोविशेषस्य इच्छया संपादयितुमशक्यत्वात्, यथोपपादमूत्रपुरीषत्वादि बालचरितम्, अन्तर्गता वा भावविशुद्धिः अप्ररूढेन्द्रियत्वं दम्भादिरहितत्वं वा बाल्यं स्यादिति संशयः । किं तावत्प्राप्तम्? कामचारवादभक्षता यथोपपादमूत्रपुरीषत्वं च

प्रसिद्धतरं लोके बाल्यमिति तद्ग्रहणं युक्तम् । ननु पतितत्वादिदोषप्राप्तेर्न युक्तं कामचारताद्याश्रयणम्— न ; विद्यावतः संन्यासिनो वचनसामर्थ्यात् दोषनिवृत्तिः, पशुहिंसादिष्विवेत्येवं प्राप्ते—

अभिधीयते—न, वचनस्य गत्यन्तरसंभवात् ; अविरुद्धे हि अन्यस्मिन् बाल्यशब्दाभिलप्ये लभ्यमाने, न विध्यन्तरव्याघातकल्पना युक्ता ; प्रधानोपकाराय च अङ्गं विधीयते ; ज्ञानाभ्यासश्च प्रधानमिह यतीनामनुष्ठेयम् ; न च सकलायां बालचर्यायामङ्गीक्रियमाणायां ज्ञानाभ्यासः संभाव्यते ; तस्मात् आन्तरो भावविशेषो बालस्य अप्ररूढेन्द्रियत्वादिः इह बाल्यमाश्रीयते ; तदाह— अनाविष्कुर्वन्निति । ज्ञानाध्ययनधार्मिकत्वादिभिः आत्मानमविख्यापयन् दम्भदर्पादिरहितो भवेत्— यथा बालः अप्ररूढेन्द्रियतया न परेषाम् आत्मानमाविष्कर्तुमीहते, तद्वत् । एवं हि अस्य वाक्यस्य प्रधानोपकार्यर्थानुगम उपपद्यते ; तथा च उक्तं स्मृतिकारैः— 'यं न सन्तं न चासन्तं नाश्रुतं न बहुश्रुतम् । न सुवृत्तं न दुर्वृत्तं वेद कश्चित्स ब्राह्मणः ॥ गूढधर्माश्रितो विद्वानज्ञातचरितं चरेत् । अन्धवज्जडवच्चापि मूकवच्च महीं चरेत्' 'अव्यक्तलिङ्गोऽव्यक्ताचारः' इति चैवमादि ॥

## ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्दर्शनात् ॥ ५१ ॥

'सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्' इत्यत आरभ्य उच्चावचं विद्यासाधनमवधारितम्; तत्फलं विद्या सिध्यन्ती किमिहैव जन्मनि सिध्यति, उत कदाचित् अमुत्रापीति चिन्त्यते। किं तावत्प्राप्तम्? इहैवेति; किं कारणम्? श्रवणादिपूर्विका हि विद्या; न च कश्चित् अमुत्र मे विद्या जायतामित्यनुसंधाय श्रवणादिषु प्रवर्तते; समान एव तु जन्मनि विद्याजन्म अभिसंधाय एतेषु प्रवर्तमानो दृश्यते। यज्ञादीन्यपि श्रवणादिद्वारेणैव विद्यां जनयन्ति, प्रमाणजन्यत्वाद्विद्यायाः। तस्मादैहिकमेव विद्याजन्मेत्येवं प्राप्ते—

१६. ऐहिकाधिकरणम्।

वदामः— ऐहिकं विद्याजन्म भवति, असति प्रस्तुतप्रतिबन्ध इति। एतदुक्तं भवति— यदा प्रक्रान्तस्य विद्यासाधनस्य कश्चित्प्रतिबन्धो न क्रियते उपस्थितविपाकेन कर्मान्तरेण, तदा इहैव विद्या उत्पद्यते; यदा तु खलु तत्प्रतिबन्धः क्रियते तदा अमुत्रेति। उपस्थितविपाकत्वं च कर्मणो देशकालनिमित्तोपनिपाताद्भवति; यानि च एकस्य कर्मणो विपाचकानि देशकालनिमित्तानि, तान्येव अन्य-

स्यापीति न नियन्तुं शक्यते; यतो विरुद्धफलान्यपि कर्माणि भवन्ति। शास्त्रमपि अस्य कर्मण इदं फलमित्येतावति पर्यवसितं न देशकालनिमित्तविशेषमपि संकीर्तयति। साधनवीर्यविशेषात्तु अतीन्द्रिया कस्यचिच्छक्तिराविर्भवति, तत्प्रतिबद्धा परस्य तिष्ठति। न च अविशेषेण विद्यायाम् अभिसंधिर्नोत्पद्यते— इह अमुत्र वा मे विद्या जायतामिति, अभिसंधेर्निरङ्कुशत्वात्। श्रवणादिद्वारेणापि विद्या उत्पद्यमाना प्रतिबन्धक्षयापेक्षयैव उत्पद्यते। तथा च श्रुतिः दुर्बोधत्वमात्मनो दर्शयति— 'श्रवणायापि बहुभिर्यो न लभ्यः शृण्वन्तोऽपि बहवो यं न विद्युः। आश्चर्योऽस्य वक्ता कुशलोऽस्य लब्धाश्चर्यो ज्ञाता कुशलानुशिष्टः' इति। गर्भस्थ एव च वामदेवः प्रतिपेदे ब्रह्मभावमिति वदन्ती जन्मान्तरसंचितात् साधनात् जन्मान्तरे विद्योत्पत्तिं दर्शयति; न हि गर्भस्थस्यैव ऐहिकं किंचित्साधनं संभाव्यते। स्मृतावपि— 'अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति' इत्यर्जुनेन पृष्टो भगवान्वासुदेवः 'न हि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छति' इत्युक्त्वा, पुनस्तस्य पुण्यलोकप्राप्तिं साधुकुले संभूतिं च अभिधाय, अनन्तरम् 'तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकम्' इत्यादिना 'अनेकजन्मसंसिद्धस्ततो याति परां

गतिम्' इत्यन्तेन एतदेव दर्शयति । तस्मात् ऐहिकम् आमुष्मिकं वा विद्याजन्म प्रतिबन्धक्षयापेक्षयेति स्थितम् ॥

## एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः ॥ ५२ ॥

यथा मुमुक्षोर्विद्यासाधनावलम्बिनः साधनवीर्यविशेषाद्विद्यालक्षणे फले ऐहिकामुष्मिकफलत्वकृतो विशेषप्रतिनियमो

१७. मुक्तिफला- दृष्टः, एवं मुक्तिलक्षणेऽपि उत्कर्षापकर्ष-
धिकरणम् । कृतः कश्चिद्विशेषप्रतिनियमः स्यात्—इत्याशङ्क्य, आह— मुक्तिफलानियम इति । न खलु मुक्तिफले कश्चित् एवंभूतो विशेषप्रतिनियम आशङ्कितव्यः; कुतः? तदवस्थावधृतेः— मुक्त्यवस्था हि सर्ववेदान्तेष्वेकरूपैव अवधार्यते; ब्रह्मैव हि मुक्त्यवस्था; न च ब्रह्मणोऽनेकाकारयोगोऽस्ति, एकलिङ्गत्वावधारणात्— 'अस्थूलमनणु' 'स एष नेति नेत्यात्मा' 'यत्र नान्यत्पश्यति' 'ब्रह्मैवेदममृतं पुरस्तात्' 'इदं सर्वं यदयमात्मा' 'स वा एष महानज आत्माजरोऽमरोऽमृतोऽभयो ब्रह्म' 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्' इत्यादिश्रुतिभ्यः । अपि च विद्यासाधनं स्ववीर्यविशेषात् स्वफल एव विद्यायां कंचिदतिशयमासञ्जयेत्, न विद्याफले मुक्तौ; तद्धि असाध्यं नित्यसिद्धस्वभावमेव

विद्यया अधिगम्यत इत्यसकृदवादिष्म । न च तस्यामप्युत्कर्षनिकर्षात्मकोऽतिशय उपपद्यते, निकृष्टाया विद्यात्वाभावात्; उत्कृष्टैव हि विद्या भवति; तस्मात् तस्यां चिराचिरोत्पत्तिरूपोऽतिशयो भवन् भवेत् । न तु मुक्तौ कश्चित् अतिशयसंभवोऽस्ति । विद्याभेदाभावादपि तत्फलभेदनियमाभावः, कर्मफलवत्; न हि मुक्तिसाधनभूताया विद्यायाः कर्मणामिव भेदोऽस्ति । सगुणासु तु विद्यासु 'मनोमयः प्राणशरीरः' इत्याद्यासु गुणावापोद्वापवशाद्भेदोपपत्तौ सत्याम्, उपपद्यते यथास्वं फलभेदनियमः, कर्मफलवत्—तथा च लिङ्गदर्शनम्—'तं यथा यथोपासते तदेव भवति' इति; नैवं निर्गुणायां विद्यायाम्, गुणाभावात्; तथा च स्मृतिः —'न हि गतिरधिकास्ति कस्यचित्सति हि गुणे प्रवदन्त्यतुल्यताम्' इति । तदवस्थावधृतेस्तदवस्थावधृतेरिति पदाभ्यासः अध्यायपरिसमाप्तिं द्योतयति ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छंकरभगवतः कृतौ

शारीरकमीमांसासूत्रभाष्ये

तृतीयोऽध्यायः ॥

# ॥ ब्रह्मसूत्रभाष्यम् ॥

श्रीमच्छंकरभगवत्पादैर्विरचितम्

# ॥ ब्रह्मसूत्रभाष्यम् ॥

## चतुर्थाध्याये

## प्रथमः पादः

ॐ

# ॥ चतुर्थोऽध्यायः ॥

तृतीयेऽध्याये परापरासु विद्यासु साधनाश्रयो विचारः प्रायेण अत्यगात्; अथेह चतुर्थे फलाश्रय आगमिष्यति; प्रसङ्गागतं च अन्यदपि किंचिच्चिन्तयिष्यते; प्रथमं तावत् कतिभिश्चिदधिकरणैः साधनाश्रयविचारशेषमेवानुसरामः—

## आवृत्तिरसकृदुपदेशात् ॥ १ ॥

१. आवृत्त्यधिकरणम् ।

'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' 'तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत' 'सोऽन्वेष्टव्यः स विजिज्ञासितव्यः' इति च एवमादिश्रवणेषु संशयः— किं सकृत्प्रत्ययः कर्तव्यः, आहोस्वित् आवृत्त्येति । किं तावत्प्राप्तम्? सकृत्प्र-

त्यय: स्यात्, प्रयाजादिवत्, तावता शास्त्रस्य कृतार्थत्वात्; अश्रूयमाणायां हि आवृत्तौ क्रियमाणायाम् अशास्त्रार्थ: कृतो भवेत्। ननु असकृदुपदेशा उदाहृता:— 'श्रोतव्यो मन्तव्यो निदिध्यासितव्य:' इत्येवमादय:— एवमपि याव-च्छब्दमावर्तयेत्— सकृच्छ्रवणं सकृन्मननं सकृन्निदिध्यासनं चेति, नातिरिक्तम्। सकृदुपदेशेषु तु 'वेद' 'उपासीत' इत्येवमादिषु अनावृत्तिरित्येवं प्राप्ते, ब्रूम:— प्रत्ययावृत्ति: कर्तव्या; कुत:? असकृदुपदेशात्— 'श्रोतव्यो मन्त-व्यो निदिध्यासितव्य:' इत्येवंजातीयको हि असकृदुपदेश: प्रत्ययावृत्तिं सूचयति। ननु उक्तम्— यावच्छब्दमेव आव-र्तयेत्, नाधिकमिति— न, दर्शनपर्यवसानत्वादेषाम्; दर्शन-पर्यवसानानि हि श्रवणादीन्यावर्त्यमानानि दृष्टार्थानि भव-न्ति— यथा अवघातादीनि तण्डुलादिनिष्पत्तिपर्यवसानानि हि, तद्वत्। अपि च उपासनं निदिध्यासनं च— इत्यन्तर्णी-तावृत्तिगुणैव क्रिया अभिधीयते; तथा हि लोके 'गुरुमुपास्ते' 'राजानमुपास्ते' इति च—यस्तात्पर्येण गुर्वादीननुवर्तते, स एवमुच्यते; तथा 'ध्यायति प्रोषितनाथा पतिम्' इति— या निरन्तरस्मरणा पतिं प्रति सोत्कण्ठा, सा एवमभिधी-यते। विद्युपास्त्योश्च वेदान्तेषु अव्यतिरेकेण प्रयोगो

दृश्यते; क्वचित् विदिनोपक्रम्य उपासिनोपसंहरति, यथा--'यस्तद्वेद यत्स वेद स मयैतदुक्तः' इत्यत्र 'अनु म एतां भगवो देवतां शाधि यां देवतामुपास्से' इति; क्वचिच्च उपासिनोपक्रम्य विदिनोपसंहरति, यथा—'मनो ब्रह्मेत्युपासीत' इत्यत्र 'भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद' इति। तस्मात्सकृदुपदेशेष्वपि आवृत्तिसिद्धिः। असकृदुपदेशस्तु आवृत्तेः सूचकः॥

## लिङ्गाच्च ॥ २ ॥

लिङ्गमपि प्रत्ययावृत्तिं प्रत्याययति। तथा हि—उद्गीथविज्ञानं प्रस्तुत्य, 'आदित्य उद्गीथः' इत्येतत् एकपुत्रतादोषेणापोद्य, 'रश्मींस्त्वं पर्यावर्तयात्' इति रश्मिबहुत्वविज्ञानं बहुपुत्रतायै विदधत् सिद्धवत्प्रत्ययावृत्तिं दर्शयति; तत्सामान्यात् सर्वप्रत्ययेष्वावृत्तिसिद्धिः॥

अत्राह—भवतु नाम साध्यफलेषु प्रत्ययेष्वावृत्तिः, तेष्वावृत्तिसाध्यस्यातिशयस्य संभवात्; यस्तु परब्रह्मविषयः प्रत्ययो नित्यशुद्धबुद्धमुक्तस्वभावमेव आत्मभूतं परं ब्रह्म समर्पयति, तत्र किमर्था आवृत्तिरिति। सकृच्छ्रुतौ च ब्रह्मात्मत्वप्रतीत्यनुपपत्तेरावृत्त्यभ्युपगम इति चेत्, न, आवृत्तावपि तदनुपपत्तेः; यदि हि 'तत्त्वमसि' इत्येवंजातीयकं वाक्यं स-

क्रियमाणं ब्रह्मात्मत्वप्रतीतिं नोत्पादयेत् ततस्तदेव आवर्त्यमानमुत्पादयिष्यतीति का प्रत्याशा स्यात्। अथोच्येत—न केवलं वाक्यं कंचिदर्थं साक्षात्कर्तुं शक्नोति; अतो युक्त्यपेक्षं वाक्यमनुभावयिष्यति ब्रह्मात्मत्वमिति— तथाप्यावृत्त्यानर्थक्यमेव; सापि हि युक्तिः सकृत्प्रवृत्तैव स्वमर्थमनुभावयिष्यति। अथापि स्यात्— युक्त्या वाक्येन च सामान्यविषयमेव विज्ञानं क्रियते, न विशेषविषयम्; यथा 'अस्ति मे हृदये शूलम्' इत्यतो वाक्यात् गात्रकम्पादिलिङ्गाच्च शूलसद्भावसामान्यमेव परः प्रतिपद्यते, न विशेषमनुभवति— यथा स एव शूली; विशेषानुभवश्च अविद्याया निवर्तकः; तदर्था आवृत्तिरिति चेत्— न, असकृदपि तावन्मात्रे क्रियमाणे विशेषविज्ञानोत्पत्त्यसंभवात्; न हि सकृत्प्रयुक्ताभ्यां शास्त्रयुक्तिभ्यामनवगतो विशेषः शतकृत्वोऽपि प्रयुज्यमानाभ्यामवगन्तुं शक्यते; तस्मात् यदि शास्त्रयुक्तिभ्यां विशेषः प्रतिपाद्येत, यदि वा सामान्यमेव, उभयथापि सकृत्प्रवृत्ते एव ते स्वकार्यं कुरुत इति आवृत्त्यनुपयोगः; न च सकृत्प्रयुक्ते शास्त्रयुक्ती कस्यचिदप्यनुभवं नोत्पादयत इति शक्यते नियन्तुम्, विचित्रप्रज्ञत्वात्प्रतिपत्तॄणाम्। अपि च अनेकांशोपेते लौकिके पदार्थे सामान्यविशेषवति एकेनावधानेन

एकमंशमवधारयति, अपरेण अपरम्– इति स्यादप्यभ्यासो-पयोगः, यथा दीर्घप्रपाठकग्रहणादिषु; न तु निर्विशेषे ब्रह्मणि सामान्यविशेषरहिते चैतन्यमात्रात्मके प्रमोत्पत्तावभ्यासापेक्षा युक्तेति ॥

अत्रोच्यते— भवेदावृत्त्यानर्थक्यं तं प्रति, यः 'तत्त्वमसि' इति सकृदुक्तमेव ब्रह्मात्मत्वमनुभवितुं शक्नुयात्; यस्तु न शक्नोति, तं प्रति उपयुज्यत एव आवृत्तिः । तथा हि छान्दोग्ये— 'तत्त्वमसि श्वेतकेतो' इत्युपदिश्य, 'भूय एव मा भगवान्विज्ञापयतु' इति पुनः पुनः परिचोद्यमानः तत्तदाशङ्काकारणं निराकृत्य, 'तत्त्वमसि' इत्येवासकृदुपदिशति; तथा च 'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इत्यादि दर्शितम् । ननु उक्तम्– सकृच्छ्रुतं चेत् तत्त्वमसिवाक्यं स्वमर्थमनुभावयितुं न शक्नोति, तत आवर्त्यमानमपि नैव शक्ष्यतीति— नैष दोषः; न हि दृष्टेऽनुपपन्नं नाम; दृश्यन्ते हि सकृच्छ्रुताद्वाक्यात् मन्दप्रतीतं वाक्यार्थं आवर्तयन्तः तत्तदाभासव्युदासेन सम्यक्प्रतिपद्यमानाः । अपि च 'तत्त्वमसि' इत्येतद्वाक्यं त्वंपदार्थस्य तत्पदार्थभावमाचष्टे; तत्पदेन च प्रकृतं सत् ब्रह्म ईक्षितृ जगतो जन्मादिकारणमभिधीयते— 'सत्यं ज्ञानमनन्तं ब्रह्म'

'विज्ञानमानन्दं ब्रह्म' 'अदृष्टं द्रष्टृ' 'अविज्ञातं विज्ञातृ' 'अजमजरममरम्' 'अस्थूलमनण्वह्रस्वमदीर्घम्' इत्यादिशास्त्रसिद्धम्; तत्र अजादिशब्दैर्जन्मादयो भावविकारा निवर्तिताः; अस्थूलादिशब्दैश्च स्थौल्यादयो द्रव्यधर्माः; विज्ञानादिशब्दैश्च चैतन्यप्रकाशात्मकत्वमुक्तम्; एष व्यावृत्तसर्वसंसारधर्मकोऽनुभवात्मको ब्रह्मसंज्ञकस्तत्पदार्थो वेदान्ताभियुक्तानां प्रसिद्धः; तथा त्वंपदार्थोऽपि प्रत्यगात्मा श्रोता देहादारभ्य प्रत्यगात्मतया संभाव्यमानः चैतन्यपर्यन्तत्वेनावधारितः; तत्र येषाम् एतौ पदार्थौ अज्ञानसंशयविपर्ययप्रतिबद्धौ, तेषां 'तत्त्वमसि' इत्येतद्वाक्यं स्वार्थे प्रमां नोत्पादयितुं शक्नोति, पदार्थज्ञानपूर्वकत्वाद्वाक्यार्थज्ञानस्य— इत्यतः, तान्प्रति एष्टव्यः पदार्थविवेकप्रयोजनः शास्त्रयुक्त्यभ्यासः। यद्यपि च प्रतिपत्तव्य आत्मा निरंशः, तथापि अध्यारोपितं तस्मिन् बह्वंशत्वं देहेन्द्रियमनोबुद्धिविषयवेदनादिलक्षणम्; तत्र एकेन अवधानेन एकमंशमपोहति, अपरेण अपरम्— इति युज्यते तत्र क्रमवती प्रतिपत्तिः; तत्तु पूर्वरूपमेव आत्मप्रतिपत्तेः। येषां पुनः निपुणमतीनां न अज्ञानसंशयविपर्ययलक्षणः पदार्थविषयः प्रतिबन्धोऽस्ति, ते शक्नुवन्ति सकृदुक्तमेव तत्त्वमसिवाक्यार्थम् अनुभवितु-

मिति, तान्प्रति आवृत्त्यानर्थक्यमिष्टमेव; सकृदुत्पन्नैव हि आत्मप्रतिपत्तिः अविद्यां निवर्तयतीति, नात्र कश्चिदपि क्रमोऽभ्युपगम्यते । सत्यमेवं युज्येत, यदि कस्यचित् एवं प्रतिपत्तिर्भवेत्; बलवती हि आत्मनो दुःखित्वादिप्रतिपत्तिः; अतो न दुःखित्वाद्यभावं कश्चित्प्रतिपद्यत इति चेत्—न, देहाद्यभिमानवत् दुःखित्वाद्यभिमानस्य मिथ्याभिमानत्वोपपत्तेः; प्रत्यक्षं हि देहे छिद्यमाने दह्यमाने वा 'अहं छिद्ये दह्ये' इति च मिथ्याभिमानो दृष्टः; तथा बाह्यतरेष्वपि पुत्रमित्रादिषु संतप्यमानेषु 'अहमेव संतप्ये' इत्यध्यारोपो दृष्टः; तथा दुःखित्वाद्यभिमानोऽपि स्यात्, देहादिवदेव चैतन्याद्बहिरुपलभ्यमानत्वाद्दुःखित्वादीनाम्, सुषुप्तादिषु च अननुवृत्तेः; चैतन्यस्य तु सुषुप्तेऽपि अनुवृत्तिमामनन्ति—'यद्वै तन्न पश्यति पश्यन्वै तन्न पश्यति' इत्यादिना; तस्मात् सर्वदुःखविनिर्मुक्तैकचैतन्यात्मकोऽहमित्येष आत्मानुभवः । न च एवम् आत्मानमनुभवतः किंचिदन्यत्कृत्यमवशिष्यते; तथा च श्रुतिः—'किं प्रजया करिष्यामो येषां नोऽयमात्मायं लोकः' इत्यात्मविदः कर्तव्याभावं दर्शयति; स्मृतिरपि—'यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः। आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते' इति । यस्य तु न एषोऽनुभवो

द्रागिव जायते, तं प्रति अनुभवार्थ एव आवृत्त्यभ्युपगमः। तत्रापि न तत्त्वमसिवाक्यार्थात् प्रच्याव्य आवृत्तौ प्रवर्तयेत्; न हि वरघाताय कन्यामुद्वाहयन्ति; नियुक्तस्य च 'अस्मिन्नधिकृतोऽहं कर्ता मयेदं कर्तव्यम्' इत्यवश्यं ब्रह्मप्रत्ययाद्विपरीतप्रत्यय उत्पद्यते; यस्तु स्वयमेव मन्दमतिः अप्रतिभानात् तं वाक्यार्थं जिहासेत्, तस्य एतस्मिन्नेव वाक्यार्थे स्थिरीकार आवृत्त्यादिवाचोयुक्त्या अभ्युपेयते। तस्मात् परब्रह्मविषयेऽपि प्रत्यये तदुपायोपदेशेष्वावृत्तिसिद्धिः॥

## आत्मेति तूपगच्छन्ति ग्राहयन्ति च॥ ३॥

यः शास्त्रोक्तविशेषणः परमात्मा, स किम् अहमिति ग्रहीतव्यः, किं वा मदन्य इति— एतद्विचारयति। कथं पुनरात्मशब्दे प्रत्यगात्मविषये श्रूयमाणे संशय इति, उच्यते— अयमात्मशब्दो मुख्यः शक्यतेऽभ्युपगन्तुम्, सति जीवेश्वरयोरभेदसंभवे; इतरथा तु गौणोऽयमभ्युपगन्तव्यः— इति मन्यते। किं तावत्प्राप्तम्? न अहमिति ग्राह्यः; न हि अपहतपाप्मत्वादिगुणो विपरीतगुणत्वेन शक्यते ग्रहीतुम्, विपरीतगुणो वा अपहतपाप्मत्वादिगुणत्वेन; अपहतपाप्मत्वादिगुणश्च परमेश्वरः, तद्विपरीतगुणस्तु शारीरः; ईश्वरस्य च संसार्यात्मत्वे

(२. आत्मत्वोपासनाधिकरणम्।)

ईश्वराभावप्रसङ्गः; ततः शास्त्रानर्थक्यम्; संसारिणोऽपि ईश्वरात्मत्वे अधिकार्यभावाच्छास्त्रानर्थक्यमेव, प्रत्यक्षादिविरोधश्च। अन्यत्वेऽपि तादात्म्यदर्शनं शास्त्रात् कर्तव्यम्—प्रतिमादिष्विव विष्ण्वादिदर्शनम् इति चेत्— काममेवं भवतु; न तु संसारिणो मुख्य आत्मा ईश्वर इत्येतत् नः प्रापयितव्यम् ॥

एवं प्राप्ते, ब्रूमः—आत्मेत्येव परमेश्वरः प्रतिपत्तव्यः। तथा हि परमेश्वरप्रक्रियायां जाबाला आत्मत्वेनैव एतमुपगच्छन्ति—'त्वं वा अहमस्मि भगवो देवतेऽहं वै त्वमसि देवते' इति; तथा अन्येऽपि 'अहं ब्रह्मास्मि' इत्येवमादय आत्मत्वोपगमा द्रष्टव्याः। ग्राहयन्ति च आत्मत्वेनैव ईश्वरं वेदान्तवाक्यानि—'एष त आत्मा सर्वान्तरः' 'एष त आत्मान्तर्याम्यमृतः' 'तत्सत्यं स आत्मा तत्त्वमसि' इत्येवमादीनि। यदुक्तम्—प्रतीकदर्शनमिदं विष्णुप्रतिमान्यायेन भविष्यतीति, तदयुक्तम्, गौणत्वप्रसङ्गात्, वाक्यवैरूप्याच्च—यत्र हि प्रतीकदृष्टिरभिप्रेयते, सकृदेव तत्र वचनं भवति—यथा 'मनो ब्रह्म' 'आदित्यो ब्रह्म' इत्यादि; इह पुनः—त्वम् अहमस्मि, अहं च त्वमसीत्याह—अतः प्रतीकश्रुतिवैरूप्यात् अभेदप्रतिपत्तिः; भेददृष्ट्यपवादाच्च; तथा हि—

'अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद' 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' 'सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेद' इत्येवमाद्या भूयसी श्रुतिः भेददर्शनमपवदति। यत्तूक्तम्—न विरुद्धगुणयोरन्योन्यात्मत्वसंभव इति, नायं दोषः, विरुद्धगुणताया मिथ्यात्वोपपत्तेः। यत्पुनरुक्तम्—ईश्वराभावप्रसङ्ग इति, तदसत्, शास्त्रप्रामाण्यात् अनभ्युपगमाच्च; न हि ईश्वरस्य संसार्यात्मत्वं प्रतिपाद्यत इत्यभ्युपगच्छामः; किं तर्हि, संसारिणः संसारित्वापोहेन ईश्वरात्मत्वं प्रतिपिपादयिषितमिति। एवं च सति अद्वैतेश्वरस्य अपहतपाप्मत्वादिगुणता विपरीतगुणता तु इतरस्य—मिथ्येति व्यवतिष्ठते। यदप्युक्तम्—अधिकार्यभावः प्रत्यक्षादिविरोधश्चेति, तदप्यसत्, प्राक्प्रबोधात् संसारित्वाभ्युपगमात्, तद्विषयत्वाच्च प्रत्यक्षादिव्यवहारस्य; 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्' इत्यादिना हि प्रबोधे प्रत्यक्षाद्यभावं दर्शयति। प्रत्यक्षाद्यभावे श्रुतेरप्यभावप्रसङ्ग इति चेत्, न, इष्टत्वात्; 'अत्र पितापिता भवति' इत्युपक्रम्य, 'वेदा अवेदाः' इति वचनात् इष्यत एव अस्माभिः श्रुतेरप्यभावः प्रबोधे। कस्य पुनरयम् अप्रबोध इति चेत्, यस्त्वं पृच्छसि तस्य ते—इति

वदामः । ननु अहमीश्वर एवोक्तः श्रुत्या—यद्येवं प्रतिबुद्धोऽसि, नास्ति कस्यचिदप्रबोधः । योऽपि दोषश्चोद्यते—कैश्चिदविद्यया किल आत्मनः सद्वितीयत्वात् अद्वैतानुपपत्तिरिति, सोऽपि एतेन प्रत्युक्तः । तस्मात् आत्मेत्येव ईश्वरे मनो दधीत ॥

## न प्रतीके न हि सः ॥ ४ ॥

२. प्रतीकाधिकरणम् ।

'मनो ब्रह्मेत्युपासीतेत्यध्यात्ममथाधिदैवतमाकाशो ब्रह्मेति' तथा 'आदित्यो ब्रह्मेत्यादेशः' 'स यो नाम ब्रह्मेत्युपास्ते' इत्येवमादिषु प्रतीकोपासनेषु संशयः— किं तेष्वपि आत्मग्रहः कर्तव्यः, न वेति । किं तावत्प्राप्तम्? तेष्वपि आत्मग्रह एव युक्तः कर्तुम्; कस्मात्? ब्रह्मणः श्रुतिषु आत्मत्वेन प्रसिद्धत्वात्, प्रतीकानामपि ब्रह्मविकारत्वाद्ब्रह्मत्वे सति आत्मत्वोपपत्तेरित्येवं प्राप्ते, ब्रूमः— न प्रतीकेष्वात्ममतिं बध्नीयात्; न हि स उपासकः प्रतीकानि व्यस्तानि आत्मत्वेन आकलयेत् । यत्पुनः ब्रह्मविकारत्वात्प्रतीकानां ब्रह्मत्वं ततश्च आत्मत्वमिति, तदसत्, प्रतीकाभावप्रसङ्गात्; विकारस्वरूपोपमर्देन हि नामादिजातस्य ब्रह्मत्वमेव आश्रितं भवति; स्वरूपोपमर्दे च नामादीनां कुतः प्रतीकत्वम् आत्मग्रहो वा? न च ब्रह्मण

आत्मत्वात् ब्रह्मदृष्ट्युपदेशेष्वात्मदृष्टिः कल्प्या, कर्तृत्वाद्यनिराकरणात्; कर्तृत्वादिसर्वसंसारधर्मनिराकरणेन हि ब्रह्मण आत्मत्वोपदेशः; तदनिराकरणेन च उपासनविधानम्। अतश्च उपासकस्य प्रतीकैः समत्वात् आत्मग्रहो नोपपद्यते; न हि रुचकस्वस्तिकयोः इतरेतरात्मत्वमस्ति; सुवर्णात्मनेव तु ब्रह्मात्मना एकत्वे प्रतीकाभावप्रसङ्गमवोचाम। अतो न प्रतीकेष्वात्मदृष्टिः क्रियते॥

## ब्रह्मदृष्टिरुत्कर्षात्॥ ५॥

तेष्वेव उदाहरणेष्वन्यः संशयः— किमादित्यादिदृष्टयो ब्रह्मण्यध्यसितव्याः, किं वा ब्रह्मदृष्टिरादित्यादिष्विति। कुतः

४. ब्रह्मदृष्ट्यधिकरणम्।

संशयः? सामानाधिकरण्ये कारणानवधारणात्; अत्र हि ब्रह्मशब्दस्य आदित्यादिशब्दैः सामानाधिकरण्यमुपलभ्यते, ‘आदित्यो ब्रह्म’ ‘प्राणो ब्रह्म’ ‘विद्युद्ब्रह्म’ इत्यादिसमानविभक्तिनिर्देशात्; न च अत्र आञ्जसं सामानाधिकरण्यमवकल्पते, अर्थान्तरवचनत्वाद्ब्रह्मादित्यादिशब्दानाम्; न हि भवति— गौरश्व इति सामानाधिकरण्यम्। ननु प्रकृतिविकारभावाद्ब्रह्मादित्यादीनां मृच्छरावादिवत्सामानाधिकरण्यं स्यात्— नेत्युच्यते; विकारप्रविलयो ह्येवं प्रकृतिसामानाधिकरण्यात्स्यात्, ततश्च प्रतीका-

भावप्रसङ्गमवोचाम; परमात्मवाक्यं चेदं तदानीं स्यात्, ततश्चोपासनाधिकारो बाध्येत, परिमितविकारोपादानं च व्यर्थम् । तस्मात् 'ब्राह्मणोऽग्निर्वैश्वानरः' इत्यादिवत् अन्यतरत्रान्यतरदृष्ट्यध्यासे सति, क किंदृष्टिरध्यस्यतामिति संशयः । तत्र अनियमः, नियमकारिणः शास्त्रस्याभावादित्येवं प्राप्तम् । अथवा आदित्यादिदृष्टय एव ब्रह्मणि कर्तव्या इत्येवं प्राप्तम्; एवं हि आदित्यादिदृष्टिभिः ब्रह्म उपासितं भवति; ब्रह्मोपासनं च फलवदिति शास्त्रमर्यादा । तस्मात् न ब्रह्मदृष्टिरादित्यादिष्वित्येवं प्राप्ते——

ब्रूमः—— ब्रह्मदृष्टिरेव आदित्यादिषु स्यादिति । कस्मात्? उत्कर्षात्; एवम् उत्कर्षेण आदित्यादयो दृष्टा भवन्ति, उत्कृष्टदृष्टेस्तेष्वध्यासात्; तथा च लौकिको न्यायोऽनुगतो भवति; उत्कृष्टदृष्टिर्हि निकृष्टेऽध्यसितव्येति लौकिको न्यायः— यथा राजदृष्टिः क्षत्तरि; स च अनुसर्तव्यः विपर्यये प्रत्यवायप्रसङ्गात्; न हि क्षत्तृदृष्टिपरिगृहीतो राजा निकर्षं नीयमानः श्रेयसे स्यात् । ननु शास्त्रप्रामाण्यादनाशङ्कनीयोऽत्र प्रत्यवायप्रसङ्गः, न च लौकिकेन न्यायेन शास्त्रीया दृष्टिर्नियन्तुं युक्तेति— अत्रोच्यते—— निर्धारिते शास्त्रार्थे एतदेवं स्यात्; संदिग्धे तु तस्मिन्, तन्निर्णयं प्रति लौकिकोऽपि न्याय आ-

श्रीयमाणो न विरुध्यते; तेन च उत्कृष्टदृष्ट्यध्यासे शास्त्रार्थेऽवधार्यमाणे, निकृष्टदृष्टिमध्यस्यन्प्रत्यवेयादिति श्लिष्यते। प्राथम्याच्च आदित्यादिशब्दानां मुख्यार्थत्वम् अविरोधात् ग्रहीतव्यम्; तैः स्वार्थवृत्तिभिरवरुद्धायां बुद्धौ, पश्चादवतरतो ब्रह्मशब्दस्य मुख्यया वृत्त्या सामानाधिकरण्यासंभवात्, ब्रह्मदृष्टिविधानार्थतैव अवतिष्ठते। इति-परत्वादपि ब्रह्मशब्दस्य एष एवार्थो न्याय्यः; तथा हि— 'ब्रह्मेत्यादेशः' 'ब्रह्मेत्युपासीत' 'ब्रह्मेत्युपास्ते' इति च सर्वत्रेतिपरं ब्रह्मशब्दमुच्चारयति, शुद्धांस्तु आदित्यादिशब्दान्; ततश्च यथा शुक्तिकां रजतमिति प्रत्येतीत्यत्र, शुक्तिवचन एव शुक्तिकाशब्दः, रजतशब्दस्तु रजतप्रतीतिलक्षणार्थः— प्रत्येत्येव हि केवलं रजतमिति, न तु तत्र रजतमस्ति— एवमत्रापि आदित्यादीन्ब्रह्मेति प्रतीयादिति गम्यते। वाक्यशेषोऽपि च द्वितीयानिर्देशेन आदित्यादीनेव उपास्तिक्रियया व्याप्यमानान्दर्शयति— 'स य एतदेवं विद्वानादित्यं ब्रह्मेत्युपास्ते' 'यो वाचं ब्रह्मेत्युपास्ते' 'यः संकल्पं ब्रह्मेत्युपास्ते' इति च। यत्तूक्तम्— ब्रह्मोपासनमेवात्र आदरणीयं फलवत्त्वायेति, तदयुक्तम्, उक्तेन न्यायेन आदित्यादीनामेव उपास्यत्वावगमात्; फलं तु अतिथ्याद्युपासन इव आदित्याद्युपासनेऽपि ब्रह्मैव

दास्यति, सर्वाध्यक्षत्वात् ; वर्णितं चैतत् 'फलमत उपपत्तेः' इत्यत्र । ईदृशं च अत्र ब्रह्मण उपास्यत्वम् , यत्प्रतीकेषु तद्दृष्ट्यध्यारोपणम्— प्रतिमादिष्विव विष्ण्वादीनाम् ॥

## आदित्यादिमतयश्चाङ्ग उपपत्तेः ॥ ६ ॥

५. आदित्यादिमत्यधिकरणम् ।

'य एवासौ तपति तमुद्गीथमुपासीत' 'लोकेषु पञ्चविधं सामोपासीत' 'वाचि सप्तविधं सामोपासीत' 'इयमेवर्गग्निः साम' इत्येवमादिषु अङ्गावबद्धेषूपासनेषु संशयः— किमादित्यादिषु उद्गीथादिदृष्टयो विधीयन्ते, किं वा उद्गीथादिष्वेव आदित्यादिदृष्टय इति । तत्र अनियमः, नियमकारणाभावात्—इति प्राप्तम् ; न हि अत्र ब्रह्मण इव कस्यचिदुत्कर्षविशेषोऽवधार्यते ; ब्रह्म हि समस्तजगत्कारणत्वात् अपहतपाप्मत्वादिगुणयोगाच्च आदित्यादिभ्य उत्कृष्टमिति शक्यमवधारयितुम् ; न तु आदित्योद्गीथादीनां विकारत्वाविशेषात् किंचिदुत्कर्षविशेषावधारणे कारणमस्ति । अथवा नियमेनैव उद्गीथादिमतय आदित्यादिषु अध्यस्येरन् ; कस्मात्? कर्मात्मकत्वादुद्गीथादीनाम् , कर्मणश्च फलप्राप्तिप्रसिद्धेः ; उद्गीथादिमतिभिरुपास्यमाना आदित्यादयः कर्मात्मकाः सन्तः फलहेतवो भविष्यन्ति । तथा च 'इयमेव-

र्गभिः साम' इत्यत्र 'तदेतदेतस्यामृच्यध्यूढं साम' इति ऋक्शब्देन पृथिवीं निर्दिशति, सामशब्देनाग्निम्; तच्च पृथिव्यग्न्योः ऋक्सामदृष्टिचिकीर्षायामवकल्पते, न ऋक्सामयोः पृथिव्यग्निदृष्टिचिकीर्षायाम्; क्षत्तरि हि राजदृष्टिकरणात् राजशब्द उपचर्यते, न राजनि क्षत्तृशब्दः। अपि च 'लोकेषु पञ्चविधं सामोपासीत' इति अधिकरणनिर्देशात् लोकेषु साम अध्यसितव्यमिति प्रतीयते; 'एतद्गायत्रं प्राणेषु प्रोतम्' इति च एतदेव दर्शयति। प्रथमनिर्दिष्टेषु च आदित्यादिषु चरमनिर्दिष्टं ब्रह्माध्यस्तम्— 'आदित्यो ब्रह्मेत्यादेशः' इत्यादिषु; प्रथमनिर्दिष्टाश्च पृथिव्यादयः, चरमनिर्दिष्टा हिंकारादयः— 'पृथिवी हिंकारः' इत्यादिश्रुतिषु। अतः अनङ्गेष्वादित्यादिषु अङ्गमतिक्षेप इत्येवं प्राप्ते—

ब्रूमः— आदित्यादिमतय एव अङ्गेषु उद्गीथादिषु क्षिप्येरन्; कुतः? उपपत्तेः; उपपद्यते हि एवम् अपूर्वसंनिकर्षात् आदित्यादिमतिभिः संस्क्रियमाणेषु उद्गीथादिषु कर्मसमृद्धिः। 'यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति' इति च विद्यायाः कर्मसमृद्धिहेतुत्वं दर्शयति। भवतु कर्मसमृद्धिफलेष्वेवम्; स्वतन्त्रफलेषु तु कथम्— 'य एतदेवं विद्वाँल्लोकेषु पञ्चविधं सामो-

पास्ते' इत्यादिषु? तेष्वपि अधिकृताधिकारात् प्रकृतापूर्वसंनिकर्षेणैव फलकल्पना युक्ता, गोदोहनादिनियमवत् । फलात्मकत्वाच्च आदित्यादीनाम उद्गीथादिभ्यः कर्मात्मकेभ्यः उत्कर्षोपपत्तिः; आदित्यादिप्राप्तिलक्षणं हि कर्मफलं शिष्यते श्रुतिषु । अपि च 'ओमित्येतदक्षरमुद्गीथमुपासीत' 'खल्वेतस्यैवाक्षरस्योपव्याख्यानं भवति' इति च उद्गीथमेव उपास्यत्वेनोपक्रम्य, आदित्यादिमतीर्विदधाति । यत्तूक्तम्—उद्गीथादिमतिभिरुपास्यमाना आदित्यादयः कर्मभूयं भूत्वा फलं करिष्यन्तीति, तदयुक्तम्, स्वयमेवोपासनस्य कर्मत्वात् फलवत्त्वोपपत्तेः आदित्यादिभावेनापि च दृश्यमानानामुद्गीथादीनां कर्मात्मकत्वानपायात् । 'तदेतदेतस्यामृच्यध्यूढं साम' इति तु लाक्षणिक एव पृथिव्यग्न्योः ऋक्सामशब्दप्रयोगः; लक्षणा च यथासंभवं संनिकृष्टेन विप्रकृष्टेन वा स्वार्थसंबन्धेन प्रवर्तते; तत्र यद्यपि ऋक्सामयोः पृथिव्यग्निदृष्टिचिकीर्षा, तथापि प्रसिद्धयोः ऋक्सामयोर्भेदेनानुकीर्तनात्, पृथिव्यग्न्योश्च संनिधानात्, तयोरेव एष ऋक्सामशब्दप्रयोगः ऋक्सामसंबन्धादिति निश्चीयते; क्षत्तृशब्दोऽपि हि कुतश्चित्कारणाद्राजानमुपसर्पन् न निवारयितुं पार्यते । 'इयमेवर्क्' इति च यथाक्षरन्यासम् ऋच एव पृथिवीत्वमवधारयति;

पृथिव्या हि ऋक्त्वेऽवधार्यमाणे—इयमृगेवेत्यक्षरन्यासः स्यात् । 'य एवं विद्वान्साम गायति' इति च अङ्गाश्रयमेव विज्ञानमुपसंहरति, न पृथिव्याद्याश्रयम् । तथा 'लोकेषु पञ्चविधं सामोपासीत' इति यद्यपि सप्तमीनिर्दिष्टा लोकाः, तथापि साम्न्येव ते अध्यस्येरन्, द्वितीयानिर्देशेन साम्न उपास्यत्वावगमात्; सामनि हि लोकेष्वध्यस्यमानेषु साम लोकात्मनोपासितं भवति, अन्यथा पुनः लोकाः सामात्मना उपासिताः स्युः । एतेन 'एतद्गायत्रं प्राणेषु प्रोतम्' इत्यादि व्याख्यातम् । यत्रापि तुल्यो द्वितीयानिर्देशः 'अथ खल्वमुमादित्यं सप्तविधं सामोपासीत' इति, तत्रापि— 'समस्तस्य खलु साम्न उपासनं साधु' 'इति तु पञ्चविधस्य' 'अथ सप्तविधस्य' इति च साम्न एव उपास्यत्वोपक्रमात्— तस्मिन्नेव आदित्याद्यध्यासः । एतस्मादेव च साम्न उपास्यत्वावगमात् 'पृथिवी हिंकारः' इत्यादिनिर्देशविपर्ययेऽपि हिंकारादिष्वेव पृथिव्यादिदृष्टिः । तस्मात् अनङ्गाश्रया आदित्यादिमतयः अङ्गेषूद्गीथादिषु क्षिप्येरन्निति सिद्धम् ॥

## आसीनः संभवात् ॥ ७ ॥

कर्माङ्गसंबद्धेषु तावत् उपासनेषु कर्मतन्त्रत्वात् न आसनादिचिन्ता; नापि सम्यग्दर्शने, वस्तुतन्त्रत्वाद्विज्ञानस्य; इतरेषु तु

उपासनेषु किम् अनियमेन तिष्ठन् आसीनः शयानो वा प्रवर्तेत

६. आसीनाधिकरणम् । उत नियमेन आसीन एवेति चिन्तयति । तत्र मानसत्वादुपासनस्य अनियमः शरीरस्थितेरित्येवं प्राप्ते, ब्रवीति—आसीन एवोपासीतेति; कुतः? संभवात् । उपासनं नाम समानप्रत्ययप्रवाहकरणम्; न च तत् गच्छतो धावतो वा संभवति, गत्यादीनां चित्तविक्षेपकरत्वात्; तिष्ठतोऽपि देहधारणे व्यापृतं मनो न सूक्ष्मवस्तुनिरीक्षणक्षमं भवति; शयानस्यापि अकस्मादेव निद्रया अभिभूयते; आसीनस्य तु एवंजातीयको भूयान्दोषः सुपरिहर इति संभवति तस्योपासनम् ॥

**ध्यानाच्च ॥ ८ ॥**

अपि च ध्यायत्यर्थ एषः, यत्समानप्रत्ययप्रवाहकरणम्; ध्यायतिश्च प्रशिथिलाङ्गचेष्टेषु प्रतिष्ठितदृष्टिषु एकविषयाक्षिप्तचित्तेषु उपचर्यमाणो दृश्यते—ध्यायति बकः, ध्यायति प्रोषितबन्धुरिति । आसीनश्च अनायासो भवति; तस्मादपि आसीनकर्मोपासनम् ॥

**अचलत्वं चापेक्ष्य ॥ ९ ॥**

अपि च 'ध्यायतीव पृथिवी' इत्यत्र पृथिव्यादिषु अच-

लत्वमेवापेक्ष्य ध्यायतिवादो भवति ; तच्च लिङ्गम् उपासनस्य आसीनकर्मत्वे ॥

**स्मरन्ति च ॥ १० ॥**

स्मरन्त्यपि च शिष्टा उपासनाङ्गत्वेन आसनम्—'शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः' इत्यादिना । अत एव पद्मकादीनामासनविशेषाणामुपदेशो योगशास्त्रे ॥

**यत्रैकाग्रता तत्राविशेषात् ॥ ११ ॥**

७. एकाग्रताधिकरणम् ।

दिग्देशकालेषु संशयः—किमस्ति कश्चिन्नियमः, नास्ति वेति । प्रायेण वैदिकेष्वारम्भेषु दिगादिनियमदर्शनात्, स्यादिहापि कश्चिन्नियम इति यस्य मतिः, तं प्रत्याह— दिग्देशकालेषु अर्थलक्षण एव नियमः; यत्रैव अस्य दिशि देशे काले वा मनसः सौकर्येणैकाग्रता भवति, तत्रैवोपासीत, प्राचीदिक्पूर्वाह्णप्राचीनप्रवणादिवत् विशेषाश्रवणात्, एकाग्रताया इष्टायाः सर्वत्राविशेषात् । ननु विशेषमपि केचिदामनन्ति—'समे शुचौ शर्करावह्निवालुकाविवर्जिते शब्दजलाश्रयादिभिः । मनोनुकूले न तु चक्षुपीडने गुहानिवाताश्रयणे प्रयोजयेत्' इति यथेति—उच्यते; सत्यमस्ति एवंजातीयको नियमः; सति त्वेतस्मिन्,

तद्गतेषु विशेषेष्वनियम इति सुहृद्भूत्वा आचार्य आचष्टे। 'मनोनुकूले' इति चैषा श्रुतिः यत्रैकाग्रता तत्रैव—इत्येतदेव दर्शयति॥

## आ प्रायणात्तत्रापि हि दृष्टम्॥ १२॥

८. आप्रायणाधिकरणम्।

आवृत्तिः सर्वोपासनेष्वादर्तव्येति स्थितमाद्येऽधिकरणे; तत्र यानि तावत् सम्यग्दर्शनार्थान्युपासनानि, तानि अवघातादिवत् कार्यपर्यवसानानीति ज्ञातमेव एषामावृत्तिपरिमाणम्; न हि सम्यग्दर्शने कार्ये निष्पन्ने यत्नान्तरं किंचिच्छासितुं शक्यम्, अनियोज्यब्रह्मात्मत्वप्रतिपत्तेः शास्त्रस्याविषयत्वात्। यानि पुनः अभ्युदयफलानि, तेष्वेषा चिन्ता——किं कियन्तंचित्कालं प्रत्ययमावर्त्य उपरमेत्, उत यावज्जीवमावर्तयेदिति। किं तावत्प्राप्तम्? कियन्तंचित्कालं प्रत्ययमभ्यस्य उत्सृजेत्, आवृत्तिविशिष्टस्योपासनशब्दार्थस्य कृतत्वादित्येवं प्राप्ते, ब्रूमः——आ प्रायणादेव आवर्तयेत्प्रत्ययम्, अन्त्यप्रत्ययवशाददृष्टफलप्राप्तेः; कर्माण्यपि हि जन्मान्तरोपभोग्यं फलमारभमाणानि तदनुरूपं भावनाविज्ञानं प्रायणकाले आक्षिपन्ति——'सविज्ञानो भवति सविज्ञानमेवान्ववक्रामति' 'यच्चित्तस्तेनैष प्राणमायाति' 'प्राणस्तेजसा युक्तः सहात्मना

यथासंकल्पितं लोकं नयति’ इति चैवमादिश्रुतिभ्यः ; तृण-जलूकानिदर्शनाच्च ; प्रत्ययास्त्वेते स्वरूपानुवृत्तिं मुक्त्वा किमन्यत् प्रायणकालभावि भावनाविज्ञानमपेक्षेरन् । तस्मात् ये प्रतिपत्तव्यफलभावनात्मकाः प्रत्ययाः, तेषु आ प्रायणात् आवृत्तिः । तथा च श्रुतिः—‘स यावत्क्रतुरयमस्माल्लोकात्प्रैति’ इति प्रायणकालेऽपि प्रत्ययानुवृत्तिं दर्शयति । स्मृतिरपि—‘यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेवरम् । तं तमेवैति कौन्तेय सदा तद्भावभावितः’ इति, ‘प्रयाणकाले मनसाचलेन’ इति च । ‘सोऽन्तवेलायामेतत्त्रयं प्रतिपद्येत’ इति च मरणवेलायामपि कर्तव्यशेषं श्रावयति ॥

## तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ॥ १३ ॥

गतस्तृतीयशेषः ; अथेदानीं ब्रह्मविद्याफलं प्रति चिन्ता प्रतायते । ब्रह्माधिगमे सति तद्विपरीतफलं दुरितं क्षीयते,

१. तदधिगमाधिकरणम् ।

न क्षीयते वेति संशयः । किं तावत्प्राप्तम् ? फलार्थत्वात्कर्मणः फलमदत्त्वा न संभाव्यते क्षयः ; फलदायिनी हि अस्य शक्तिः श्रुत्या समधिगता ; यदि तत् अन्तरेणैव फलोपभोगमपवृज्येत, श्रुतिः कदर्थिता स्यात् ; स्मरन्ति च—‘न हि कर्म क्षीयते’ इति ।

नन्वेवं सति प्रायश्चित्तोपदेशोऽनर्थकः प्राप्नोति— नैष दोषः, प्रायश्चित्तानां नैमित्तिकत्वोपपत्तेः गृहदाहेष्ट्यादिवत्। अपि च प्रायश्चित्तानां दोषसंयोगेन विधानाद्भवेदपि दोषक्षपणार्थता; न त्वेवं ब्रह्मविद्यायां विधानमस्ति। नन्वनभ्युपगम्यमाने ब्रह्मविदः कर्मक्षये तत्फलस्यावश्यभोक्तव्यत्वादनिर्मोक्षः स्यात्— नेत्युच्यते; देशकालनिमित्तापेक्षो मोक्षः कर्मफलवत् भविष्यति। तस्मान्न ब्रह्माधिगमे दुरितनिवृत्तिरित्येवं प्राप्ते—

ब्रूमः— तदधिगमे ब्रह्माधिगमे सति उत्तरपूर्वयोरघयोरश्लेषविनाशौ भवतः— उत्तरस्य अश्लेषः, पूर्वस्य विनाशः। कस्मात्? तद्व्यपदेशात्; तथा हि ब्रह्मविद्याप्रक्रियायां संभाव्यमानसंबन्धस्य आगामिनो दुरितस्यानभिसंबन्धं विदुषो व्यपदिशति— 'यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यते' इति; तथा विनाशमपि पूर्वोपचितस्य दुरितस्य व्यपदिशति— 'तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्ते' इति; अयमपरः कर्मक्षयव्यपदेशो भवति— 'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे' इति। यदुक्तम्— अनुपभुक्तफलस्य कर्मणः क्षयकल्पनायां शास्त्रं कदर्थितं स्यादिति, नैष दोषः; न हि

वयं कर्मणः फलदायिनीं शक्तिमवजानीमहे; विद्यत एव सा; सा तु विद्यादिना कारणान्तरेण प्रतिबध्यत इति वदामः; शक्तिसद्भावमात्रे च शास्त्रं व्याप्रियते, न प्रतिबन्धाप्रतिबन्धयोरपि। 'न हि कर्म क्षीयते' इत्येतदपि स्मरणमौत्सर्गिकम्—न हि भोगादृते कर्म क्षीयते तदर्थत्वादिति; इष्यत एव तु प्रायश्चित्तादिना तस्य क्षयः— 'सर्वं पाप्मानं तरति, तरति ब्रह्महत्याम्, योऽश्वमेधेन यजते, य उ चैनमेवं वेद' इत्यादि श्रुतिस्मृतिभ्यः। यत्तूक्तम्—नैमित्तिकानि प्रायश्चित्तानि भविष्यन्तीति, तदसत्, दोषसंयोगेन चोद्यमानानामेषां दोषनिर्घातफलसंभवे फलान्तरकल्पनानुपपत्तेः। यत्पुनरेतदुक्तम्— न प्रायश्चित्तवत् दोषक्षयोद्देशेन विद्याविधानमस्तीति, अत्र ब्रूमः— सगुणासु तावद्विद्यासु विद्यत एव विधानम्, तासु च वाक्यशेषे ऐश्वर्यप्राप्तिः पापनिवृत्तिश्च विद्यावत उच्यते, तयोश्चाविवक्षाकारणं नास्ति—इत्यतः पाप्मप्रहाणपूर्वकैश्वर्यप्राप्तिः तासां फलमिति निश्चीयते; निर्गुणायां तु विद्यायां यद्यपि विधानं नास्ति, तथापि अकर्त्रात्मत्वबोधात्कर्मप्रदाहसिद्धिः। अश्लेष इति च आगामिषु कर्मसु कर्तृत्वमेव न प्रतिपद्यते ब्रह्मविदिति दर्शयति। अतिक्रान्तेषु तु यद्यपि मिथ्याज्ञानात्कर्तृत्वं प्रतिपेद इव, तथापि विद्यासामर्थ्यान्मिथ्याज्ञाननि-

वृत्तेः तान्यपि प्रविलीयन्त इत्याह– विनाश इति। पूर्वसिद्धकर्तृत्वभोक्तृत्वविपरीतं हि त्रिष्वपि कालेष्वकर्तृत्वाभोक्तृत्वस्वरूपं ब्रह्माहमस्मि, नेतः पूर्वमपि कर्ता भोक्ता वा अहमासम्, नेदानीम्, नापि भविष्यत्काले— इति ब्रह्मविदवगच्छति; एवमेव च मोक्ष उपपद्यते; अन्यथा हि अनादिकालप्रवृत्तानां कर्मणां क्षयाभावे मोक्षाभावः स्यात्। न च देशकालनिमित्तापेक्षो मोक्षः कर्मफलवत् भवितुमर्हति; अनित्यत्वप्रसङ्गात्, परोक्षत्वानुपपत्तेश्च ज्ञानफलस्य। तस्मात् ब्रह्माधिगमे दुरितक्षय इति स्थितम्॥

## इतरस्याप्येवमसंश्लेषः पाते तु॥ १४॥

पूर्वस्मिन्नधिकरणे बन्धहेतोरघस्य स्वाभाविकस्य अश्लेषविनाशौ ज्ञाननिमित्तौ शास्त्रव्यपदेशान्निरूपितौ; धर्मस्य

१०. इतरासंश्लेषाधिकरणम्।

पुनः शास्त्रीयत्वात् शास्त्रीयेण ज्ञानेन अविरोध इत्याशङ्क्य तन्निराकरणाय पूर्वाधिकरणन्यायातिदेशः क्रियते— इतरस्यापि पुण्यस्य कर्मणः एवम् अघवत् असंश्लेषो विनाशश्च ज्ञानवतो भवतः; कुतः? तस्यापि स्वफलहेतुत्वेन ज्ञानफलप्रतिबन्धित्वप्रसङ्गात्, 'उभे उ हैवैष एते तरति' इत्यादिश्रुतिषु च दुष्कृतवत्सुकृतस्यापि प्रणाशव्यपदेशात्, अकर्त्रात्मत्वबोधनिमित्तस्य च कर्मक्षयस्य

सुकृतदुष्कृतयोस्तुल्यत्वात्, 'क्षीयन्ते चास्य कर्माणि' इति च अविशेषश्रुतेः । यत्रापि केवल एव पाप्मशब्दः पठ्यते, तत्रापि तेनैव पुण्यमप्याकलितमिति द्रष्टव्यम्, ज्ञानापेक्षया निकृष्टफलत्वात् । अस्ति च श्रुतौ पुण्येऽपि पाप्मशब्दः—'नैनं सेतुमहोरात्रे तरतः' इत्यत्र सह दुष्कृतेन सुकृतमप्यनुक्रम्य, 'सर्वे पाप्मानोऽतो निवर्तन्ते' इत्यविशेषेणैव प्रकृते पुण्ये पाप्मशब्दप्रयोगात् । 'पाते तु' इति तु-शब्दोऽवधारणार्थः । एवं धर्माधर्मयोर्बन्धहेत्वोः विद्यासामर्थ्यादश्लेषविनाशसिद्धेः अवश्यंभाविनी विदुषः शरीरपाते मुक्तिरित्यवधारयति ॥

## अनारब्धकार्ये एव तु पूर्वे तदवधेः ॥ १५ ॥

पूर्वयोरधिकरणयोर्ज्ञाननिमित्तः सुकृतदुष्कृतयोर्विनाशोऽवधारितः; स किमविशेषेण आरब्धकार्ययोरनारब्धकार्ययोश्च भवति, उत विशेषेणानारब्धकार्ययोरेवेति विचार्यते । तत्र 'उभे उ हैवैष एते तरति' इत्येवमादिश्रुतिष्वविशेषश्रवणादविशेषेणैव क्षय इत्येवं प्राप्ते, प्रत्याह— अनारब्धकार्ये एव त्विति । अप्रवृत्तफले एव पूर्वे जन्मान्तरसंचिते, अस्मिन्नपि च जन्मनि प्राग्ज्ञानोत्पत्तेः संचिते, सुकृतदुष्कृते ज्ञानाधिगमात् क्षीयेते; न तु आरब्धकार्ये सामिभुक्तफले, याभ्यामेतत् ब्रह्मज्ञानायतनं जन्म

११. अनारब्धाधिकरणम् ।

निर्मितम् । कुत एतत्? 'तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये' इति शरीरपातावधिकरणात्क्षेमप्राप्तेः; इतरथा हि ज्ञानादशेषकर्मक्षये सति स्थितिहेत्वभावात् ज्ञानप्राप्त्यनन्तरमेव क्षेममश्नुवीत; तत्र शरीरपातप्रतीक्षां न आचक्षीत । ननु वस्तुबलेनैव अयमकर्त्रात्मावबोधः कर्माणि क्षपयन् कथं कानिचित्क्षपयेत् कानिचिच्चोपेक्षेत? न हि समानेऽग्निबीजसंपर्के, केषांचिद्बीजशक्तिः क्षीयते, केषांचिन्न क्षीयते– इति शक्यमङ्गीकर्तुमिति; उच्यते— न तावदनाश्रित्य आरब्धकार्यं कर्माशयं ज्ञानोत्पत्तिरुपपद्यते; आश्रिते च तस्मिन्कुलालचक्रवत्प्रवृत्तवेगस्य अन्तराले प्रतिबन्धासंभवात् भवति वेगक्षयप्रतिपालनम् । अकर्त्रात्मबोधोऽपि हि मिथ्याज्ञानबाधनेन कर्माण्युच्छिनत्ति; बाधितमपि तु मिथ्याज्ञानं द्विचन्द्रज्ञानवत्संस्कारवशात्कंचित्कालमनुवर्तत एव । अपि च नैवात्र विवदितव्यम्– ब्रह्मविदा कंचित्कालं शरीरं ध्रियते न वा ध्रियत इति; कथं हि एकस्य स्वहृदयप्रत्ययं ब्रह्मवेदनं देहधारणं च अपरेण प्रतिक्षेप्तुं शक्येत? श्रुतिस्मृतिषु च स्थितप्रज्ञलक्षणनिर्देशेन एतदेव निरुच्यते । तस्मादनारब्धकार्ययोरेव सुकृतदुष्कृतयोर्विद्यासामर्थ्यात्क्षय इति निर्णयः ॥

**अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् ॥**

पुण्यस्याप्यश्लेषविनाशयोरघन्यायोऽतिदिष्टः; सोऽतिदेशः सर्वपुण्यविषय इत्याशङ्क्य प्रतिवक्ति—अग्निहोत्रादि त्विति।

**१२. अग्निहोत्राद्यधिकरणम्।**

तु-शब्द आशङ्कामपनुदति; यन्नित्यं कर्म वैदिकमग्निहोत्रादि, तत् तत्कार्यायैव भवति; ज्ञानस्य यत्कार्यं तदेव अस्यापि कार्यमित्यर्थः; कुतः? 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन' इत्यादिदर्शनात्। ननु ज्ञानकर्मणोर्विलक्षणकार्यत्वात्कार्यैकत्वानुपपत्तिः—नैष दोषः, ज्वरमरणकार्ययोरपि दधिविषयोः गुडमन्त्रसंयुक्तयोस्तृप्तिपुष्टिकार्यदर्शनात्, तद्वत् कर्मणोऽपि ज्ञानसंयुक्तस्य मोक्षकार्योपपत्तेः। ननु अनारभ्यो मोक्षः, कथमस्य कर्मकार्यत्वमुच्यते? नैष दोषः, आरादुपकारकत्वात्कर्मणः; ज्ञानस्यैव हि प्रापकं सत् कर्म प्रणाड्या मोक्षकारणमित्युपचर्यते; अत एव च अतिक्रान्तविषयमेतत्कार्यैकत्वाभिधानम्। न हि ब्रह्मविद आगाम्यग्निहोत्रादि संभवति, अनियोज्यब्रह्मात्मत्वप्रतिपत्तेः शास्त्रस्याविषयत्वात्। सगुणासु तु विद्यासु कर्तृत्वानतिवृत्तेः संभवति आगाम्यपि अग्निहोत्रादि। तस्यापि निरभिसंधिनः कार्यान्तराभावाद्विद्यासंगत्युपपत्तिः॥

किंविषयं पुनरिदम् अश्लेषविनाशवचनम्, किंविषयं वा अदो विनियोगवचनम् एकेषां शाखिनाम्— 'तस्य पुत्रा

दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्याम्' इति —अत उत्तरं पठति—

## अतोऽन्यापि ह्येकेषामुभयोः ॥ १७ ॥

अतोऽग्निहोत्रादेर्नित्यात्कर्मणः अन्यापि ह्यस्ति साधुकृत्या, या फलमभिसंधाय क्रियते, तस्या एष विनियोग उक्तः एकेषां शाखिनाम्—'सुहृदः साधुकृत्यामुपयन्ति' इति । तस्या एव च इदम् अघवदश्लेषविनाशनिरूपणम्—इतरस्याप्येवमसंश्लेष इति । तथाजातीयकस्य काम्यस्य कर्मणो विद्यां प्रत्यनुपकारकत्वे संप्रतिपत्तिः उभयोरपि जैमिनिबादरायणयोराचार्ययोः ॥

## यदेव विद्ययेति हि ॥ १८ ॥

१३. विद्याज्ञानसाधनत्वाधिकरणम् ।

समधिगतमेतदनन्तराधिकरणे — नित्यमग्निहोत्रादिकं कर्म मुमुक्षुणा मोक्षप्रयोजनोद्देशेन कृतमुपात्तदुरितक्षयहेतुद्वारेण सत्त्वशुद्धिकारणतां प्रतिपद्यमानं मोक्षप्रयोजनब्रह्माधिगमनिमित्तत्वेन ब्रह्मविद्यया सह एककार्यं भवतीति; तत्र अग्निहोत्रादि कर्माङ्गव्यपाश्रयविद्यासंयुक्तं केवलं चास्ति— 'य एवं विद्वान्यजति' 'य एवं विद्वाञ्जुहोति' 'य एवं

विद्वाञ्शंसति' 'य एवं विद्वान्गायति' 'तस्मादेवंविदमेव ब्रह्माणं कुर्वीत' 'तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेद' इत्यादिवचनेभ्यो विद्यासंयुक्तमस्ति, केवलमप्यस्ति। तत्रेदं विचार्यते—किं विद्यासंयुक्तमेव अग्निहोत्रादिकं कर्म मुमुक्षोर्विद्याहेतुत्वेन तया सह एककार्यत्वं प्रतिपद्यते, न केवलम्; उत विद्यासंयुक्तं केवलं च अविशेषेणेति। कुतः संशयः? 'तमेतमात्मानं यज्ञेन विविदिषन्ति' इति यज्ञादीनामविशेषेण आत्मवेदनाङ्गत्वेन श्रवणात्, विद्यासंयुक्तस्य च अग्निहोत्रादेर्विशिष्टत्वावगमात्। किं तावत्प्राप्तम्? विद्यासंयुक्तमेव कर्म अग्निहोत्रादि आत्मविद्याशेषत्वं प्रतिपद्यते, न विद्याहीनम्, विद्योपेतस्य विशिष्टत्वावगमाद्विद्याविहीनात्— 'यदहरेव जुहोति तदहः पुनर्मृत्युमपजयत्येवं विद्वान्' इत्यादिश्रुतिभ्यः, 'बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि' 'दूरेण ह्यवरं कर्म बुद्धियोगाद्धनंजय' इत्यादिस्मृतिभ्यश्च इत्येवं प्राप्ते—

प्रतिपाद्यते— यदेव विद्ययेति हि। सत्यमेतत्—विद्यासंयुक्तं कर्म अग्निहोत्रादिकं विद्याविहीनात्कर्मणोऽग्निहोत्राद्विशिष्टम्, विद्वानिव ब्राह्मणो विद्याविहीनाद्ब्राह्मणात्; तथापि नात्यन्तमनपेक्षं विद्याविहीनं कर्म अग्निहोत्रादिकम्;

कस्मात्? 'तमेतमात्मानं यज्ञेन विविदिषन्ति' इत्यविशेषेण अग्निहोत्रादेर्विद्याहेतुत्वेन श्रुतत्वात्। ननु विद्यासंयुक्तस्य अग्निहोत्रादेर्विद्याविहीनाद्विशिष्टत्वावगमात् विद्याविहीनमग्निहोत्रादि आत्मविद्याहेतुत्वेनानपेक्ष्यमेवेति युक्तम्— नैतदेवम्; विद्यासहायस्याग्निहोत्रादेर्विद्यानिमित्तेन सामर्थ्यातिशयेन योगात् आत्मज्ञानं प्रति कश्चित्कारणत्वातिशयो भविष्यति, न तथा विद्याविहीनस्य—इति युक्तं कल्पयितुम्; न तु 'यज्ञेन विविदिषन्ति' इत्यत्राविशेषेणात्मज्ञानाङ्गत्वेन श्रुतस्याग्निहोत्रादेरनङ्गत्वं शक्यमभ्युपगन्तुम्; तथा हि श्रुतिः—'यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति' इति विद्यासंयुक्तस्य कर्मणोऽग्निहोत्रादेः वीर्यवत्तरत्वाभिधानेन स्वकार्यं प्रति कंचिदतिशयं ब्रुवाणा विद्याविहीनस्य तस्यैव तत्प्रयोजनं प्रति वीर्यवत्त्वं दर्शयति; कर्मणश्च वीर्यवत्त्वं तत्, यत्स्वप्रयोजनसाधनसहत्वम्। तस्माद्विद्यासंयुक्तं नित्यमग्निहोत्रादि विद्याविहीनं च उभयमपि मुमुक्षुणा मोक्षप्रयोजनोद्देशेन इह जन्मनि जन्मान्तरे च प्राग्ज्ञानोत्पत्तेः कृतं यत्, तद्यथासामर्थ्यं ब्रह्माधिगमप्रतिबन्धकारणोपात्तदुरितक्षयहेतुत्वद्वारेण ब्रह्माधिगमकारणत्वं प्रतिपद्यमानं श्रवणमननश्रद्धातात्पर्याद्यन्तरङ्गकारणापेक्षं ब्रह्मविद्यया

सह एककार्यं भवतीति स्थितम् ॥

**भोगेन त्वितरे क्षपयित्वा संपद्यते ॥ १९ ॥**

अनारब्धकार्ययोः पुण्यपापयोर्विद्यासामर्थ्यात्क्षय उक्तः । इतरे तु आरब्धकार्ये पुण्यपापे उपभोगेन क्षपयित्वा ब्रह्म
१४. इतरक्षपणाधिकरणम् । संपद्यते, 'तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये' इति 'ब्रह्मैव सन्ब्रह्माप्येति' इति च एवमादिश्रुतिभ्यः । ननु सत्यपि सम्यग्दर्शने यथा प्राग्देहपाताद्भेददर्शनं द्विचन्द्रदर्शनन्यायेनानुवृत्तम्, एवं पश्चादप्यनुवर्तेत—न, निमित्ताभवात् । उपभोगशेषक्षपणं हि तत्रानुवृत्तिनिमित्तम्, न च तादृशमत्र किंचिदस्ति । ननु अपरः कर्माशयोऽभिनवमुपभोगमारप्स्यते—न, तस्य दग्धबीजत्वात्; मिथ्याज्ञानावष्टम्भं हि कर्मान्तरं देहपात उपभोगान्तरमारभेत; तच्च मिथ्याज्ञानं सम्यग्ज्ञानेन दग्धम्—इत्यतः साध्वेतत् आरब्धकार्यक्षये विदुषः कैवल्यमवश्यं भवतीति ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्द-
भगवत्पूज्यपादशिष्यस्य श्रीमच्छंकरभगवतः कृतौ
**शारीरकमीमांसासूत्रभाष्ये**
**चतुर्थाध्यायस्य प्रथमः पादः ॥**

श्रीमच्छंकरभगवत्पादैर्विरचितम्

# ॥ ब्रह्मसूत्रभाष्यम् ॥

## चतुर्थाध्याये

## द्वितीयः पादः

## द्वितीयः पादः ॥

अथ अपरासु विद्यासु फलप्राप्तये देवयानं पन्थानमवतारयिष्यन् प्रथमं तावत् यथाशास्त्रमुत्क्रान्तिक्रममन्वाचष्टे ; समाना हि विद्वदविदुषोरुत्क्रान्तिरिति वक्ष्यति—

**वाङ्मनसि दर्शनाच्छब्दाच्च ॥ १ ॥**

अस्ति प्रायणविषया श्रुतिः— 'अस्य सोम्य पुरुषस्य प्रयतो वाङ्मनसि संपद्यते मनः प्राणे प्राणस्तेजसि तेजः

१. वागधि-करणम् ।

परस्यां देवतायाम्' इति । किमिह वाच एव वृत्तिमत्त्या मनसि संपत्तिरुच्यते, उत वाग्वृत्तेरिति विशयः । तत्र वागेव तावत् मनसि संपद्यत इति प्राप्तम् ; तथा हि श्रुतिरनुगृहीता भवति ; इतरथा लक्षणा स्यात् ; श्रुतिलक्षणाविशये च श्रुतिर्न्याय्या, न लक्षणा ; तस्मात् वाच एव अयं मनसि प्रलय इति ॥

एवं प्राप्ते, ब्रूमः— वाग्वृत्तिर्मनसि संपद्यत इति । कथं वाग्वृत्तिरिति व्याख्यायते, यावता 'वाङ्मनसि' इत्येव

आचार्यः पठति? सत्यमेतत्; पठिष्यति तु परस्तात्— 'अविभागो वचनात्' इति; तस्मादत्र वृत्त्युपशममात्रं विवक्षतीति गम्यते। तत्त्वप्रलयविवक्षायां तु सर्वत्रैव अविभागसाम्यात् किं परत्रैव विशिंष्यात्— 'अविभागः' इति; तस्मादत्र वृत्त्युपसंहारविवक्षा। वाग्वृत्तिः पूर्वमुपसंह्रियते मनोवृत्ताववस्थितायामित्यर्थः। कस्मात्? दर्शनात्— दृश्यते हि वाग्वृत्तेः पूर्वोपसंहारो मनोवृत्तौ विद्यमानायाम्; न तु वाच एव वृत्तिमत्त्या मनस्युपसंहारः केनचिदपि द्रष्टुं शक्यते। ननु श्रुतिसामर्थ्यात् वाच एवायं मनस्यप्ययो युक्त इत्युक्तम्— नेत्याह, अतत्प्रकृतित्वात्; यस्य हि यत उत्पत्तिः, तस्य तत्र प्रलयो न्याय्यः, मृदीव शरावस्य; न च मनसो वागुत्पद्यत इति किंचन प्रमाणमस्ति। वृत्त्युद्भवाभिभवौ तु अप्रकृतिसमाश्रयावपि दृश्येते; पार्थिवेभ्यो हि इन्धनेभ्यः तैजसस्याग्नेर्वृत्तिरुद्भवति, अप्सु च उपशाम्यति। कथं तर्हि अस्मिन्पक्षे शब्दः— 'वाङ्मनसि संपद्यते' इति? अत आह— शब्दाच्चेति; शब्दोऽप्यस्मिन्पक्षेऽवकल्पते, वृत्तिवृत्तिमतोरभेदोपचारादित्यर्थः॥

## अत एव च सर्वाण्यनु ॥ २ ॥

'तस्मादुपशान्ततेजाः पुनर्भवमिन्द्रियैर्मनसि संपद्यमानैः'

इत्यत्र अविशेषेण सर्वेषामेवेन्द्रियाणां मनसि संपत्तिः श्रूयते; तत्रापि अत एव वाच इव चक्षुरादीनामपि सवृत्तिके मनस्यवस्थिते वृत्तिलोपदर्शनात् तत्त्वप्रलयासंभवात् शब्दोपपत्तेश्च वृत्तिद्वारेणैव सर्वाणीन्द्रियाणि मनोऽनुवर्तन्ते । सर्वेषां करणानां मनस्युपसंहाराविशेषे सति वाचः पृथग्ग्रहणम् 'वाङ्मनसि संपद्यते' इत्युदाहरणानुरोधेन ॥

### तन्मनः प्राण उत्तरात् ॥ ३ ॥

समधिगतमेतत्—'वाङ्मनसि संपद्यते' इत्यत्र वृत्तिसंपत्तिविवक्षेति; अथ यदुत्तरं वाक्यम् 'मनः प्राणे' इति, किमत्रापि वृत्तिसंपत्तिरेव विवक्ष्यते, उत वृत्तिमत्संपत्तिः— इति विचिकित्सायाम्, वृत्तिमत्संपत्तिरेव अत्र इति प्राप्तम्, श्रुत्यनुग्रहात्; तत्प्रकृतित्वोपपत्तेश्च; तथा हि—'अन्नमयं हि सोम्य मन आपोमयः प्राणः' इत्यन्नयोनि मन आमनन्ति, अब्योनिं च प्राणम्; आपश्चान्नमसृजन्त—इति श्रुतिः । अतश्च यन्मनः प्राणे प्रलीयते, अन्नमेव तदप्सु प्रलीयते; अन्नं हि मनः, आपश्च प्राणः, प्रकृतिविकाराभेदादिति । एवं प्राप्ते, ब्रूमः—तदपि आगृहीतबाह्येन्द्रियवृत्ति मनो वृत्तिद्वारेणैव प्राणे प्रलीयत इति उत्तराद्वाक्यादवगन्तव्यम्; तथा हि सुषुप्सो-

२. मनोऽधिकरणम् ।

र्मुमूर्षोश्च प्राणवृत्तौ परिस्पन्दात्मिकायामवस्थितायाम्, मनोवृत्तीनामुपशमो दृश्यते; न च मनसः स्वरूपाप्ययः प्राणे संभवति; अतत्प्रकृतित्वात्। ननु दर्शितं मनसः प्राणप्रकृतित्वम्—नैतत्सारम्; न हि ईदृशेन प्राणाडिकेन तत्प्रकृतित्वेन मनः प्राणे संपत्तुमर्हति; एवमपि हि अन्ने मनः संपद्येत, अप्सु चान्नम्, अप्स्वेव च प्राणः; न ह्येतस्मिन्नपि पक्षे प्राणभावपरिणताभ्योऽद्भ्यो मनो जायत इति किंचन प्रमाणमस्ति; तस्मात् न मनसः प्राणे स्वरूपाप्ययः। वृत्त्यप्ययेऽपि तु शब्दोऽवकल्पते, वृत्तिवृत्तिमतोरभेदोपचारात् इति दर्शितम्॥

## सोऽध्यक्षे तदुपगमादिभ्यः॥ ४॥

स्थितमेतत्—यस्य यतो नोत्पत्तिः, तस्य तस्मिन्वृत्तिप्रलयः, न स्वरूपप्रलय इति; इदमिदानीम् 'प्राणस्तेजसि'

३. अध्यक्षाधिकरणम्।

इत्यत्र चिन्त्यते—किं यथाश्रुति प्राणस्य तेजस्येव वृत्त्युपसंहारः, किं वा देहेन्द्रियपञ्जराध्यक्षे जीव इति। तत्र श्रुतेरनतिशङ्क्यत्वात् प्राणस्य तेजस्येव संपत्तिः स्यात्, अश्रुतकल्पनाया अन्याय्यत्वात्—इत्येवं प्राप्ते प्रतिपद्यते—सोऽध्यक्ष इति। स प्रकृतः प्राणः, अध्यक्षे अविद्याकर्मपूर्वप्रज्ञोपाधिके विज्ञानात्मनि अवतिष्ठते;

तत्प्रधाना प्राणवृत्तिर्भवतीत्यर्थः ; कुतः ? तदुपगमादिभ्यः— 'एवमेवेममात्मानमन्तकाले सर्वे प्राणा अभिसमायन्ति यत्रैतदूर्ध्वोच्छ्वासी भवति' इति हि श्रुत्यन्तरम् अध्यक्षोपगामिनः सर्वान्प्राणान् अविशेषेण दर्शयति; विशेषेण च 'तमुत्क्रामन्तं प्राणोऽनूत्क्रामति' इति पञ्चवृत्तेः प्राणस्य अध्यक्षानुगामितां दर्शयति, तदनुवृत्तितां च इतरेषाम् 'प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति' इति; 'सविज्ञानो भवति' इति च अध्यक्षस्य अन्तर्विज्ञानवत्त्वप्रदर्शनेन तस्मिन् अपीतकरणग्रामस्य प्राणस्य अवस्थानं गमयति। ननु 'प्राणस्तेजसि' इति श्रूयते; कथं प्राणोऽध्यक्षे इत्यधिकावापः क्रियते? नैष दोषः, अध्यक्षप्रधानत्वादुत्क्रमणादिव्यवहारस्य, श्रुत्यन्तरगतस्यापि च विशेषस्यापेक्षणीयत्वात् ॥

कथं तर्हि 'प्राणस्तेजसि' इति श्रुतिरित्यत आह—

## भूतेषु तच्छ्रुतेः ॥ ५ ॥

स प्राणसंपृक्तोऽध्यक्षः तेजःसहचरितेषु भूतेषु देहबीजभूतेषु सूक्ष्मेषु अवतिष्ठत इत्यवगन्तव्यम्, 'प्राणस्तेजसि' इति श्रुतेः। ननु च इयं श्रुतिः प्राणस्य तेजसि स्थितिं

दर्शयति, न प्राणसंपृक्तस्याध्यक्षस्य— नैष दोषः, सोऽध्यक्षे— इति अध्यक्षस्याप्यन्तराल उपसंख्यातत्वात्; योऽपि हि स्रुघ्नान्मथुरां गत्वा मथुरायाः पाटलिपुत्रं व्रजति, सोऽपि स्रुघ्नात्पाटलिपुत्रं यातीति शक्यते वदितुम्; तस्मात् 'प्राणस्तेजसि' इति प्राणसंपृक्तस्याध्यक्षस्यैव एतत् तेजःसहचरितेषु भूतेष्ववस्थानम् ॥

कथं तेजःसहचरितेषु भूतेष्वित्युच्यते, यावता एकमेव तेजः श्रूयते— 'प्राणस्तेजसि' इति? अत आह—

## नैकस्मिन्दर्शयतो हि ॥ ६ ॥

न एकस्मिन्नेव तेजसि शरीरान्तरप्रेप्सावेलायां जीवोऽवतिष्ठते, कार्यस्य शरीरस्यानेकात्मकत्वदर्शनात्। दर्शयतश्च एतमर्थं प्रश्नप्रतिवचने 'आपः पुरुषवचसः' इति; तद्व्याख्यातम् 'त्र्यात्मकत्वात्तु भूयस्त्वात्' इत्यत्र। श्रुतिस्मृती च एतमर्थं दर्शयतः; श्रुतिः— 'पृथ्वीमय आपोमयो वायुमय आकाशमयस्तेजोमयः' इत्याद्या; स्मृतिरपि— अण्व्यो मात्राविनाशिन्यो दशार्धानां तु याः स्मृताः। ताभिः सार्धमिदं सर्वं संभवत्यनुपूर्वशः' इत्याद्या। ननु च उपसंहृतेषु वागादिषु करणेषु शरीरान्तरप्रेप्सावेलायाम् 'कार्यं तदा

पुरुषो भवति' इत्युपक्रम्य श्रुत्यन्तरं कर्माश्रयतां निरूपयति— 'तौ ह यदूचतुः कर्म हैव तदूचतुरथ ह यत्प्रशशंसतुः कर्म हैव तत्प्रशशंसतुः' इति; अत्रोच्यते— तत्र कर्मप्रयुक्तस्य ग्रहातिग्रहसंज्ञकस्य इन्द्रियविषयात्मकस्य बन्धनस्य प्रवृत्तिरिति कर्माश्रयतोक्ता; इह पुनः भूतोपादानाद्देहान्तरोत्पत्तिरिति भूताश्रयत्वमुक्तम्; प्रशंसाशब्दादपि तत्र प्राधान्यमात्रं कर्मणः प्रदर्शितम्, न त्वाश्रयान्तरं निवारितम्; तस्मादविरोधः॥

## समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य॥ ७॥

४. आसृत्युपक्रमाधिकरणम्।

सेयमुत्क्रान्तिः किं विद्वदविदुषोः समाना, किं वा विशेषवती— इति विशयानानां विशेषवतीति तावत्प्राप्तम्। भूताश्रयविशिष्टा ह्येषा; पुनर्भवाय च भूतान्याश्रीयन्ते; न च विदुषः पुनर्भवः संभवति; अमृतत्वं हि विद्वानश्नुते— इति स्थितिः; तस्मादविदुष एव एषा उत्क्रान्तिः। ननु विद्याप्रकरणे समाम्नानात् विदुष एव एषा भवेत्— न, स्वापादिवत् यथाप्राप्तानुकीर्तनात्; यथा हि 'यत्रैतत्पुरुषः स्वपिति नाम' 'अशिशिषति नाम' 'पिपासति नाम' इति च सर्वप्राणिसाधारणा एव स्वापाद-

योऽनुकीर्त्यन्ते विद्याप्रकरणेऽपि प्रतिपिपादयिषितवस्तुप्रतिपादनानुगुण्येन, न तु विदुषो विशेषवन्तो विधित्स्यन्ते ; एवम् इयमपि उत्क्रान्तिः महाजनगतैवानुकीर्त्यते, यस्यां परस्यां देवतायां पुरुषस्य प्रयतः तेजः संपद्यते स आत्मा तत्त्वमसि— इत्येतत्प्रतिपादयितुम् । प्रतिषिद्धा च एषा विदुषः— 'न तस्य प्राणा उत्क्रामन्ति' इति । तस्मात् अविदुष एवैषेति ॥

एवं प्राप्ते, ब्रूमः—समाना चैषा उत्क्रान्तिः 'वाङ्मनसि' इत्याद्या विद्वदविदुषोः आसृत्युपक्रमात् भवितुमर्हति, अविशेषश्रवणात्; अविद्वान् देहबीजभूतानि भूतसूक्ष्माण्याश्रित्य कर्मप्रयुक्तो देहग्रहणमनुभवन् संसरति, विद्वांस्तु ज्ञानप्रकाशितं मोक्षनाडीद्वारमाश्रयते— तदेतत् 'आसृत्युपक्रमात्' इत्युक्तम् । ननु अमृतत्वं विदुषा प्राप्तव्यम्, न च तद्देशान्तरायत्तम्, तत्र कुतो भूताश्रयत्वं सृत्युपक्रमो वेति— अत्रोच्यते— अनुपोष्य च, इदम्, अदग्ध्वा अत्यन्तमविद्यादीन्क्लेशान्, अपरविद्यासामर्थ्यात् आपेक्षिकममृतत्वं प्रेप्सते संभवति तत्र सृत्युपक्रमः; भूताश्रयत्वं च— न हि निराश्रयाणां प्राणानां गतिरुपपद्यते ; तस्माददोषः ॥

## तदापीतेः संसारव्यपदेशात् ॥ ८ ॥

'तेजः परस्यां देवतायाम्' इत्यत्र प्रकरणसामर्थ्यात् तत् यथा प्रकृतं तेजः साध्यक्षं सप्राणं सकरणग्रामं भूतान्तरसहितं प्रयतः पुंसः परस्यां देवतायां संपद्यत इत्येतदुक्तं भवति; कीदृशी पुनरियं संपत्तिः स्यादिति चिन्त्यते। तत्र आत्यन्तिक एव तावत् स्वरूपप्रविलय इति प्राप्तम्, तत्प्रकृतित्वोपपत्तेः; सर्वस्य हि जनिमतो वस्तुजातस्य प्रकृतिः परा देवतेति प्रतिष्ठापितम्; तस्मात् आत्यन्तिकी इयमविभागापत्तिरिति। एवं प्राप्ते, ब्रूमः —तत् तेजआदि भूतसूक्ष्मं श्रोत्रादिकरणाश्रयभूतम् आपीतेः आसंसारमोक्षात् सम्यग्ज्ञाननिमित्तात् अवतिष्ठते—'योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः। स्थाणुमन्येऽनुसंयन्ति यथाकर्म यथाश्रुतम्' इत्यादिसंसारव्यपदेशात्; अन्यथा हि सर्वः प्रायणसमय एव उपाधिप्रत्यस्तमयादत्यन्तं ब्रह्म संपद्येत, तत्र विधिशास्त्रमनर्थकं स्यात्, विद्याशास्त्रं च; मिथ्याज्ञाननिमित्तश्च बन्धो न सम्यग्ज्ञानादृते विस्रंसितुमर्हति; तस्मात् तत्प्रकृतित्वेऽपि सुषुप्तिप्रलयवत् बीजभावावशेषैव एषा सत्संपत्तिरिति॥

५. संसारव्यपदेशाधिकरणम्।

## सूक्ष्मं प्रमाणतश्च तथोपलब्धेः॥ ९॥

तच्च इतरभूतसहितं तेजो जीवस्य अस्माच्छरीरात्प्रवसत

आश्रयभूतं स्वरूपतः परिमाणतश्च सूक्ष्मं भवितुमर्हति । तथा हि नाडीनिष्क्रमणश्रवणादिभ्योऽस्य सौक्ष्म्यमुपलभ्यते । तत्र तनुत्वात्संचारोपपत्तिः ; स्वच्छत्वाच्च अप्रतिघातोपपत्तिः ; अत एव च देहान्निर्गच्छत् पार्श्वस्थैर्नोपलभ्यते ॥

## नोपमर्देनातः ॥ १० ॥

अत एव च सूक्ष्मत्वात् नास्य स्थूलस्य शरीरस्योपमर्देन दाहादिनिमित्तेन इतरत्सूक्ष्मं शरीरमुपमृद्यते ॥

## अस्यैव चोपपत्तेरेष ऊष्मा ॥ ११ ॥

अस्यैव च सूक्ष्मस्य शरीरस्य एष ऊष्मा, यमेतस्मिञ्जीवच्छरीरे संस्पर्शेनोष्माणं विजानन्ति । तथा हि मृतावस्थायाम् अवस्थितेऽपि देहे विद्यमानेष्वपि च रूपादिषु देहगुणेषु, न ऊष्मा उपलभ्यते, जीवदवस्थायामेव तु उपलभ्यते— इत्यत उपपद्यते प्रसिद्धशरीरव्यतिरिक्तव्यपाश्रय एव एष ऊष्मेति । तथा च श्रुतिः—'उष्ण एव जीविष्यञ्शीतो मरिष्यन्' इति ॥

## प्रतिषेधादिति चेन्न शारीरात् ॥ १२ ॥

'अमृतत्वं चानुपोष्य' इत्यतो विशेषणात् आत्यन्तिकेऽमृ-

तत्त्वे गत्युत्क्रान्त्योरभावोऽभ्युपगतः; तत्रापि केनचित्कारणेन

६. प्रतिषेधाधिकरणम्।

उत्क्रान्तिमाशङ्क्य प्रतिषेधति— 'अथाकामयमानो योऽकामो निष्काम आप्तकाम आत्मकामो भवति न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन्ब्रह्माप्येति' इति। अतः परविद्याविषयात्प्रतिषेधात् न परब्रह्मविदो देहात् प्राणानामुत्क्रान्तिरस्तीति चेत्, नेत्युच्यते, यतः शारीरादात्मन एष उत्क्रान्तिप्रतिषेधः प्राणानाम्, न शरीरात्। कथमवगम्यते? 'न तस्मात्प्राणा उत्क्रामन्ति' इति शाखान्तरे पञ्चमीप्रयोगात्; संबन्धसामान्यविषया हि षष्ठी शाखान्तरगतया पञ्चम्या संबन्धविशेषे व्यवस्थाप्यते; 'तस्मात्' इति च प्राधान्यात् अभ्युदयनिःश्रेयसाधिकृतो देही संबध्यते, न देहः; न तस्मादुच्चिक्रमिषोर्जीवात् प्राणा अपक्रामन्ति, सहैव तेन भवन्ति— इत्यर्थः। सप्राणस्य च प्रवसतो भवत्युत्क्रान्तिर्देहादिति॥

एवं प्राप्ते, प्रत्युच्यते—

## स्पष्टो ह्येकेषाम् ॥ १३ ॥

नैतदस्ति— यदुक्तम्, परब्रह्मविदोऽपि देहात् अस्त्युत्क्रान्तिः उत्क्रान्तिप्रतिषेधस्य देहापादानत्वादिति; यतो

देहापादान एव उत्क्रान्तिप्रतिषेध एकेषां समाम्नातॄणां स्पष्ट उपलभ्यते । तथा हि— आर्तभागप्रश्ने 'यत्रायं पुरुषो म्रियत उदस्मात्प्राणाः क्रामन्त्याहो नेति' इत्यत्र, 'नेति होवाच याज्ञवल्क्यः' इत्यनुत्क्रान्तिपक्षं परिगृह्य, न तर्ह्ययमनुत्क्रान्तेषु प्राणेषु मृतः— इत्यस्यामाशङ्कायाम् 'अत्रैव समवनीयन्ते' इति प्रविलयं प्राणानां प्रतिज्ञाय, तत्सिद्धये 'स उच्छ्वयत्याध्मायत्याध्मातो मृतः शेते' इति स-शब्दपरामृष्टस्य प्रकृतस्य उत्क्रान्त्यवधेः उच्छ्वयनादीनि समामनन्ति; देहस्य च एतानि स्युः न देहिनः; तत्सामान्यात्, 'न तस्मात्प्राणा उत्क्रामन्त्यत्रैव समवनीयन्ते' इत्यत्रापि—अभेदोपचारेण देहापादानस्यैव उत्क्रमणस्य प्रतिषेधः— यद्यपि प्राधान्यं देहिनः— इति व्याख्येयम्, येषां पञ्चमीपाठः । येषां तु षष्ठीपाठः, तेषां विद्वत्संबन्धिनी उत्क्रान्तिः प्रतिषिध्यत इति, प्राप्तोत्क्रान्तिप्रतिषेधार्थत्वात् अस्य वाक्यस्य, देहापादानैव सा प्रतिषिद्धा भवति देहादुत्क्रान्तिः प्राप्ता, न देहिनः; अपि च 'चक्षुष्टो वा मूर्ध्नो वान्येभ्यो वा शरीरदेशेभ्यस्तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति' इत्येवमविद्वद्विषये सप्रपञ्चमुत्क्रमणं संसारगमनं च दर्शयित्वा, 'इति नु कामयमानः'

इति उपसंहृत्य अविद्वत्कथाम्, 'अथाकामयमानः' इति व्यपदिश्य विद्वांसम्—यदि तद्विषयेऽप्युत्क्रान्तिमेव प्रापयेत्, असमञ्जस एव व्यपदेशः स्यात्; तस्मात् अविद्वद्विषये प्राप्तयोर्गत्युत्क्रान्त्योः विद्वद्विषये प्रतिषेधः—इत्येवमेव व्याख्येयम्, व्यपदेशार्थवत्त्वाय। न च ब्रह्मविदः सर्वगतब्रह्मात्मभूतस्य प्रक्षीणकामकर्मणः उत्क्रान्तिः गतिर्वा उपपद्यते, निमित्ताभावात्। 'अत्र ब्रह्म समश्नुते' इति च एवंजातीयकाः श्रुतयो गत्युत्क्रान्त्योरभावं सूचयन्ति ॥

## स्मर्यते च ॥ १४ ॥

स्मर्यतेऽपि च महाभारते गत्युत्क्रान्त्योरभावः— 'सर्वभूतात्मभूतस्य सम्यग्भूतानि पश्यतः। देवा अपि मार्गे मुह्यन्त्यपदस्य पदैषिणः' इति। ननु गतिरपि ब्रह्मविदः सर्वगतब्रह्मात्मभूतस्य स्मर्यते— 'शुकः किल वैयासकिर्मुमुक्षुरादित्यमण्डलमभिप्रतस्थे पित्रा चानुगम्याहूतो भो इति प्रतिशुश्राव' इति— न; सशरीरस्यैव अयं योगबलेन विशिष्टदेशप्राप्तिपूर्वकः शरीरोत्सर्ग इति द्रष्टव्यम्, सर्वभूतद्रश्यत्वाद्युपन्यासात्; न हि अशरीरं गच्छन्तं सर्वभूतानि द्रष्टुं शक्नुयुः; तथा च तत्रैवोपसंहृतम्— 'शुकस्तु मारुताच्छीघ्रां गतिं कृत्वान्तरिक्षगः। दर्शयित्वा प्रभावं स्वं

सर्वभूतगतोऽभवत्' इति । तस्मादभावः परब्रह्मविदो गत्युत्क्रान्त्योः; गतिश्रुतीनां तु विषयमुपरिष्टाद्व्याख्यास्यामः ॥

## तानि परे तथा ह्याह ॥ १५ ॥

तानि पुनः प्राणशब्दोदितानि इन्द्रियाणि भूतानि च परब्रह्मविदः तस्मिन्नेव परस्मिन्नात्मनि प्रलीयन्ते; कस्मात्?

७. वागादिलयाधिकरणम् ।

तथा हि आह श्रुतिः—'एवमेवास्य परिद्रष्टुरिमाः षोडश कलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ति' इति । ननु 'गताः कलाः पञ्चदश प्रतिष्ठाः' इति विद्वद्विषयैवापरा श्रुतिः परस्मादात्मनोऽन्यत्रापि कलानां प्रलयम् आह स्म—न; सा खलु व्यवहारापेक्षा— पार्थिवाद्याः कलाः पृथिव्यादीरेव स्वप्रकृतीरपियन्तीति; इतरा तु विद्वत्प्रतिपत्त्यपेक्षा— कृत्स्नं कलाजातं परब्रह्मविदो ब्रह्मैव संपद्यत इति; तस्माददोषः ॥

## अविभागो वचनात् ॥ १६ ॥

स पुनर्विदुषः कलाप्रलयः किम् इतरेषामिव सावशेषो भवति, आहोस्विन्निरवशेष इति । तत्र प्रलयसामान्यात्

शक्त्यवशेषताप्रसक्तौ ब्रवीति— अविभागापत्तिरेवेति ; कुतः ?
८. अविभागाधिकरणम्। वचनात् ; तथा हि कलाप्रलयमुक्त्वा वक्ति— 'भिद्येते तासां नामरूपे पुरुष इत्येवं प्रोच्यते स एषोऽकलोऽमृतो भवति' इति । अविद्यानिमित्तानां च कलानां न विद्यानिमित्ते प्रलये सावशेषत्वोपपत्तिः । तस्मादविभाग एवेति ॥

**तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया ॥ १७ ॥**

समाप्ता प्रासङ्गिकी परविद्यागता चिन्ता ; संप्रति तु अपरविद्याविषयामेव चिन्तामनुवर्तयति । समाना च आसृत्यु-
९. तदोकोऽधिकरणम्। पक्रमात् विद्वदविदुषोरुत्क्रान्तिः— इत्युक्तम् ; तम् इदानीं सृत्युपक्रमं दर्शयति । तस्य उपसंहृतवागादिकलापस्योत्क्रमिषतो विज्ञानात्मनः, ओकः आयतनं हृदयम्— 'स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामति' इति श्रुतेः, तदग्रप्रज्वलनपूर्विका चक्षुरादिस्थानापादाना च उत्क्रान्तिः श्रूयते— 'तस्य हैत-

स्य हृदयस्याग्रं प्रद्योतते तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुष्टो वा मूर्ध्नो वान्येभ्यो वा शरीरदेशेभ्यः' इति। सा किमनियमेनैव विद्वदविदुषोर्भवति, अथास्ति कश्चिद्विदुषो विशेषनियमः—इति विचिकित्सायाम्, श्रुत्यविशेषादनियमप्राप्तौ, आचष्टे—समानेऽपि हि विद्वदविदुषोर्हृदयाग्रप्रद्योतने तत्प्रकाशितद्वारत्वे च, मूर्धस्थानादेव विद्वान्निष्क्रामति, स्थानान्तरेभ्यस्तु इतरे; कुतः? विद्यासामर्थ्यात्; यदि विद्वानपि इतरवत् यतः कुतश्चिद्देहदेशात् उत्क्रामेत्, नैव उत्कृष्टं लोकं लभेत, तत्र अनर्थिकैव विद्या स्यात्। तच्छेषगत्यनुस्मृतियोगाच्च—विद्याशेषभूता च मूर्धन्यनाडीसंबद्धा गतिः अनुशीलयितव्या विद्याविशेषेषु विहिता; तामभ्यस्यन् तयैव प्रतिष्ठत इति युक्तम्। तस्मात् हृदयालयेन ब्रह्मणा सूपासितेन अनुगृहीतः तद्भावं समापन्नो विद्वान् मूर्धन्ययैव शताधिकया शतादतिरिक्तया एकशततम्या नाड्या निष्क्रामति, इतराभिरितरे। तथा हि हार्दविद्यां प्रकृत्य समामनन्ति—'शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका। तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति' इति॥

## रश्म्यनुसारी ॥ १८ ॥

अस्ति हार्दविद्या 'अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म' इत्युपक्रम्य विहिता; तत्प्रक्रियायाम् 'अथ या

१०. रश्म्यधिकरणम्।

एता हृदयस्य नाड्यः' इत्युपक्रम्य सप्रपञ्चं नाडीरश्मिसंबन्धमुक्त्वा उक्तम्— 'अथ यत्रैतदस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्ध्वमाक्रमते' इति; पुनश्चोक्तम्— 'तयोर्ध्वमायन्नमृतत्वमेति' इति; तस्मात् शताधिकया नाड्या निष्क्रामन् रश्म्यनुसारी निष्क्रामतीति गम्यते। तत् किम् अविशेषेणैव अहनि रात्रौ वा म्रियमाणस्य रश्म्यनुसारित्वम्, आहोस्विदहन्येव —इति संशये सति, अविशेषश्रवणात् अविशेषेणैव तावत् रश्म्यनुसारीति प्रतिज्ञायते॥

## निशि नेति चेन्न संबन्धस्य यावद्देहभावित्वाद्दर्शयति च॥ १९॥

अस्ति अहनि नाडीरश्मिसंबन्ध इति अहनि मृतस्य स्यात् रश्म्यनुसारित्वम्; रात्रौ तु प्रेतस्य न स्यात्, नाडीरश्मिसंबन्धविच्छेदात्— इति चेत्, न, नाडीरश्मिसंबन्धस्य यावद्देहभावित्वात्; यावद्देहभावी हि शिराकिरणसंपर्कः; दर्शयति चैतमर्थं श्रुतिः— 'अमुष्मादादित्यात्प्र-

तायन्ते ता आसु नाडीषु सृप्ता आभ्यो नाडीभ्यः प्रतायन्ते तेऽमुष्मिन्नादित्ये सृप्ताः' इति; निदाघसमये च निशास्वपि किरणानुवृत्तिरुपलभ्यते, प्रतापादिकार्यदर्शनात्; स्तोकानुवृत्तेस्तु दुर्लक्ष्यत्वम् ऋत्वन्तररजनीषु, शैशिरेष्विव दुर्दिनेषु; 'अहरेवैतद्रात्रौ दधाति' इति च एतदेव दर्शयति। यदि च रात्रौ प्रेतः विनैव रश्म्यनुसारेण ऊर्ध्वमाक्रमेत, रश्म्यनुसारानर्थक्यं भवेत्; न ह्येतत् विशिष्य अभिधीयते—यो दिवा प्रैति, स रश्मीनपेक्ष्योर्ध्वमाक्रमते, यस्तु रात्रौ सोऽनपेक्ष्यैवेति; अथ तु विद्वानपि रात्रिप्रायणापराधमात्रेण नोर्ध्वमाक्रमेत, पाक्षिकफला विद्येति अप्रवृत्तिरेव तस्यां स्यात्, मृत्युकालानियमात्; अथापि रात्रावुपरतोऽहरागमम् उदीक्षेत, अहरागमेऽप्यस्य कदाचित् अरश्मिसंबन्धार्हं शरीरं स्यात् पावकादिसंपर्कात्; 'स यावत्क्षिप्येन्मनस्तावदादित्यं गच्छति' इति च श्रुतिः अनुदीक्षां दर्शयति। तस्मात् अविशेषेणैव इदं रात्रिंदिवं रश्म्यनुसारित्वम्॥

## अतश्चायनेऽपि दक्षिणे॥ २०॥

अत एव च उदीक्षानुपपत्तेः, अपाक्षिकफलत्वाच्च विद्यायाः, अनियतकालत्वाच्च मृत्योः, दक्षिणायनेऽपि म्रियमा-

११. दक्षिणायनाधिकरणम् ।

णो विद्वान् प्राप्नोत्येव विद्याफलम् । उत्तरायणमरणप्राशस्त्यप्रसिद्धेः, भीष्मस्य च प्रतीक्षादर्शनात्, 'आपूर्यमाणपक्षाद्यान्षडुदङ्ङेति मासांस्तान्' इति च श्रुतेः, अपेक्षितव्यमुत्तरायणम्— इतीमामाशङ्काम् अनेन सूत्रेणापनुदति; प्राशस्त्यप्रसिद्धिः अविद्वद्विषया; भीष्मस्य प्रतिपालनम् आचारपरिपालनार्थं पितृप्रसादलब्धस्वच्छन्दमृत्युताख्यापनार्थं च। श्रुतेस्तु अर्थं वक्ष्यति 'आतिवाहिकास्तल्लिङ्गात्' इति ॥

ननु च 'यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः । प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ' इति कालप्राधान्येन उपक्रम्य अहरादिकालविशेषः स्मृतावनावृत्तये नियतः; कथं रात्रौ दक्षिणायने वा प्रयातोऽनावृत्तिं यायात्— इत्यत्रोच्यते—

## योगिनः प्रति च स्मर्यते स्मार्ते चैते ॥ २१ ॥

योगिनः प्रति च अयम् अहरादिकालविनियोगः अनावृत्तये स्मर्यते; स्मार्ते चैते योगसांख्ये, न श्रौते; अतो विषयभेदात् प्रमाणविशेषाच्च नास्य स्मार्तस्य कालविनियोगस्य

श्रौतेषु विज्ञानेषु अवतारः। ननु 'अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम्। धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम्' इति च श्रौतावेतौ देवयानपितृयाणौ प्रत्यभिज्ञायेते स्मृतावपीति, उच्यते— 'तं कालं वक्ष्यामि' इति स्मृतौ कालप्रतिज्ञानात् विरोधमाशङ्क्य अयं परिहारः उक्तः। यदा पुनः स्मृतावपि अग्न्याद्या देवता एव आतिवाहिक्यो गृह्यन्ते, तदा न कश्चिद्विरोध इति ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छंकरभगवतः कृतौ

**शारीरकमीमांसासूत्रभाष्ये**

**चतुर्थाध्यायस्य द्वितीयः पादः ॥**

श्रीमच्छंकरभगवत्पादैर्विरचितम्

# ब्रह्मसूत्रभाष्यम्

## चतुर्थाध्याये
## तृतीयः पादः

## तृतीयः पादः ॥

आसृत्युपक्रमात् समानोत्क्रान्तिरित्युक्तम्; सृतिस्तु श्रुत्यन्तरेष्वनेकधा श्रूयते— नाडीरश्मिसंबन्धेनैका 'अथैतैरेव रश्मिभिरूर्ध्व आक्रमते' इति; अर्चिरादिकैका 'तेऽर्चिषमभिसंभवन्त्यर्चिषोऽहः' इति; 'स एतं देवयानं पन्थानमासाद्याग्निलोकमागच्छति' इत्यन्या; 'यदा वै पुरुषोऽस्माल्लोकात्प्रैति स वायुमागच्छति' इत्यपरा; 'सूर्यद्वारेण ते विरजाः प्रयान्ति' इति च अपरा। तत्र संशयः— किं परस्परं भिन्ना एताः सृतयः, किं वा एकैव अनेकविशेषणेति। तत्र प्राप्तं तावत्— भिन्ना एताः सृतय इति, भिन्नप्रकरणत्वात्, भिन्नोपासनशेषत्वाच्च; अपि च 'अथैतैरेव रश्मिभिः' इत्यवधारणम् अर्चिराद्यपेक्षायाम् उपरुध्येत, त्वरावचनं च पीड्येत— 'स यावत्क्षिप्येन्मनस्तावदादित्यं गच्छति' इति; तस्मादन्योन्यभिन्ना एवैते पन्थान इति। एवं प्राप्ते, अभिदध्महे—

## अर्चिरादिना तत्प्रथितेः ॥ १ ॥

१. अर्चिराद्यधिकरणम्

अर्चिरादिनेति ; सर्वो ब्रह्म प्रेप्सुः अर्चिरादिनैवाध्वना रंहतीति प्रतिजानीमहे ; कुतः ? तत्प्रथितेः ; प्रथितो ह्येष मार्गः सर्वेषां विदुषाम् ; तथा हि पञ्चाग्निविद्याप्रकरणे—'ये चामी अरण्ये श्रद्धां सत्यमुपासते' इति विद्यान्तरशीलिनामपि अर्चिरादिका सृतिः श्राव्यते । स्यादेतत्—यासु विद्यासु न काचिद्गतिरुच्यते, तासु इयमर्चिरादिका उपतिष्ठताम् ; यासु तु अन्या श्राव्यते, तासु किमित्यर्चिराद्याश्रयणमिति, अत्रोच्यते—भवेदेतदेवम् , यद्यत्यन्तभिन्ना एव एताः सृतयः स्युः ; एकैव त्वेषा सृतिः अनेकविशेषणा ब्रह्मलोकप्रपदनी क्वचित् केनचित् विशेषणेनोपलक्षितेति वदामः, सर्वत्रैकदेशप्रत्यभिज्ञानात् इतरेतरविशेषणविशेष्यभावोपपत्तेः ; प्रकरणभेदेऽपि हि विद्यैकत्वे भवति इतरेतरविशेषणोपसंहारवत् गतिविशेषणानामप्युपसंहारः ; विद्याभेदेऽपि तु गत्येकदेशप्रत्यभिज्ञानात् गन्तव्याभेदाच्च गत्यभेद एव ; तथा हि— 'ते तेषु ब्रह्मलोकेषु पराः परावतो वसन्ति' 'तस्मिन्वसन्ति शाश्वतीः समाः' 'सा या ब्रह्मणो जितिर्या व्युष्टिस्तां जितिं जयति तां व्युष्टिं व्यश्नुते' 'तद्य एवैतं

ब्रह्मलोकं ब्रह्मचर्येणानुविन्दति' इति च तत्र तत्र तदेव एकं फलं ब्रह्मलोकप्राप्तिलक्षणं प्रदर्श्यते । यत्तु 'एतेनैव' इत्यवधारणम् अर्चिराद्याश्रयणे न स्यादिति, नैष दोषः, रश्मिप्राप्तिपरत्वादस्य ; न हि एक एव शब्दो रश्मींश्च प्रापयितुमर्हति, अर्चिरादींश्च व्यावर्तयितुम् ; तस्मात् रश्मिसंबन्ध एवायमवधार्यत इति द्रष्टव्यम् । त्वरावचनं तु अर्चिराद्यपेक्षायामपि गन्तव्यान्तरापेक्षया शैघ्र्यार्थत्वात् नोपरुध्यते— यथा निमेषमात्रेणात्रागम्यत इति । अपि च 'अथैतयोः पथोर्न कतरेणचन' इति मार्गद्वयभ्रष्टानां कष्टं तृतीयं स्थानमाचक्षाणा पितृयाणव्यतिरिक्तमेकमेव देवयानमर्चिरादिपर्वाणं पन्थानं प्रथयति ; भूयांस्यर्चिरादिस्मृतौ मार्गपर्वाणि, अल्पीयांसि त्वन्यत्र ; भूयसां च आनुगुण्येन अल्पीयसां नयनं न्याय्यमित्यतोऽपि अर्चिरादिना तत्प्रथितेरित्युक्तम् ॥

## वायुमब्दादविशेषविशेषाभ्याम् ॥ २ ॥

केन पुनः संनिवेशविशेषेण गतिविशेषणानाम् इतरेतरविशेषणविशेष्यभावः—इति तदेतत् सुहृद्भूत्वा आचार्यो ग्रथयति । 'स एतं देवयानं पन्थानमासाद्याग्निलोकमागच्छति स वायुलोकं स वरुणलोकं स इन्द्रलोकं स प्रजापतिलोकं स ब्रह्मलोकम्' इति

२. वाय्वधिकरणम् ।

कौषीतकिनां देवयानः पन्थाः पठ्यते; तत्र अर्चिरग्निलोकशब्दौ तावत् एकार्थौ ज्वलनवचनत्वादिति नात्र संनिवेशक्रमः कश्चिदन्वेष्यः; वायुस्तु अर्चिरादौ वर्त्मनि कतमस्मिन्स्थाने निवेशयितव्य इति, उच्यते— 'तेऽर्चिषमेवाभिसंभवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षडुदङ्ङेति मासांस्तान्मासेभ्यः संवत्सरं संवत्सरादादित्यम्' इत्यत्र संवत्सरात्पराञ्चम् आदित्यादर्वाञ्चं वायुमभिसंभवन्ति; कस्मात्? अविशेषविशेषाभ्याम्। तथा हि 'स वायुलोकम्' इत्यत्र अविशेषोपदिष्टस्य वायोः श्रुत्यन्तरेण विशेषोपदेशो दृश्यते—'यदा वै पुरुषोऽस्माल्लोकात्प्रैति स वायुमागच्छति तस्मै स तत्र विजिहीते यथा रथचक्रस्य खं तेन स ऊर्ध्वमाक्रमते स आदित्यमागच्छति' इति; एतस्मात् आदित्यात् वायोः पूर्वत्वदर्शनात् विशेषात् अब्दादित्ययोरन्तराले वायुर्निवेशयितव्यः। कस्मात्पुनरग्नेः परत्वदर्शनाद्विशेषादर्चिषोऽनन्तरं वायुर्न निवेश्यते? नैषोऽस्ति विशेष इति वदामः; ननूदाहृता श्रुतिः—'स एतं देवयानं पन्थानमासाद्याग्निलोकमागच्छति स वायुलोकं स वरुणलोकम्' इति; उच्यते—केवलोऽत्र पाठः पौर्वापर्येणावस्थितः, नात्र क्रमवचनः कश्चिच्छब्दोऽस्ति; पदार्थोपदर्शनमात्रं ह्यत्र

क्रियते— एतं एतं च आगच्छतीति; इतरत्र पुनः, वायुप्रत्तेन रथचक्रमात्रेण च्छिद्रेण ऊर्ध्वमाक्रम्य आदित्यमागच्छतीति— अवगम्यते क्रमः; तस्मात् सूक्तम् अविशेषविशेषाभ्यामिति । वाजसनेयिनस्तु 'मासेभ्यो देवलोकं देवलोकादादित्यम्' इति समामनन्ति; तत्र आदित्यानन्तर्याय देवलोकाद्वायुमभिसंभवेयुः; 'वायुमब्दात्' इति तु च्छन्दोगश्रुत्यपेक्षयोक्तम् । छान्दोग्यवाजसनेयकयोस्तु एकत्र देवलोको न विद्यते, परत्र संवत्सरः; तत्र श्रुतिद्वयप्रत्ययात् उभावपि उभयत्र ग्रथयितव्यौ; तत्रापि माससंबन्धात्संवत्सरः पूर्वः पश्चिमो देवलोक इति विवेक्तव्यम् ॥

## तडितोऽधि वरुणः संबन्धात् ॥ ३ ॥

'आदित्याच्चन्द्रमसं चन्द्रमसो विद्युतम्' इत्यस्या विद्युत उपरिष्टात् 'स वरुणलोकम्' इत्ययं वरुणः संबध्येत; अस्ति

३. तडिदधिकरणम् ।

हि संबन्धो विद्युद्वरुणयोः; यदा हि विशाला विद्युतस्तीव्रस्तनितनिर्घोषा जीमूतोदरेषु प्रनृत्यन्ति, अथ आपः प्रपतन्ति; 'विद्योतते स्तनयति वर्षिष्यति वा' इति च ब्राह्मणम्; अपां च अधिपतिर्वरुण इति श्रुतिस्मृतिप्रसिद्धिः; वरुणादधि इन्द्रप्रजापती स्थानान्तराभावात् पाठसामर्थ्याच्च; आगन्तुकत्वादपि वरु-

णादीनामन्ते एव निवेशः, वैशेषिकस्थानाभावात्; विद्युच्च अन्त्या अर्चिरादौ वर्त्मनि ॥

## आतिवाहिकास्तल्लिङ्गात् ॥ ४ ॥

४. आतिवाहिकाधिकरणम्।

तेष्वेव अर्चिरादिषु संशयः— किमेतानि मार्गचिह्नानि, उत भोगभूमयः, अथवा नेतारो गन्तॄणामिति । तत्र मार्गलक्षणभूता अर्चिरादय इति तावत्प्राप्तम्, तत्स्वरूपत्वादुपदेशस्य; यथा हि लोके कश्चिद्ग्रामं नगरं वा प्रतिष्ठासमानोऽनुशिष्यते—गच्छ इतस्त्वममुं गिरिं ततो न्यग्रोधं ततो नदीं ततो ग्रामं ततो नगरं वा प्राप्स्यसीति— एवमिहापि ‘अर्चिषोऽहरह्न आपूर्यमाणपक्षम्’ इत्याद्याह । अथवा भोगभूमय इति प्राप्तम्; तथाहि लोकशब्देन अग्न्यादीननुबध्नाति—‘अग्निलोकमागच्छति’ इत्यादि; लोकशब्दश्च प्राणिनां भोगायतनेषु भाष्यते—‘मनुष्यलोकः पितृलोको देवलोकः’ इति च; तथा च ब्राह्मणम्—‘अहोरात्रेषु ते लोकेषु सज्जन्ते’ इत्यादि । तस्मान्नातिवाहिका अर्चिरादयः । अचेतनत्वादप्येषामातिवाहिकत्वानुपपत्तिः; चेतना हि लोके राजनियुक्ताः पुरुषा दुर्गेषु मार्गेष्वतिवाह्यान् अतिवाहयन्तीति । एवं प्राप्ते, ब्रूमः— आतिवाहिका एवैते भवितुमर्हन्ति; कुतः? तल्लिङ्गात्; तथा हि—‘चन्द्रम-

सो विद्युतं तत्पुरुषोऽमानवः स एतान्ब्रह्म गमयति' इति सिद्धवद्गमयितृत्वं दर्शयति ; तद्वचनं तद्विषयमेवोपक्षीणमिति चेत्, न, प्राप्तमानवत्वनिवृत्तिपरत्वाद्विशेषणस्य ; यद्यर्चिरादिषु पुरुषा गमयितारः प्राप्ताः ते च मानवाः, ततो युक्तं तन्निवृत्त्यर्थं पुरुषविशेषणम्— अमानव इति ॥

ननु तल्लिङ्गमात्रमगमकम्, न्यायाभावात् ; नैष दोषः—

**उभयव्यामोहात्तत्सिद्धेः ॥ ५ ॥**

ये तावदर्चिरादिमार्गगाः ते देहवियोगात् संपिण्डितकरणग्रामा इति अस्वतन्त्राः, अर्चिरादीनामप्यचेतनत्वादस्वातन्त्र्यम्—इत्यतः अर्चिराद्यभिमानिनश्चेतना देवताविशेषा अतियात्रायां नियुक्ता इति गम्यते ; लोकेऽपि हि मत्तमूर्छितादयः संपिण्डितकरणाः परप्रयुक्तवर्त्मानो भवन्ति । अनवस्थितत्वादप्यर्चिरादीनां न मार्गलक्षणत्वोपपत्तिः ; न हि रात्रौ प्रेतस्य अहःस्वरूपाभिसंभव उपपद्यते ; न च प्रतिपालनमस्तीत्युक्तं पुरस्तात् ; ध्रुवत्वात्तु देवतात्मनां नायं दोषो भवति । अर्चिरादिशब्दता च एषाम् अर्चिराद्यभिमानादुपपद्यते ; 'अर्चिषोऽहः' इत्यादिनिर्देशस्तु आतिवाहिकत्वेऽपि न विरुध्यते—अर्चिषा हेतुना अहरभिसंभवति, अह्ना

हेतुना आपूर्यमाणपक्षमिति ; तथा च लोके प्रसिद्धेष्वप्याति-वाहिकेषु एवंजातीयक उपदेशो दृश्यते--गच्छ त्वम् इतो बलवर्माणं ततो जयसिंहं ततः कृष्णगुप्तमिति । अपि च उपक्रमे 'तेऽर्चिरभिसंभवन्ति' इति संबन्धमात्रमुक्तम्, न संबन्धविशेषः कश्चित् ; उपसंहारे तु 'स एतान्ब्रह्म गमयति' इति संबन्धविशेषः अतिवाह्यातिवाहकत्वलक्षण उक्तः ; तेन स एवोपक्रमेऽपीति निर्धार्यते । संपिण्डितकरणत्वादेव च गन्तॄणां न तत्र भोगसंभवः ; लोकशब्दस्तु अनुपभुञ्जानेष्वपि गन्तृषु गमयितुं शक्यते, अन्येषां तल्लोकवासिनां भोगभूमित्वात् । अतः अग्निस्वामिकं लोकं प्राप्तः अग्निना अतिवाह्यते, वायुस्वामिकं प्राप्तो वायुना— इति योजयितव्यम् ॥

कथं पुनरातिवाहिकत्वपक्षे वरुणादिषु तत्संभवः ? विद्युतो ह्यधि वरुणादय उपक्षिप्ताः, विद्युतस्त्वनन्तरम् आ ब्रह्मप्राप्तेः अमानवस्यैव पुरुषस्य गमयितृत्वं श्रुतम्—इत्यत उत्तरं पठति—

**वैद्युतेनैव ततस्तच्छ्रुतेः ॥ ६ ॥**

ततो विद्युदभिसंभवनादूर्ध्वं विद्युदनन्तरवर्तिनैवामानवेन पुरुषेण वरुणलोकादिष्वतिवाह्यमाना ब्रह्मलोकं गच्छन्तीत्य-

वगन्तव्यम्, 'तान्वैद्युतात्पुरुषोऽमानवः स एत्य ब्रह्मलोकं गमयति' इति तस्यैव गमयितृत्वश्रुतेः। वरुणादयस्तु तस्यैव अप्रतिबन्धकरणेन साहाय्यानुष्ठानेन वा केनचित् अनुग्राहका इत्यवगन्तव्यम्। तस्मात्साधूक्तम्— आतिवाहिका देवतात्मानोऽर्चिरादय इति॥

## कार्यं बादरिरस्य गत्युपपत्तेः॥ ७॥

'स एनान्ब्रह्म गमयति' इत्यत्र विचिकित्स्यते— किं कार्यमपरं ब्रह्म गमयति, आहोस्वित्परमेवाविकृतं मुख्यं ब्रह्मेति। कुतः संशयः? ब्रह्मशब्दप्रयोगात्, गतिश्रुतेश्च। तत्र कार्यमेव सगुणमपरं ब्रह्म एनान्गमयत्यमानवः पुरुष इति बादरिराचार्यो मन्यते; कुतः? अस्य गत्युपपत्तेः— अस्य हि कार्यब्रह्मणो गन्तव्यत्वमुपपद्यते, प्रदेशवत्त्वात्; न तु परस्मिन्ब्रह्मणि गन्तृत्वं गन्तव्यत्वं गतिर्वा अवकल्पते, सर्वगतत्वात्प्रत्यगात्मत्वाच्च गन्तॄणाम्॥

५. कार्याधिकरणम्।

## विशेषितत्वाच्च॥ ८॥

'ब्रह्मलोकान्गमयति ते तेषु ब्रह्मलोकेषु पराः परावतो वसन्ति' इति च श्रुत्यन्तरे विशेषितत्वात् कार्यब्रह्मविषयैव

गतिरिति गम्यते; न हि बहुवचनेन विशेषणं परस्मिन्ब्रह्मण्यवकल्पते; कार्ये तु अवस्थाभेदोपपत्तेः संभवति बहुवचनम्। लोकश्रुतिरपि विकारगोचरायामेव संनिवेशविशिष्टायां भोगभूमावाञ्जसी; गौणी त्वन्यत्र 'ब्रह्मैव लोक एष सम्राट्' इत्यादिषु। अधिकरणाधिकर्तव्यनिर्देशोऽपि परस्मिन्ब्रह्मणि अनाञ्जसः स्यात्। तस्मात् कार्यविषयमेवेदं नयनम्॥

ननु कार्यविषयेऽपि ब्रह्मशब्दो नोपपद्यते, समन्वये हि समस्तस्य जगतो जन्मादिकारणं ब्रह्मेति स्थापितम्— इत्यत्रोच्यते—

## सामीप्यात्तु तद्व्यपदेशः॥ ९॥

तु-शब्द आशङ्काव्यावृत्त्यर्थः; परब्रह्मसामीप्यात् अपरस्य ब्रह्मणः, तस्मिन्नपि ब्रह्मशब्दप्रयोगो न विरुध्यते। परमेव हि ब्रह्म विशुद्धोपाधिसंबन्धं क्वचित्कैश्चिद्विकारधर्मैर्मनोमयत्वादिभिः उपासनाय उपदिश्यमानम् अपरमिति स्थितिः॥

ननु कार्यप्राप्तौ अनावृत्तिश्रवणं न घटते; न हि परस्माद्ब्रह्मणोऽन्यत्र क्वचिन्नित्यतां संभावयन्ति; दर्शयति च देवयानेन पथा प्रस्थितानामनावृत्तिम्—'एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते' इति, तेषामिह न पुनरावृत्तिर-

स्ति—'तयोर्ध्वमायन्नमृतत्वमेति' इति च; अत्र ब्रूमः—

**कार्यात्यये तदध्यक्षेण सहातः पर-
मभिधानात् ॥ १० ॥**

कार्यब्रह्मलोकप्रलयप्रत्युपस्थाने सति तत्रैव उत्पन्नसम्यग्दर्शनाः सन्तः, तदध्यक्षेण हिरण्यगर्भेण सह अतः परं परिशुद्धं विष्णोः परमं पदं प्रतिपद्यन्ते—इतीत्थं क्रममुक्तिः अनावृत्त्यादिश्रुत्यभिधानेभ्योऽभ्युपगन्तव्या। न ह्यञ्जसैव गतिपूर्विका परप्राप्तिः संभवतीत्युपपादितम ॥

**स्मृतेश्च ॥ ११ ॥**

स्मृतिरप्येतमर्थमनुजानाति— 'ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे। परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम्' इति। तस्मात्कार्यब्रह्मविषया एव गतिश्रुतयः इति सिद्धान्तः ॥

कं पुनः पूर्वपक्षमाशङ्क्य अयं सिद्धान्तः प्रतिष्ठापितः 'कार्यं बादरिः' इत्यादिनेति, स इदानीं सूत्रैरेवोपदर्श्यते—

**परं जैमिनिर्मुख्यत्वात् ॥ १२ ॥**

जैमिनिस्त्वाचार्यः 'स एनान्ब्रह्म गमयति' इत्यत्र परमे-

च ब्रह्म प्रापयतीति मन्यते ; कुतः ? मुख्यत्वात् । परं हि ब्रह्म ब्रह्मशब्दस्य मुख्यमालम्बनम्, गौणमपरम् ; मुख्यगौणयोश्च मुख्ये संप्रत्ययो भवति ॥

## दर्शनाच्च ॥ १३ ॥

'तयोर्ध्वमायन्नमृतत्वमेति' इति च गतिपूर्वकममृतत्वं दर्शयति ; अमृतत्वं च परस्मिन्ब्रह्मण्युपपद्यते, न कार्ये, विनाशित्वात्कार्यस्य—'अथ यत्रान्यत्पश्यति तदल्पं तन्मर्त्यम्' इति प्रवचनात् परविषयैव च एषा गतिः कठवल्लीषु पठ्यते ; न हि तत्र विद्यान्तरप्रक्रमोऽस्ति—'अन्यत्र धर्मादन्यत्राधर्मात्' इति परस्यैव ब्रह्मणः प्रक्रान्तत्वात् ॥

## न च कार्ये प्रतिपत्त्यभिसंधिः ॥ १४ ॥

अपि च 'प्रजापतेः सभां वेश्म प्रपद्ये' इति नायं कार्यविषयः प्रतिपत्त्यभिसंधिः, 'नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म' इति कार्यविलक्षणस्य परस्यैव ब्रह्मणः प्रकृतत्वात् ; 'यशोऽहं भवामि ब्राह्मणानाम्' इति च सर्वात्मत्वेनोपक्रमणात् ; 'न तस्य प्रतिमा अस्ति यस्य नाम महद्यशः' इति च परस्यैव ब्रह्मणो यशोनामत्वप्रसिद्धेः । सा चेयं वेश्मप्रतिपत्तिर्गतिपूर्विका हार्दविद्यायामुदिता— 'तदपराजिता पू-

ब्रह्मणः प्रभुविमितं हिरण्मयम्' इत्यत्र । पदेरपि च गत्यर्थत्वात् मार्गापेक्षता अवसीयते । तस्मात्परब्रह्मविषया गतिश्रुतय इति पक्षान्तरम् । तावेतौ द्वौ पक्षावाचार्येण सूत्रितौ— गत्युपपत्त्यादिभिरेकः, मुख्यत्वादिभिरपरः । तत्र गत्युपपत्त्यादयः प्रभवन्ति मुख्यत्वादीनाभासयितुम् , न तु मुख्यत्वादयो गत्युपपत्त्यादीन्—इति आद्य एव सिद्धान्तो व्याख्यातः, द्वितीयस्तु पूर्वपक्षः । न ह्यसत्यपि संभवे मुख्यस्यैवार्थस्य ग्रहणमिति कश्चिदाज्ञापयिता विद्यते । परविद्याप्रकरणेऽपि च तत्स्तुत्यर्थं विद्यान्तराश्रयगत्यनुकीर्तनमुपपद्यते— 'विष्वङ्ङन्या उत्क्रमणे भवन्ति' इतिवत् । 'प्रजापतेः सभां वेश्म प्रपद्ये' इति तु पूर्ववाक्यविच्छेदेन कार्येऽपि प्रतिपत्त्यभिसंधिर्न विरुध्यते । सगुणेऽपि च ब्रह्मणि सर्वात्मत्वसंकीर्तनम् 'सर्वकर्मा सर्वकामः' इत्यादिवत् अवकल्पते । तस्मादपरविषया एव गतिश्रुतयः ॥

केचित्पुनः पूर्वाणि पूर्वपक्षसूत्राणि भवन्ति उत्तराणि सिद्धान्तसूत्राणि— इत्येतां व्यवस्थामनुरुध्यमानाः परविषया एव गतिश्रुतीः प्रतिष्ठापयन्ति ; तत् अनुपपन्नम् , गन्तव्यत्वानुपपत्तेर्ब्रह्मणः ; यत्सर्वगतं सर्वान्तरं सर्वात्मकं च परं ब्रह्म 'आकाशवत्सर्वगतश्च नित्यः' 'यत्साक्षादपरोक्षाद्ब्रह्म'

'य आत्मा सर्वान्तरः' 'आत्मैवेदं सर्वम्' 'ब्रह्मैवेदं विश्वमिदं वरिष्ठम्' इत्यादिश्रुतिनिर्धारितविशेषम्——तस्य गन्तव्यता न कदाचिदप्युपपद्यते ; न हि गतमेव गम्यते ; अन्यो ह्यन्यद्गच्छतीति प्रसिद्धं लोके । ननु लोके गतस्यापि गन्तव्यता देशान्तरविशिष्टस्य दृष्टा--यथा पृथिवीस्थ एव पृथिवीं देशान्तरद्वारेण गच्छति, तथा अनन्यत्वेऽपि बालस्य कालान्तरविशिष्टं वार्धकं स्वात्मभूतमेव गन्तव्यं दृष्टम्, तद्वत् ब्रह्मणोऽपि सर्वशक्त्युपेतत्वात् कथंचित् गन्तव्यता स्यादिति——न, प्रतिषिद्धसर्वविशेषत्वाद्ब्रह्मणः ; 'निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्' 'अस्थूलमनण्वह्रस्वमदीर्घम्' 'स बाह्याभ्यन्तरो ह्यजः' 'स वा एष महानज आत्माजरोऽमरोऽमृतोऽभयो ब्रह्म' 'स एष नेति नेत्यात्मा' इत्यादिश्रुतिस्मृतिन्यायेभ्यो न देशकालादिविशेषयोगः परमात्मनि कल्पयितुं शक्यते, येन भूप्रदेशवयोवस्थान्यायेनास्य गन्तव्यता स्यात् ; भूवयसोस्तु प्रदेशावस्थादिविशेषयोगादुपपद्यते देशकालविशिष्टा गन्तव्यता । जगदुत्पत्तिस्थितिप्रलयहेतुत्वश्रुतेरनेकशक्तित्वं ब्रह्मण इति चेत्, न, विशेषनिराकरणश्रुतीनामनन्यार्थत्वात् । उत्पत्त्यादिश्रुतीनामपि समानमनन्यार्थत्वमिति चेत्, न, तासामेकत्वप्रतिपादनपरत्वात् ;

मृदादिदृष्टान्तैर्हि सतो ब्रह्मण एकस्य सत्यत्वं विकारस्य च अनृतत्वं प्रतिपादयत् शास्त्रं नोत्पत्त्यादिपरं भवितुमर्हति ॥

कस्मात्पुनरुत्पत्त्यादिश्रुतीनां विशेषनिराकरणश्रुतिशेषत्वम्, न पुनरितरशेषत्वमितरासामिति, उच्यते— विशेषनिराकरणश्रुतीनां निराकाङ्क्षार्थत्वात्; न हि आत्मन एकत्वनित्यत्वशुद्धत्वाद्यवगतौ सत्यां भूयः काचिदाकाङ्क्षा उपजायते, पुरुषार्थसमाप्तिबुद्ध्युत्पत्तेः, 'तत्र को मोहः कः शोक एकत्वमनुपश्यतः' 'अभयं वै जनक प्राप्तोऽसि' 'विद्वान्न बिभेति कुतश्चन । एतꣳ ह वाव न तपति । किमहꣳ साधु नाकरवम् । किमहं पापमकरवम्' इत्यादिश्रुतिभ्यः, तथैव च विदुषां तुष्ट्यनुभवादिदर्शनात्, विकारानृताभिसंध्यपवादाच्च— 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' इति; अतो न विशेषनिराकरणश्रुतीनामन्यशेषत्वमवगन्तुं शक्यम् । नैवमुत्पत्त्यादिश्रुतीनां निराकाङ्क्षार्थप्रतिपादनसामर्थ्यमस्ति; प्रत्यक्षं तु तासामन्यार्थत्वं समनुगम्यते; तथा हि— 'तत्रैतच्छुङ्गमुत्पतितं सोम्य विजानीहि नेदममूलं भविष्यति' इत्युपन्यस्य उदर्के सत एवैकस्य जगन्मूलस्य विज्ञेयत्वं दर्शयति; 'यतो वा इमानि

भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति । तद्विजिज्ञासस्व । तद्ब्रह्म' इति च; एवमुत्पत्त्यादिश्रुतीनाम् ऐकात्म्यावगमपरत्वात् नानेकशक्तियोगो ब्रह्मणः; अतश्च गन्तव्यत्वानुपपत्तिः । 'न तस्य प्राणा उत्क्रामन्ति' 'ब्रह्मैव सन्ब्रह्माप्येति' इति च परस्मिन्ब्रह्मणि गतिं निवारयति; तद्व्याख्यातम् 'स्पष्टो ह्येकेषाम्' इत्यत्र ॥

गतिकल्पनायां च गन्ता जीवो गन्तव्यस्य ब्रह्मणः अवयवः विकारः अन्यो वा ततः स्यात्, अत्यन्ततादात्म्ये गमनानुपपत्तेः । यद्येवम्, ततः किं स्यात्? अत उच्यते—यद्येकदेशः, तेन एकदेशिनो नित्यप्राप्तत्वात् न पुनर्ब्रह्मगमनमुपपद्यते; एकदेशैकदेशित्वकल्पना च ब्रह्मण्यनुपपन्ना, निरवयवत्वप्रसिद्धेः । विकारपक्षेऽप्येतत्तुल्यम्, विकारेणापि विकारिणो नित्यप्राप्तत्वात्; न हि घटो मृदात्मतां परित्यज्य अवतिष्ठते, परित्यागे वा अभावप्राप्तेः । विकारावयवपक्षयोश्च तद्वतः स्थिरत्वात् ब्रह्मणः संसारगमनमपि अनवक्लृप्तम् । अथ अन्य एव जीवो ब्रह्मणः, सोऽणुः व्यापी मध्यमपरिमाणो वा भवितुमर्हति; व्यापित्वे गमनानुपपत्तिः; मध्यमपरिमाणत्वे च अनित्यत्वप्रसङ्गः; अणुत्वे कृत्स्नशरीरवेदनानुपपत्तिः; प्रतिषिद्धे च अणुत्वमध्यमपरिमाणत्वे विस्तरेण

पुरस्तात् । परस्माच्च अन्यत्वे जीवस्य 'तत्त्वमसि' इत्यादिशास्त्रबाधप्रसङ्गः । विकारावयवपक्षयोरपि समानोऽयं दोषः । विकारावयवयोस्तद्वतोऽनन्यत्वात् अदोष इति चेत्, न, मुख्यैकत्वानुपपत्तेः । सर्वेषु च एतेषु पक्षेषु अनिर्मोक्षप्रसङ्गः, संसार्यात्मत्वानिवृत्तेः; निवृत्तौ वा स्वरूपनाशप्रसङ्गः, ब्रह्मात्मत्वानभ्युपगमाच्च ॥

यत्तु कैश्चिज्जल्प्यते—नित्यानि नैमित्तिकानि च कर्माण्यनुष्ठीयन्ते प्रत्यवायानुत्पत्तये, काम्यानि प्रतिषिद्धानि च परिह्रियन्ते स्वर्गनरकानवाप्तये, सांप्रतदेहोपभोग्यानि च कर्माण्युपभोगेनैव क्षिप्यन्ते—इत्यतो वर्तमानदेहपातादूर्ध्वं देहान्तरप्रतिसंधानकारणाभावात् स्वरूपावस्थानलक्षणं कैवल्यं विनापि ब्रह्मात्मतया एवंवृत्तस्य सेत्स्यतीति—तदसत्, प्रमाणाभावात् । न ह्येतत् शास्त्रेण केनचित्प्रतिपादितम्—मोक्षार्थी इत्थं समाचरेदिति । स्वमनीषया तु एतत्तर्कितम्—यस्मात्कर्मनिमित्तः संसारः तस्मान्निमित्ताभावान्न भविष्यतीति । न च एतत् तर्कयितुं शक्यते, निमित्ताभावस्य दुर्ज्ञानत्वात् । बहूनि हि कर्माणि जात्यन्तरसंचितानि इष्टानिष्टविपाकानि एकैकस्य जन्तोः संभाव्यन्ते । तेषां विरुद्धफलानां युगपदुपभोगासंभवात् कानिचिल्लब्धावसराणि इदं जन्म

निर्मिमते, कानिचित्तु देशकालनिमित्तप्रतीक्षाण्यासते—इत्यतः तेषामवशिष्टानां सांप्रतेनोपभोगेन क्षपणासंभवात् न यथावर्णितचरितस्यापि वर्तमानदेहपाते देहान्तरनिमित्ताभावः शक्यते निश्चेतुम्। कर्मशेषसद्भावसिद्धिश्च 'तद्य इह रमणीयचरणाः' 'ततः शेषेण' इत्यादिश्रुतिस्मृतिभ्यः। स्यादेतत् —नित्यनैमित्तिकानि तेषां क्षेपकाणि भविष्यन्तीति—तन्न, विरोधाभावात्; सति हि विरोधे क्षेप्यक्षेपकभावो भवति; न च जन्मान्तरसंचितानां सुकृतानां नित्यनैमित्तिकैरस्ति विरोधः, शुद्धिरूपत्वाविशेषात्; दुरितानां तु अशुद्धिरूपत्वात् सति विरोधे भवतु क्षपणम्; न तु तावता देहान्तरनिमित्ताभावसिद्धिः, सुकृतनिमित्तत्वोपपत्तेः, दुरितस्याप्यशेषक्षपणानवगमात्। न च नित्यनैमित्तिकानुष्ठानात् प्रत्यवायानुत्पत्तिमात्रम्, न पुनः फलान्तरोत्पत्तिः इति प्रमाणमस्ति, फलान्तरस्याप्यनुनिष्पादिनः संभवात्; स्मरति हि आपस्तम्बः—'तद्यथा आम्रे फलार्थे निमित्ते छायागन्धावनूत्पद्येते एवं धर्मं चर्यमाणम् अर्था अनूत्पद्यन्ते' इति। न च असति सम्यग्दर्शने सर्वात्मना काम्यप्रतिषिद्धवर्जनं जन्मप्रायणान्तराले केनचित्प्रतिज्ञातुं शक्यम्, सुनिपुणानामपि सूक्ष्मापराधदर्शनात्; संशयितव्यं तु भवति;

तथापि निमित्ताभावस्य दुर्ज्ञानत्वमेव । न च अनभ्युपगम्यमाने ज्ञानगम्ये ब्रह्मात्मत्वे कर्तृत्वभोक्तृत्वस्वभावस्य आत्मनः कैवल्यमाकाङ्क्षितुं शक्यम्, अग्न्यौष्ण्यवत् स्वभावस्यापरिहार्यत्वात् । स्यादेतत्—कर्तृत्वभोक्तृत्वकार्यम् अनर्थः, न तच्छक्तिः, तेन शक्त्यवस्थानेऽपि कार्यपरिहारादुपपन्नो मोक्ष इति—तच्च न । शक्तिसद्भावे कार्यप्रसवस्य दुर्निवारत्वात् । अथापि स्यात्—न केवला शक्तिः कार्यमारभते अनपेक्ष्य अन्यानि निमित्तानि; अत एकाकिनी सा स्थितापि नापराध्यतीति—तच्च न, निमित्तानामपि शक्तिलक्षणेन संबन्धेन नित्यसंबद्धत्वात् । तस्मात् कर्तृत्वभोक्तृत्वस्वभावे सति आत्मनि, असत्यां विद्यागम्यायां ब्रह्मात्मतायाम्, न कथंचन मोक्षं प्रति आशा अस्ति । श्रुतिश्च— 'नान्यः पन्था विद्यतेऽयनाय' इति ज्ञानादन्यं मोक्षमार्गं वारयति ॥

परस्मादनन्यत्वेऽपि जीवस्य सर्वव्यवहारलोपप्रसङ्गः, प्रत्यक्षादिप्रमाणाप्रवृत्तेरिति चेत्— न, प्राक्प्रबोधात् स्वप्नव्यवहारवत् तदुपपत्तेः; शास्त्रं च 'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति' इत्यादिना अप्रबुद्धविषये प्रत्यक्षादिव्यवहारमुक्त्वा, पुनः प्रबुद्धविषये— 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्' इत्यादिना तदभावं

दर्शयति । तदेवं परब्रह्मविदो गन्तव्यादिविज्ञानस्य बाधितत्वात् न कथंचन गतिरुपपादयितुं शक्या । किंविषयाः पुनर्गतिश्रुतय इति, उच्यते—सगुणविद्याविषया भविष्यन्ति । तथा हि—कचित्पञ्चाग्निविद्यां प्रकृत्य गतिरुच्यते, कचित्पर्यङ्कविद्याम्, कचिद्वैश्वानरविद्याम्; यत्रापि ब्रह्म प्रकृत्य गतिरुच्यते—'यथा प्राणो ब्रह्म कं ब्रह्म खं ब्रह्म' इति 'अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म' इति च, तत्रापि वामनीत्वादिभिः सत्यकामादिभिश्च गुणैः सगुणस्यैव उपास्यत्वात् संभवति गतिः । न कचित्परब्रह्मविषया गतिः श्राव्यते, यथा गतिप्रतिषेधः श्रावितः—'न तस्य प्राणा उत्क्रामन्ति' इति । 'ब्रह्मविदाप्नोति परम्' इत्यादिषु तु, सत्यपि आप्नोतेर्गत्यर्थत्वे, वर्णितेन न्यायेन देशान्तरप्राप्त्यसंभवात् स्वरूपप्रतिपत्तिरेवेयम् अविद्याध्यारोपितनामरूपप्रविलयापेक्षया अभिधीयते—'ब्रह्मैव सन्ब्रह्माप्येति' इत्यादिवत् इति द्रष्टव्यम । अपि च परविषया गतिर्व्याख्यायमाना प्ररोचनाय वा स्यात्, अनुचिन्तनाय वा; तत्र प्ररोचनं तावत् ब्रह्मविदो न गत्युक्त्या क्रियते, स्वसंवेद्येनैव अव्यवहितेन विद्यासमर्पितेन स्वास्थ्येन तत्सिद्धेः; न च नित्यसिद्धनिःश्रेयसनिवेदनस्य असाध्यफलस्य विज्ञा-

नस्य गत्यनुचिन्तने काचिदपेक्षा उपपद्यते; तस्मादपरविषया गतिः । तत्र परापरब्रह्मविवेकानवधारणेन अपरस्मिन्ब्रह्मणि वर्तमाना गतिश्रुतयः परस्मिन्नध्यारोप्यन्ते । किं द्वे ब्रह्मणी—परमपरं चेति? बाढम्— 'एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोंकारः' इत्यादिदर्शनात् । किं पुनः परं ब्रह्म किमपरमिति, उच्यते— यत्र अविद्याकृतनामरूपादिविशेषप्रतिषेधात् अस्थूलादिशब्दैर्ब्रह्मोपदिश्यते, तत्परम्; तदेव यत्र नामरूपादिविशेषेण केनचिद्विशिष्टम् उपासनायोपदिश्यते—'मनोमयः प्राणशरीरो भारूपः' इत्यादिशब्दैः, तदपरम् । ननु एवमद्वितीयश्रुतिरुपरुध्येत— न, अविद्याकृतनामरूपोपाधिकतया परिहृतत्वात् । तस्य च अपरब्रह्मोपासनस्य तत्संनिधौ श्रूयमाणम् 'स यदि पितृलोककामो भवति' इत्यादि जगदैश्वर्यलक्षणं संसारगोचरमेव फलं भवति, अनिवर्तितत्वादविद्यायाः; तस्य च देशविशेषावबद्धत्वात् तत्प्राप्त्यर्थं गमनमविरुद्धम् । सर्वगतत्वेऽपि च आत्मनः, आकाशस्येव घटादिगमने, बुद्ध्याद्युपाधिगमने गमनप्रसिद्धिः इत्यवादिष्म 'तद्गुणसारत्वात्' इत्यत्र । तस्मात् 'कार्यं बादरिः' इत्येष एव स्थितः पक्षः; 'परं जैमिनिः' इति तु पक्षान्तरप्रतिभानमात्रप्रदर्शनं प्रज्ञाविकासनायेति द्रष्टव्यम् ॥

## अप्रतीकालम्बनान्नयतीति बादरायण उभयथादोषात्तत्क्रतुश्च ॥ १५ ॥

स्थितमेतत्— कार्यविषया गतिः, न परविषयेति। इदमिदानीं संदिह्यते— किं सर्वान्विकारालम्बनान् अविशेषेणैव अमानवः पुरुषः प्रापयति ब्रह्मलोकम्, उत कांश्चिदेवेति। किं तावत्प्राप्तम्? सर्वेषामेव एषां विदुषाम् अन्यत्र परस्माद्ब्रह्मणः गतिः स्यात्; तथा हि 'अनियमः सर्वासाम्' इत्यत्र अविशेषेणैव एषा विद्यान्तरेष्ववतारितेति। एवं प्राप्ते, प्रत्याह—अप्रतीकालम्बनानिति; प्रतीकालम्बनान्वर्जयित्वा सर्वानन्यान्विकारालम्बनान् नयति ब्रह्मलोकम्— इति बादरायण आचार्यो मन्यते; न हि एवम् उभयथाभावाभ्युपगमे कश्चिद्दोषोऽस्ति, अनियमन्यायस्य प्रतीकव्यतिरिक्तेष्वप्युपासनेषूपपत्तेः। तत्क्रतुश्च अस्य उभयथाभावस्य समर्थको हेतुर्द्रष्टव्यः; यो हि ब्रह्मक्रतुः, स ब्राह्ममैश्वर्यमासीदेत्—इति श्लिष्यते, 'तं यथा यथोपासते तदेव भवति' इति श्रुतेः, न तु प्रतीकेषु ब्रह्मक्रतुत्वमस्ति, प्रतीकप्रधानत्वादुपासनस्य। ननु, अब्रह्मक्रतुरपि ब्रह्म गच्छतीति श्रूयते; यथा पञ्चाग्निविद्यायाम्— 'स एनान्ब्रह्म गमयति' इति— भवतु,

६. अप्रतीकालम्बनाधिकरणम्।

यत्र एवम् आहृत्यवाद उपलभ्यते; तदभावे तु औत्सर्गिकेण तत्क्रतुन्यायेन ब्रह्मक्रतूनामेव तत्प्राप्तिः, न इतरेषाम्— इति गम्यते ॥

## विशेषं च दर्शयति ॥ १६ ॥

नामादिषु प्रतीकोपासनेषु पूर्वस्मात्पूर्वस्मात् फलविशेषम् उत्तरस्मिन्नुत्तरस्मिन् उपासने दर्शयति— 'यावन्नाम्नो गतं तत्रास्य यथाकामचारो भवति' 'वाग्वाव नाम्नो भूयसी' 'यावद्वाचो गतं तत्रास्य यथाकामचारो भवति' 'मनो वाव वाचो भूयः' इत्यादिना । स च अयं फलविशेषः प्रतीकतन्त्रत्वादुपासनानाम् उपपद्यते। ब्रह्मतन्त्रत्वे तु ब्रह्मणोऽविशिष्टत्वात् कथं फलविशेषः स्यात् । तस्मात् न प्रतीकालम्बनानाम् इतरैस्तुल्यफलत्वमिति ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छंकरभगवतः कृतौ

शारीरकमीमांसासूत्रभाष्ये

चतुर्थाध्यायस्य तृतीयः पादः ॥

श्रीमच्छंकरभगवत्पादैर्विरचितम्

# ब्रह्मसूत्रभाष्यम्

## चतुर्थाध्याये
## चतुर्थः पादः

## चतुर्थः पादः ॥

---

'एवमेवैष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते' इति श्रूयते। तत्र संशयः—किं देवलोकाद्युपभोगस्थानेष्विव आगन्तुकेन केनचिद्विशेषेण अभिनिष्पद्यते, आहोस्वित् आत्ममात्रेणेति। किं तावत्प्राप्तम्? स्थानान्तरेष्विव आगन्तुकेन केनचिद्रूपेण अभिनिष्पत्तिः स्यात्, मोक्षस्यापि फलत्वप्रसिद्धेः, अभिनिष्पद्यत इति च उत्पत्तिपर्यायत्वात्; स्वरूपमात्रेण चेदभिनिष्पत्तिः, पूर्वावस्थासु स्वरूपानपायात् विभाव्येत; तस्मात् विशेषेण केनचिदभिनिष्पद्यत इति। एवं प्राप्ते, ब्रूमः—

**संपद्याविर्भावः स्वेन शब्दात् ॥ १ ॥**

केवलेनैव आत्मना आविर्भवति, न धर्मान्तरेणेति;

कुतः? 'स्वेन रूपेणाभिनिष्पद्यते' इति स्वशब्दात्; अन्यथा हि स्वशब्देन विशेषणमनवक्लृप्तं स्यात्। ननु, आत्मीयाभिप्रायः स्वशब्दो भविष्यति— न, तस्यावचनीयत्वात्; येनैव हि केनचिद्रूपेणाभिनिष्पद्यते, तस्यैव आत्मीयत्वोपपत्तेः, स्वेनेति विशेषणमनर्थकं स्यात्; आत्मवचनतायां तु अर्थवत्— केवलेनैव आत्मरूपेणाभिनिष्पद्यते, न आगन्तुकेनापररूपेणापीति ॥

१. संपद्याविर्भावाधिकरणम्।

कः पुनर्विशेषः पूर्वावस्थासु, इह च स्वरूपानपायसाम्ये सतीत्यत आह—

## मुक्तः प्रतिज्ञानात् ॥ २ ॥

योऽत्र अभिनिष्पद्यत इत्युक्तः, स सर्वबन्धविनिर्मुक्तः शुद्धेनैव आत्मना अवतिष्ठते; पूर्वत्र तु—अन्धो भवत्यपि रोदितीव विनाशमेवापीतो भवति—इति च अवस्थात्रयकलुषितेन आत्मना—इत्ययं विशेषः। कथं पुनरवगम्यते—मुक्तोऽयमिदानीं भवतीति? प्रतिज्ञानादित्याह। तथा हि— 'एतं त्वेव ते भूयोऽनुव्याख्यास्यामि' इति अवस्थात्रयदोषविहीनम् आत्मानम् व्याख्येयत्वेन प्रतिज्ञाय, 'अशरीरं वाव

सन्तं न प्रियाप्रिये स्पृशतः' इति च उपन्यस्य, 'स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुषः' इति च उपसंहरति; तथा आख्यायिकोपक्रमेऽपि 'य आत्मापहतपाप्मा' इत्यादि मुक्तात्मविषयमेव प्रतिज्ञानम् । फलत्वप्रसिद्धिरपि मोक्षस्य बन्धनिवृत्तिमात्रापेक्षा, न अपूर्वोपजनापेक्षा । यदपि अभिनिष्पद्यत इत्युत्पत्तिपर्यायत्वम्, तदपि न अपूर्वावस्थापेक्षम्— यथा रोगनिवृत्तौ अरोगोऽभिनिष्पद्यत इति, तद्वत् । तस्माददोषः ॥

## आत्मा प्रकरणात् ॥ ३ ॥

कथं पुनर्मुक्त इत्युच्यते, यावता 'परं ज्योतिरुपसंपद्य' इति कार्यगोचरमेव एनं श्रावयति, ज्योतिःशब्दस्य भौतिके ज्योतिषि रूढत्वात्? न च अनतिवृत्तो विकारविषयात् कश्चिन्मुक्तो भवितुमर्हति, विकारस्य आर्तत्वप्रसिद्धेरिति—नैष दोषः, यतः आत्मैवात्र ज्योतिःशब्देन आवेद्यते, प्रकरणात्; 'य आत्मापहतपाप्मा विजरो विमृत्युः' इति प्रकृते परस्मिन्नात्मनि न अकस्माद्भौतिकं ज्योतिः शक्यं ग्रहीतुम्, प्रकृतहानाप्रकृतप्रक्रियाप्रसङ्गात्; ज्योतिःशब्दस्तु आत्मन्यपि दृश्यते— 'तद्देवा ज्योतिषां ज्योतिः' इति । प्रपञ्चितं च एतत् 'ज्योतिर्दर्शनात्' इत्यत्र ॥

## अविभागेन दृष्टत्वात् ॥ ४ ॥

२. अविभागाधिकरणम् ।

परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते यः, स किं परस्मादात्मनः पृथगेव भवति, उत अविभागेनैवावतिष्ठत इति वीक्षायाम्, 'स तत्र पर्येति' इत्यधिकरणाधिकर्तव्यनिर्देशात् 'ज्योतिरुपसंपद्य' इति च कर्तृकर्मनिर्देशात् भेदेनैवावस्थानमिति यस्य मतिः, तं व्युत्पादयति—अविभक्त एव परेण आत्मना मुक्तोऽवतिष्ठते; कुतः? दृष्टत्वात्; तथा हि— 'तत्त्वमसि' 'अहं ब्रह्मास्मि' 'यत्र नान्यत्पश्यति' 'न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येत्' इत्येवमादीनि वाक्यान्यविभागेनैव परमात्मानं दर्शयन्ति; यथादर्शनमेव च फलं युक्तम्, तत्क्रतुन्यायात्; 'यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति । एवं मुनेर्विजानत आत्मा भवति गौतम' इति च एवमादीनि मुक्तस्वरूपनिरूपणपराणि वाक्यान्यविभागमेव दर्शयन्ति; नदीसमुद्रादिनिदर्शनानि च । भेदनिर्देशस्तु अभेदेऽप्युपचर्यते 'स भगवः कस्मिन्प्रतिष्ठित इति स्वे महिम्नि' इति, 'आत्मरतिरात्मक्रीडः' इति च एवमादिदर्शनात् ॥

## ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ॥ ५ ॥

३. ब्राह्माधिकरणम्।

स्थितमेतत् 'स्वेन रूपेण' इत्यत्र—आत्ममात्ररूपेणाभिनिष्पद्यते, न आगन्तुकेनापररूपेणेति। अधुना तु तद्विशेषबुभुत्सायामभिधीयते— स्वम् अस्य रूपं ब्राह्मम् अपहतपाप्मत्वादिसत्यसंकल्पत्वावसानं तथा सर्वज्ञत्वं सर्वेश्वरत्वं च, तेन स्वरूपेणाभिनिष्पद्यत इति जैमिनिराचार्यो मन्यते; कुतः? उपन्यासादिभ्यस्तथात्वावगमात्; तथा हि 'य आत्मापहतपाप्मा' इत्यादिना 'सत्यकामः सत्यसंकल्पः' इत्येवमन्तेन उपन्यासेन एवमात्मकतामात्मनो बोधयति; तथा 'स तत्र पर्येति जक्षत्क्रीडन्रममाणः' इति ऐश्वर्यरूपमावेदयति, 'तस्य सर्वेषु लोकेषु कामचारो भवति' इति च; 'सर्वज्ञः सर्वेश्वरः' इत्यादिव्यपदेशाश्च एवमुपपन्ना भविष्यन्तीति॥

## चितितन्मात्रेण तदात्मकत्वादित्यौडुलोमिः॥ ६॥

यद्यपि अपहतपाप्मत्वादयो भेदेनैव धर्मा निर्दिश्यन्ते, तथापि शब्दविकल्पजा एव एते; पाप्मादिनिवृत्तिमात्रं हि तत्र गम्यते; चैतन्यमेव तु अस्य आत्मनः स्वरूपमिति तन्मात्रेण स्वरूपेण अभिनिष्पत्तिर्युक्ता; तथा च श्रुतिः 'एवं वा अरेऽयमात्मानन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव' इत्ये-

वंजातीयका अनुगृहीता भविष्यति; सत्यकामत्वादयस्तु यद्यपि वस्तुस्वरूपेणैव धर्मा उच्यन्ते—सत्याः कामा अस्येति, तथापि उपाधिसंबन्धाधीनत्वात्तेषां न चैतन्यवत् स्वरूपत्वसंभवः, अनेकाकारत्वप्रतिषेधात्; प्रतिषिद्धं हि ब्रह्मणोऽनेकाकारत्वम् 'न स्थानतोऽपि परस्योभयलिङ्गम्' इत्यत्र। अत एव च जक्षणादिसंकीर्तनमपि दुःखाभावमात्राभिप्रायं स्तुत्यर्थम् 'आत्मरतिः' इत्यादिवत्। न हि मुख्यान्येव रतिक्रीडामिथुनानि आत्मनिमित्तानि शक्यन्ते वर्णयितुम्, द्वितीयविषयत्वात्तेषाम्। तस्मान्निरस्ताशेषप्रपञ्चेन प्रसन्नेन अव्यपदेश्येन बोधात्मना अभिनिष्पद्यत इत्यौडुलोमिराचार्यो मन्यते ॥

## एवमप्युपन्यासात्पूर्वभावादविरोधं बादरायणः ॥ ७ ॥

एवमपि पारमार्थिकचैतन्यमात्रस्वरूपाभ्युपगमेऽपि व्यवहारापेक्षया पूर्वस्यापि उपन्यासादिभ्योऽवगतस्य ब्राह्मस्य ऐश्वर्यरूपस्य अप्रत्याख्यानादविरोधं बादरायण आचार्यो मन्यते ॥

## संकल्पादेव तु तच्छ्रुतेः ॥ ८ ॥

हार्दविद्यायां श्रूयते— 'स यदि पितृलोककामो भवति

संकल्पादेवास्य पितरः समुत्तिष्ठन्ति' इत्यादि । तत्र संशयः

४. संकल्पाधिकरणम् । — किं संकल्प एव केवलः पित्रादिसमुत्थाने हेतुः, उत निमित्तान्तरसहित इति । तत्र सत्यपि 'संकल्पादेव' इति श्रवणे लोकवत् निमित्तान्तरापेक्षता युक्ता; यथा लोके अस्मदादीनां संकल्पात् गमनादिभ्यश्च हेतुभ्यः पित्रादिसंपत्तिर्भवति एवं मुक्तस्यापि स्यात्; एवं दृष्टविपरीतं न कल्पितं भविष्यति; 'संकल्पादेव' इति तु राज्ञ इव संकल्पितार्थसिद्धिकरीं साधनान्तरसामग्रीं सुलभामपेक्ष्य योक्ष्यते; न च संकल्पमात्रसमुत्थानाः पित्रादयः मनोरथविजृम्भितवत् चञ्चलत्वात् पुष्कलं भोगं समर्पयितुं पर्याप्ताः स्युरिति । एवं प्राप्ते, ब्रूमः— संकल्पादेव तु केवलात् पित्रादिसमुत्थानमिति; कुतः? तच्छ्रुतेः; 'संकल्पादेवास्य पितरः समुत्तिष्ठन्ति' इत्यादिका हि श्रुतिर्निमित्तान्तरापेक्षायां पीड्येत; निमित्तान्तरमपि तु यदि संकल्पानुविधाय्येव स्यात्, भवतु; न तु प्रयत्नान्तरसंपाद्यं निमित्तान्तरमिष्यते, प्राक्संपत्तेः वन्ध्यसंकल्पत्वप्रसङ्गात्; न च श्रुत्यवगम्येऽर्थे लोकवदिति सामान्यतो दृष्टं क्रमते; संकल्पबलादेव च एषां यावत्प्रयोजनं स्थैर्योपपत्तिः, प्राकृतसंकल्पविलक्षणत्वान्मुक्तसंकल्पस्य ॥

## अत एव चानन्याधिपतिः ॥ ९ ॥

अत एव च अवन्ध्यसंकल्पत्वात् अनन्याधिपतिर्विद्वान्भवति— नास्यान्योऽधिपतिर्भवतीत्यर्थः । न हि प्राकृतोऽपि संकल्पयन् अन्यस्वामिकत्वमात्मनः सत्यां गतौ संकल्पयति । श्रुतिश्चैतद्दर्शयति— 'अथ य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान्कामांस्तेषां सर्वेषु लोकेषु कामचारो भवति' इति ॥

## अभावं बादरिराह ह्येवम् ॥ १० ॥

'संकल्पादेवास्य पितरः समुत्तिष्ठन्ति' इत्यतः श्रुतेः मनस्तावत्संकल्पसाधनं सिद्धम् । शरीरेन्द्रियाणि पुनः प्राप्तैश्वर्यस्य विदुषः सन्ति, न वा सन्ति—इति समीक्ष्यते । तत्र बादरिस्तावदाचार्यः शरीरस्येन्द्रियाणां च अभावं महीयमानस्य विदुषो मन्यते; कस्मात्? एवं हि आह आम्नायः— 'मनसैतान्कामान्पश्यन्रमते' 'य एते ब्रह्मलोके' इति; यदि मनसा शरीरेन्द्रियैश्च विहरेत, मनसेति विशेषणं न स्यात्; तस्मादभावः शरीरेन्द्रियाणां मोक्षे ॥

५. अभावाधिकरणम् ।

## भावं जैमिनिर्विकल्पामननात् ॥ ११ ॥

जैमिनिस्त्वाचार्यः मनोवत् शरीरस्यापि सेन्द्रियस्य भावं मुक्तं प्रति मन्यते; यतः 'स एकधा भवति त्रिधा भवति' इत्यादिना अनेकधाभावविकल्पमामनन्ति। न हि अनेकविधता विना शरीरभेदेन आञ्जसी स्यात्। यद्यपि निर्गुणायां भूमविद्यायाम् अयमनेकधाभावविकल्पः पठ्यते, तथापि विद्यमानमेवेदं सगुणावस्थायाम् ऐश्वर्यं भूमविद्यास्तुतये संकीर्त्यत इत्यतः सगुणविद्याफलभावेन उपतिष्ठत इति॥

उच्यते—

## द्वादशाहवदुभयविधं बादरायणोऽतः॥ १२॥

बादरायणः पुनराचार्यः अत एव उभयलिङ्गश्रुतिदर्शनात् उभयविधत्वं साधु मन्यते—यदा सशरीरतां संकल्पयति तदा सशरीरो भवति, यदा तु अशरीरतां तदा अशरीर इति; सत्यसंकल्पत्वात्, संकल्पवैचित्र्याच्च। द्वादशाहवत्— यथा द्वादशाहः सत्रम् अहीनश्च भवति, उभयलिङ्गश्रुतिदर्शनात्—एवमिदमपीति॥

## तन्वभावे संध्यवदुपपत्तेः॥ १३॥

यदा तनोः सेन्द्रियस्य शरीरस्य अभावः, तदा, यथा संध्ये स्थाने शरीरेन्द्रियविषयेष्वविद्यमानेष्वपि उपलब्धिमा-

त्रा एव पित्रादिकामा भवन्ति, एवं मोक्षेऽपि स्युः ; एवं हि एतदुपपद्यते ॥

**भावे जाग्रद्वत् ॥ १४ ॥**

भावे पुनः तनोः, यथा जागरिते विद्यमाना एव पित्रादिकामा भवन्ति, एवं मुक्तस्याप्युपपद्यते ॥

**प्रदीपवदावेशस्तथा हि दर्शयति ॥ १५ ॥**

‘भावं जैमिनिर्विकल्पामननात्’ इत्यत्र सशरीरत्वं मुक्तस्योक्तम्; तत्र त्रिधाभावादिषु अनेकशरीरसर्गे किं निरा-

६. प्रदीपाधिकरणम् ।

त्मकानि शरीराणि दारुयन्त्रवत्सृज्यन्ते, किं वा सात्मकान्यस्मदादिशरीरवत्—इति भवति वीक्षा । तत्र च आत्ममनसोः भेदानुपपत्तेः एकेन शरीरेण योगात् इतराणि शरीराणि निरात्मकानि—इत्येवं प्राप्ते, प्रतिपद्यते— प्रदीपवदावेश इति; यथा प्रदीप एकः अनेकप्रदीपभावमापद्यते, विकारशक्तियोगात्, एवमेकोऽपि सन् विद्वान् ऐश्वर्ययोगादनेकभावमापद्य सर्वाणि शरीराण्याविशति ; कुतः? तथा हि दर्शयति शास्त्रमेकस्यानेकभावम्— ‘स एकधा भवति त्रिधा भवति पञ्चधा सप्तधा नवधा’ इत्यादि; नैतद्दारुयन्त्रोपमाभ्युपगमेऽवकल्पते, नापि जीवान्तरावेशे; न च निरात्मकानां शरीराणां प्रवृत्तिः

संभवति । यत्तु आत्ममनसोर्भेदानुपपत्तेः अनेकशरीरयोगासंभव इति— नैष दोषः; एकमनोनुवर्तीनि समनस्कान्येवापराणि शरीराणि सत्यसंकल्पत्वात् स्रक्ष्यति; सृष्टेषु च तेषु उपाधिभेदात् आत्मनोऽपि भेदेनाधिष्ठातृत्वं योक्ष्यते; एषैव च योगशास्त्रेषु योगिनामनेकशरीरयोगप्रक्रिया ॥

कथं पुनः मुक्तस्य अनेकशरीरावेशादिलक्षणमैश्वर्यमभ्युपगम्यते, यावता 'तत्केन कं विजानीयात्' 'न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यद्विजानीयात्' 'सलिल एको द्रष्टाद्वैतो भवति' इति च एवंजातीयका श्रुतिः विशेषविज्ञानं वारयति— इत्यत उत्तरं पठति—

**स्वाप्ययसंपत्त्योरन्यतरापेक्षमाविष्कृतं हि ॥ १६ ॥**

स्वाप्ययः सुषुप्तम्, 'स्वमपीतो भवति तस्मादेनं स्वपितीत्याचक्षते' इति श्रुतेः; संपत्तिः कैवल्यम्, 'ब्रह्मैव सन्ब्रह्माप्येति' इति श्रुतेः; तयोरन्यतरामवस्थामपेक्ष्य एतत् विशेषसंज्ञाभाववचनम्— क्वचित् सुषुप्तावस्थामपेक्ष्योच्यते, क्वचित्कैवल्यावस्थाम् । कथमवगम्यते? यतस्तत्रैव एतदधिकारवशात् आविष्कृतम्— 'एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानु विनश्यति न प्रेत्य संज्ञास्तीति' 'यत्र त्वस्य सर्व-

मात्मैवाभूत्' 'यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यति' इत्यादिश्रुतिभ्यः । सगुणविद्याविपाकस्थानं तु एतत् स्वर्गादिवत् अवस्थान्तरम्, यत्रैतदैश्वर्यमुपवर्ण्यते । तस्माददोषः ॥

## जगद्व्यापारवर्जं प्रकरणादसंनिहितत्वाच्च ॥ १७ ॥

७. जगद्व्यापाराधिकरणम् ।

ये सगुणब्रह्मोपासनात् सहैव मनसा ईश्वरसायुज्यं व्रजन्ति, किं तेषां निरवग्रहमैश्वर्यं भवति, आहोस्वित्सावग्रहमिति संशयः । किं तावत्प्राप्तम्? निरङ्कुशमेव एषामैश्वर्यं भवितुमर्हति, 'आप्नोति स्वाराज्यम्' 'सर्वेऽस्मै देवा बलिमावहन्ति' 'तेषां सर्वेषु लोकेषु कामचारो भवति' इत्यादिश्रुतिभ्य इति । एवं प्राप्ते, पठति— जगद्व्यापारवर्जमिति; जगदुत्पत्त्यादिव्यापारं वर्जयित्वा अन्यत् अणिमाद्यात्मकमैश्वर्यं मुक्तानां भवितुमर्हति, जगद्व्यापारस्तु नित्यसिद्धस्यैव ईश्वरस्य; कुतः? तस्य तत्र प्रकृतत्वात्; असंनिहितत्वाच्चेतरेषाम्; पर एव हि ईश्वरो जगद्व्यापारेऽधिकृतः, तमेव प्रकृत्य उत्पत्त्याद्युपदेशात्, नित्यशब्दनिबन्धनत्वाच्च; तदन्वेषणविजिज्ञासनपूर्वकं तु इतरेषामणिमाद्यैश्वर्यं श्रूयते; तेनासंनिहितास्ते जगद्व्यापारे । स-

मनस्कत्वादेव च एतेषामनैकमत्ये, कस्यचित्स्थित्यभिप्रायः कस्यचित्संहाराभिप्राय इत्येवं विरोधोऽपि कदाचित्स्यात्; अथ कस्यचित् संकल्पमनु अन्यस्य संकल्प इत्यविरोधः समर्थ्येत, ततः परमेश्वराकूततन्त्रत्वमेवेतरेषामिति व्यवतिष्ठते ॥

## प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमण्डलस्थोक्तेः ॥ १८ ॥

अथ यदुक्तम्— 'आप्नोति स्वाराज्यम्' इत्यादिप्रत्यक्षोपदेशात् निरवग्रहमैश्वर्यं विदुषां न्याय्यमिति, तत्परिहर्तव्यम्; अत्रोच्यते— नायं दोषः, आधिकारिकमण्डलस्थोक्तेः। आधिकारिको यः सवितृमण्डलादिषु विशेषायतनेष्ववस्थितः पर ईश्वरः, तदायत्तैव इयं स्वाराज्यप्राप्तिरुच्यते; यत्कारणम् अनन्तरम् 'आप्नोति मनसस्पतिम्' इत्याह; यो हि सर्वमनसां पतिः पूर्वसिद्ध ईश्वरः तं प्राप्नोतीत्येतदुक्तं भवति; तदनुसारेणैव च अनन्तरम् 'वाक्पतिश्चक्षुष्पतिः। श्रोत्रपतिर्विज्ञानपतिः' च भवति इत्याह। एवमन्यत्रापि यथासंभवं नित्यसिद्धेश्वरायत्तमेव इतरेषामैश्वर्यं योजयितव्यम् ॥

## विकारावर्ति च तथा हि स्थितिमाह ॥ १९ ॥

विकारावर्त्यपि च नित्यमुक्तं पारमेश्वरं रूपम् , न केवलं विकारमात्रगोचरं सवितृमण्डलाद्यधिष्ठानम्; तथा हि अस्य द्विरूपां स्थितिमाह आम्नायः— 'तावानस्य महिमा ततो ज्यायाꣳश्च पूरुषः । पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि' इत्येवमादिः । न च तत् निर्विकाररूपम् इतरालम्बनाः प्राप्नुवन्तीति शक्यं वक्तुम् अतत्क्रतुत्वात्तेषाम् । अतश्च यथैव द्विरूपे परमेश्वरे निर्गुणं रूपमनवाप्य सगुण एवावतिष्ठन्ते, एवं सगुणेऽपि निरवग्रहमैश्वर्यमनवाप्य सावग्रह एवावतिष्ठन्त इति द्रष्टव्यम् ॥

## दर्शयतश्चैवं प्रत्यक्षानुमाने ॥ २० ॥

दर्शयतश्च विकारावर्तित्वं परस्य ज्योतिषः श्रुतिस्मृती— 'न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः' इति, 'न तद्भासयते सूर्यो न शशाङ्को न पावकः' इति च । तदेवं विकारावर्तित्वं परस्य ज्योतिषः प्रसिद्धमित्यभिप्रायः ॥

## भोगमात्रसाम्यलिङ्गाच्च ॥ २१ ॥

इतश्च न निरङ्कुशं विकारालम्बनानामैश्वर्यम् , यस्मात् भोगमात्रमेव एषाम् अनादिसिद्धेनेश्वरेण समानमिति श्रूयते —'तमाहापो वै खलु मीयन्ते लोकोऽसौ' इति 'स यथैतां

देवतां सर्वाणि भूतान्यवन्त्येवं हैवंविदं सर्वाणि भूतान्यवन्ति' 'तेनो एतस्यै देवतायै सायुज्यं सलोकतां जयति' इत्यादि-भेदव्यपदेशलिङ्गेभ्यः ॥

ननु एवं सति सातिशयत्वादन्तवत्त्वम् ऐश्वर्यस्य स्यात्; ततश्च एषामावृत्तिः प्रसज्येत— इत्यत उत्तरं भगवान्बादरायण आचार्यः पठति—

## अनावृत्तिः शब्दादनावृत्तिः शब्दात् ॥ २२ ॥

नाडीरश्मिसमन्वितेन अर्चिरादिपर्वणा देवयानेन पथा ये ब्रह्मलोकं शास्त्रोक्तविशेषणं गच्छन्ति— यस्मिन्नरश्च ह वै ण्यश्चार्णवौ ब्रह्मलोके तृतीयस्यामितो दिवि, यस्मिन्नैरं मदीयं सरः, यस्मिन्नश्वत्थः सोमसवनः, यस्मिन्नपराजिता पूर्ब्रह्मणः, यस्मिंश्च प्रभुविमितं हिरण्मयं वेश्म, यश्चानेकधा मन्त्रार्थवादादिप्रदेशेषु प्रपञ्च्यते— ते तं प्राप्य न चन्द्रलोकादिव भुक्तभोगा आवर्तन्ते; कुतः? 'तयोर्ध्वमायन्नमृतत्वमेति' 'तेषां न पुनरावृत्तिः' 'एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते' 'ब्रह्मलोकमभिसंपद्यन्ते' 'न च पुनरावर्तते' इत्यादिशब्देभ्यः । अन्तवत्त्वेऽपि तु ऐश्वर्यस्य यथा अनावृत्तिः तथा वर्णितम्— 'कार्यात्यये तदध्यक्षेण सहातः परम्' इत्यत्र;

सम्यग्दर्शनविध्वस्ततमसां तु नित्यसिद्धनिर्वाणपरायणानां सिद्धैव अनावृत्तिः ; तदाश्रयणेनैव हि सगुणशरणानामप्यनावृत्तिसिद्धिरिति । अनावृत्तिः शब्दादनावृत्तिः शब्दात्— इति सूत्राभ्यासः शास्त्रपरिसमाप्तिं द्योतयति ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छंकरभगवतः कृतौ

**शारीरकमीमांसासूत्रभाष्ये**

**चतुर्थाध्यायस्य चतुर्थः पादः ॥**

**॥ इति श्रीमच्छारीरकमीमांसासूत्रभाष्यं संपूर्णम् ॥**

ॐ

शं नो मित्रः शं वरुणः। शं नो भवत्वर्यमा। शं न इन्द्रो बृहस्पतिः। शं नो विष्णुरुरुक्रमः। नमो ब्रह्मणे। नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि। त्वामेव प्रत्यक्षं ब्रह्मावादिषम्। ऋतमवादिषम्। सत्यमवादिषम्। तन्मामावीत्। तद्वक्तारमावीत्। आवीन्माम्। आवीद्वक्तारम्॥

ॐ शान्तिः शान्तिः शान्तिः॥

सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु मा विद्विषावहै ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

यश्छन्दसामृषभो विश्वरूपः । छन्दोभ्योऽध्यमृतात्संबभूव । स मेन्द्रो मेधया स्पृणोतु । अमृतस्य देवधारणो भूयासम् । शरीरं मे विचर्षणम् । जिह्वा मे मधुमत्तमा । कर्णाभ्यां भूरि विश्रुवम् । ब्रह्मणः कोशोऽसि मेधया पिहितः । श्रुतं मे गोपाय ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

अहं वृक्षस्य रेरिवा। कीर्तिः पृष्ठं गिरेरिव। ऊर्ध्वपवित्रो वाजिनीव स्वमृतमस्मि। द्रविणꣳ सवर्चसम्। सुमेधा अमृतोक्षितः। इति त्रिशङ्कोर्वेदानुवचनम्॥

ॐ शान्तिः शान्तिः शान्तिः॥

भद्रं कर्णेभिः शृणुयाम देवाः। भद्रं पश्येमाक्षभिर्यजत्राः। स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिः। व्यशेम देवहितं यदायुः। स्वस्ति न इन्द्रो वृद्धश्रवाः। स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः। स्वस्ति नो बृहस्पतिर्दधातु॥

ॐ शान्तिः शान्तिः शान्तिः॥

पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

आप्यायन्तु ममाङ्गानि वाक् प्राणश्चक्षुः श्रोत्रमथो बलमिन्द्रियाणि च सर्वाणि । सर्वं ब्रह्मौपनिषदं माहं ब्रह्म निराकुर्यां मा मा ब्रह्म निराकरोदनिराकरणमस्त्वनिराकरणं मेऽस्तु । तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु ते मयि सन्तु ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

वाङ् मे मनसि प्रतिष्ठिता। मनो मे वाचि प्रतिष्ठितम्। आविरावीर्म एधि। वेदस्य म आणीस्थः। श्रुतं मे मा प्रहासीः। अनेनाधीतेन। अहोरात्रान्संदधामि। ऋतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु। तद्वक्तारमवतु। अवतु माम्। अवतु वक्तारमवतु वक्तारम्॥

ॐ शान्तिः शान्तिः शान्तिः॥

भद्रं नोऽपि वातय मनः॥

ॐ शान्तिः शान्तिः शान्तिः॥

यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै। तꣳ ह देव-मात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

# सूक्तानुक्रमणिका

॥ श्रीः ॥

# ॥ सूत्रानुक्रमणिका ॥


| | पृष्ठम् | | पृष्ठम् |
|---|---|---|---|
| अ | | अत एव चानन्याधि० | ८५४ |
| अंशो नानाव्यपदेशाद० | ४७८ | अत एव चोपमा... | ५८७ |
| अकरणत्वाच्च न... | ५०८ | अत एव न देवताभूतं... | १३६ |
| अक्षरधियां त्ववरोधः... | ६७१ | अत एव प्राणः | ७० |
| अक्षरमम्बरान्तधृतेः | १५९ | अतः प्रबोधोऽस्मात् | ५७५ |
| अग्निहोत्रादि तु... | ७९१ | अतश्चायनेऽपि दक्षिणे | ८१६ |
| अग्न्यादिगतिश्रुतेरिति... | ५३१ | अतस्त्वितरज्ज्यायो... | ७४७ |
| अङ्गावबद्धास्तु न... | ७०२ | अतिदेशाच्च | ६९२ |
| अङ्गित्वानुपपत्तेश्च | ३५९ | अतोऽनन्तेन तथाहि... | ६०३ |
| अङ्गेषु यथाश्रयभावः | ७११ | अतोऽन्यापि ह्येकेषामुभयोः | ७९३ |
| अचलत्वं चापेक्ष्य | ७८३ | अत्ता चराचरग्रहणात् | १०४ |
| अणवश्च | ५०३ | अथातो ब्रह्मजिज्ञासा | ५ |
| अणुश्च | ५१० | अदृश्यत्वादिगुणको... | १२३ |
| अत एव च नित्यत्वम् | १९७ | अदृष्टानियमात् | ४८८ |
| अत एव च सर्वाण्यनु | ८०० | अधिकं तु भेदनिर्देशात् | ३२८ |
| अत एव चाग्नीन्धना० | ७३७ | अधिकोपदेशात्तु... | ७२१ |

| | पृष्ठम् | | पृष्ठम् |
|---|---|---|---|
| अधिष्ठानानुपपत्तेश्च | ४१२ | अन्तर्याम्यधिदैवादिषु... | ११८ |
| अध्ययनमात्रवतः | ७२४ | अन्तवत्त्वमसर्वज्ञता वा | ४१३ |
| अनभिभवं च दर्शयति | ७४५ | अन्तस्तद्धर्मोपदेशात् | ६३ |
| अनवस्थितेरसंभवाच्च... | ११७ | अन्त्यावस्थितेश्चोभय० | ४०८ |
| अनारब्धकार्ये एव... | ७९० | अन्यत्राभावाच्च न... | ३५५ |
| अनाविष्कुर्वन्नन्वयात् | ७५५ | अन्यथात्वं शब्दादिति... | ६२४ |
| अनावृत्तिः शब्दादना० | ८६१ | अन्यथानुमितौ च... | ३५९ |
| अनियमः सर्वासाम० | ६६५ | अन्यथा भेदानुपपत्ति० | ६७५ |
| अनिष्टादिकारिणामपि... | ५४६ | अन्यभावव्यावृत्तेश्च | १६१ |
| अनुकृतेस्तस्य च | १८१ | अन्याधिष्ठितेषु पूर्व० | ५५४ |
| अनुज्ञापरिहारौ देह० | ४८४ | अन्यार्थं तु जैमिनिः... | २५९ |
| अनुपपत्तेस्तु न शारीरः | ९९ | अन्यार्थश्च परामर्शः | १७९ |
| अनुबन्धादिभ्यः प्रज्ञा० | ६९५ | अन्वयादिति चेत्स्या० | ६३९ |
| अनुष्ठेयं बादरायणः... | ७२९ | अपरिग्रहाच्चात्यन्तमनपेक्षा | ३७५ |
| अनुस्मृतेर्बादरिः | १३८ | अपि च सप्त | ५४८ |
| अनुस्मृतेश्च | ३८९ | अपि च स्मर्यते | १८३ |
| अनेन सर्वगतत्वमायाम० | ६११ | ,, ,, ,, | ४८० |
| अन्तर उपपत्तेः | ११२ | ,, ,, ,, | ७४२ |
| अन्तरा चापि तु तद्दृष्टेः | ७४५ | ,, ,, ,, | ७४६ |
| अन्तरा भूतग्रामवत्स्वा० | ६७४ | अपि चैवमेके | ५८४ |
| अन्तरा विज्ञानमनसी... | ४४४ | अपि च संराधने... | ६०१ |

| | पृष्ठम् |
|---|---|
| अपीतौ तद्वत्प्रसङ्गाद० | २९८ |
| अप्रतीकालम्बनान्नय० | ८४२ |
| अबाधाच्च | ७४२ |
| अभावं बादरिराह ह्येवम् | ८५४ |
| अभिध्योपदेशाच्च | २७१ |
| अभिमानिव्यपदेशस्तु... | २९२ |
| अभिव्यक्तेरित्याश्मरथ्यः | १३८ |
| अभिसंध्यादिष्वपि चैवम् | ४८८ |
| अभ्युपगमेऽप्यर्थाभावात् | ३५६ |
| अम्बुवदग्रहणात्तु न... | ५८८ |
| अरूपवदेव हि... | ५८४ |
| अर्चिरादिना तत्प्रथितेः | ८२२ |
| अर्भकौकस्त्वात्तद्व्यपदे० | १०२ |
| अल्पश्रुतेरिति चेत्तदुक्तम् | १८० |
| अवस्थितिवैशेष्यादिति... | ४५५ |
| अवस्थितेरिति काशकृत्स्नः | २६४ |
| अविभागेन दृष्टत्वात् | ८५० |
| अविभागो वचनात् | ८१२ |
| अविरोधश्चन्दनवत् | ४५९ |
| अशुद्धमिति चेन्न शब्दात् | ५५६ |
| अश्मादिवच्च तदनुपपत्तिः | ३२९ |

| | पृष्ठम् |
|---|---|
| अश्रुतत्वादिति चेन्न० | ५३४ |
| असति प्रतिज्ञोपरोधो... | ३८६ |
| असदिति चेन्न... | २९७ |
| असद्व्यपदेशान्नेति... | ३१८ |
| असंततेश्चाव्यतिकरः | ४८५ |
| असंभवस्तु सतोऽनुपपत्तेः | ४३६ |
| असार्वत्रिकी | ७२३ |
| अस्ति तु | ४२२ |
| अस्मिन्नस्य च तद्योगं... | ५७ |
| अस्यैव चोपपत्तेरेष ऊष्मा | ८०८ |
| **आ** | |
| आकाशस्तल्लिङ्गात् | ६७ |
| आकाशे चाविशेषात् | ३८८ |
| आकाशोऽर्थान्तर० | २१७ |
| आचारदर्शनात् | ७१९ |
| आतिवाहिकास्तल्लिङ्गात् | ८२६ |
| आत्मकृतेः परिणामात् | २७२ |
| आत्मगृहीतिरितरवदुत्तरात् | ६३७ |
| आत्मनि चैवं विचित्रा० | ३३६ |
| आत्मशब्दाच्च | ६३६ |
| आत्मा प्रकरणात् | ८४९ |

| | पृष्ठम् | | पृष्ठम् |
|---|---|---|---|
| आत्मेति तूपगच्छन्ति... | ७७२ | इतरे त्वर्थसामान्यात् | ६३५ |
| आदरादलोपः | ६८१ | इतरेषां चानुपलब्धेः | २८६ |
| आदित्यादिमतय... | ७७९ | इयदामननात् | ६७३ |
| आध्यानाय प्रयोजना० | ६३५ | ई | |
| आनन्दमयोऽभ्यासात् | ५१ | ईक्षतिकर्मव्यपदेशात्सः | १६१ |
| आनन्दादयः प्रधानस्य | ६३३ | ईक्षतेर्नाशब्दम् | ३६ |
| आनर्थक्यमिति चेन्न... | ५४४ | उ | |
| आनुमानिकमप्येकेषा० | २२६ | उत्क्रमिष्यत एवं... | २६३ |
| आपः | ४३९ | उत्क्रान्तिगत्यागतीनाम् | ४५२ |
| आ प्रायणात्तत्रापि हि... | ७८५ | उत्तराच्चेदाविर्भूतस्वरूपस्तु | १७३ |
| आभास एव च | ४८६ | उत्तरोत्पादे च पूर्वनिरो० | ३८४ |
| आमनन्ति चैनमस्मिन् | १४० | उत्पत्त्यसंभवात् | ४१४ |
| आर्त्विज्यमित्यौडुलोमि... | ७५१ | उदासीनानामपि चैवं... | ३९३ |
| आवृत्तिरसकृदुपदेशात् | ७६५ | उपदेशभेदान्नेति... | ८१ |
| आसीनः संभवात् | ७८२ | उपपत्तेश्च | ६०९ |
| आह च तन्मात्रम् | ५८६ | उपपद्यते चाप्युपलभ्यते च | ३४४ |
| इ | | उपपन्नस्तल्लक्षणा० | ६६४ |
| इतरपरामर्शात्स० | १७१ | उपपूर्वमपि त्वेके... | ७४९ |
| इतरव्यपदेशाद्धिता० | ३२६ | उपमर्दं च | ७२६ |
| इतरस्याप्येवमसं० | ७८९ | उपलब्धिवदनियमः | ४६८ |
| इतरेतरप्रत्ययत्वादिति... | ३८२ | उपसंहारदर्शनान्नेति... | ३३० |

| | पृष्ठम् | | पृष्ठम् |
|---|---|---|---|
| उपसंहारोऽर्थाभेदा० | ६२३ | **क** | |
| उपस्थितेऽतस्तद्वचनात् | ६८३ | कम्पनात् | २१३ |
| उपादानात् | ४६७ | करणवच्चेन्न भोगादिभ्यः | ४१२ |
| उभयथा च दोषात् | ३७४ | कर्ता शास्त्रार्थवत्त्वात् | ४६६ |
| ,, ,, ,, | ३८७ | कर्मकर्तृव्यपदेशाच्च | १०० |
| उभयथापि न कर्मा० | ३६७ | कल्पनोपदेशाच्च मध्वा० | २४३ |
| उभयव्यपदेशात्त्वहि० | ६०३ | कामकारेण चैके | ७२६ |
| उभयव्यामोहात्तत्सिद्धेः | ८२७ | कामाच्च नानुमानापेक्षा | ५७ |
| **ऊ** | | कामादीतरत्र... | ६८० |
| ऊर्ध्वरेतःसु च शब्दे हि | ७२६ | काम्यास्तु यथाकामं... | ७१० |
| **ए** | | कारणत्वेन चाकाशादिषु | २४९ |
| एक आत्मनः शरीरे... | ६९८ | कार्यं बादरिरस्य गत्यु० | ८२९ |
| एतेन मातरिश्वा व्या० | ४३५ | कार्याख्यानादपूर्वम् | ६४३ |
| एतेन योगः प्रत्युक्तः | २८७ | कार्यात्यये तदध्यक्षेण... | ८३१ |
| एतेन शिष्टापरिग्रहा० | ३०५ | कृतप्रयत्नापेक्षस्तु विहि० | ४७६ |
| एतेन सर्वे व्याख्याता० | २७४ | कृतात्ययेऽनुशयवान्द० | ५३७ |
| एवं चात्माकार्त्स्न्यम् | ४०६ | कृत्स्नभावात्तु गृहिणो० | ७५४ |
| एवं मुक्तिफलानियम० | ७५९ | कृत्स्नप्रसक्तिर्निरवयव० | ३३३ |
| एवमप्युपन्यासात्पूर्व० | ८५२ | क्षणिकत्वाच्च | ४०२ |
| **ऐ** | | क्षत्रियत्वगतेश्चोत्तरत्र... | २११ |
| ऐहिकमप्यप्रस्तुतप्रति० | ७५७ | **ग** | |

| | पृष्ठम् |
|---|---|
| गतिशब्दाभ्यां तथा.... | १६९ |
| गतिसामान्यात् | ४७ |
| गतेरर्थवत्त्वमुभयथा.... | ६६३ |
| गुणसाधारण्यश्रुतेश्च | ७१२ |
| गुणाद्वा लोकवत् | ४५६ |
| गुहां प्रविष्टावात्मानौ... | १०६ |
| गौणश्चेन्नात्मशब्दात् | ४१ |
| गौण्यसंभवात् | ४२३ |
| ,, | ४९५ |
| **च** | |
| चक्षुरादिवत्तु तत्सह० | ५०७ |
| चमसवदविशेषात् | २४० |
| चरणादिति चेन्नोपल० | ५४४ |
| चराचरव्यपाश्रयस्तु... | ४४५ |
| चिति तन्मात्रेण तदा० | ८५१ |
| **छ** | |
| छन्दत उभयाविरोधात् | ६६३ |
| छन्दोभिधानान्नेति... | ७८ |
| **ज** | |
| जगद्वाचित्वात् | २५५ |
| जगद्व्यापारवर्जं प्रक० | ८५८ |

| | पृष्ठम् |
|---|---|
| जन्माद्यस्य यतः | ९ |
| जीवमुख्यप्राणलिङ्गान्नेति... | ८७ |
| जीवमुख्यप्राणलिङ्गान्नेति... | २५८ |
| ज्ञेयत्वावचनाच्च | २३३ |
| ज्ञोऽत एव | ४५० |
| ज्योतिराद्यधिष्ठानं तु... | ५११ |
| ज्योतिरुपक्रमा तु.... | २४२ |
| ज्योतिर्दर्शनात् | २१६ |
| ज्योतिश्चरणाभिधानात् | ७३ |
| ज्योतिषि भावाच्च | २०३ |
| ज्योतिषैकेषामसत्यन्ने | २४९ |
| **त** | |
| त इन्द्रियाणि तद्व्यपदे० | ५१४ |
| तच्छ्रुतेः | ७२० |
| तडितोऽधि वरुणः सं० | ८२५ |
| तत्तु समन्वयात् | १५ |
| तत्पूर्वकत्वाद्वाचः | ४९७ |
| तत्प्राक्श्रुतेश्च | ४९७ |
| तत्रापि च तद्व्यापारा० | ५४८ |
| तथा च दर्शयति | ४५८ |
| तथाचैकवाक्यतोपबन्धात् | ७३६ |

| | पृष्ठम् | | पृष्ठम् |
|---|---|---|---|
| तथान्यप्रतिषेधात् | ६१० | तर्काप्रतिष्ठानादप्य० | ३०२ |
| तथा प्राणाः | ४९४ | तस्य च नित्यत्वात् | ५१३ |
| तदधिगम उत्तरपूर्वाघ० | ७८६ | तानि परे तथाह्याह | ८१२ |
| तदधीनत्वादर्थवत् | २३० | तुल्यं तु दर्शनम् | ७२३ |
| तदनन्यत्वमारम्भण... | ३०७ | तृतीयशब्दावरोधः... | ५५१ |
| तदन्तरप्रतिपत्तौ रंहति... | ५२८ | तेजोऽतस्तथाह्याह | ४३७ |
| तदभावनिर्धारणे च... | २१२ | त्र्याणामेव चैवमुप० | २३५ |
| तदभावो नाडीषु... | ५७० | त्र्यात्मकत्वात्तु भूयस्त्वात् | ५३० |
| तदभिध्यानादेव तु... | ४४१ | द | |
| तदव्यक्तमाह हि | ६०१ | दर्शनाच्च | ५५१ |
| तदापीतेः संसारव्यपदेशात् | ८०६ | ,, | ५८९ |
| तदुपर्यपि बादरायणः... | १८६ | ,, | ६९३ |
| तदोकोऽग्रज्वलनं... | ८१३ | ,, | ७१३ |
| तद्गुणसारत्वात्तु तद्व्यप० | ४५९ | ,, | ८३२ |
| तद्धेतुव्यपदेशाच्च | ५४ | दर्शयतश्चैवं प्रत्यक्षानुमाने | ८६० |
| तद्भूतस्य तु नातद्भावो... | ७४७ | दर्शयति च | ६२२ |
| तद्वतो विधानात् | ७२० | ,, ,, | ६५० |
| तन्निर्धारणानियमस्तद्दृ० | ६८४ | दर्शयति चाथो अपि... | ५८६ |
| तन्निष्ठस्य मोक्षोपदेशात् | ४३ | दहर उत्तरेभ्यः | १६४ |
| तन्मनः प्राण उत्तरात् | ८०१ | दृश्यते तु | २९४ |
| तन्वभावे संध्यवदुपपत्तेः | ८५५ | देवादिवदपि लोके | ३३१ |

| | पृष्ठम् | | पृष्ठम् |
|---|---|---|---|
| देहयोगाद्वा सोऽपि | ५६८ | न वक्तुरात्मोपदेशादिति... | ८४ |
| द्युभ्वाद्यायतनं स्वशब्दात् | १४५ | न वा तत्सहभावाश्रुतेः | ७१२ |
| द्वादशाहवदुभयविधं... | ८५५ | न वा प्रकरणभेदा० | ६२५ |
| ध | | न वायुक्रिये पृथगुपदेशात् | ५०५ |
| धर्मं जैमिनिरत एव | ६१३ | न वा विशेषात् | ६४९ |
| धर्मोपपत्तेश्च | १५८ | न वियदश्रुतेः | ४२१ |
| धृतेश्च महिम्नोऽस्या० | १७० | न विलक्षणत्वादस्य... | २८९ |
| ध्यानाच्च | ७८३ | न संख्योपसंग्रहादपि... | २४४ |
| न | | न सामान्यादप्युपलब्धे० | ६९७ |
| न कर्माविभागादिति... | ३४३ | न स्थानतोऽपि परस्यो० | ५८२ |
| न च कर्तुः करणम् | ४१६ | नाणुरतच्छ्रुतेरिति... | ४५३ |
| न च कार्ये प्रतिपत्त्यभिसंधिः | ८३२ | नातिचिरेण विशेषात् | ५५३ |
| न च पर्यायादप्यविरोधो... | ४०७ | नात्माश्रुतेर्नित्यत्वाच्च... | ४४६ |
| न च स्मार्तमतद्धर्मा० | १२० | नाना शब्दादिभेदात् | ७०७ |
| न चाधिकारिकमपि... | ७४८ | नानुमानमतच्छब्दात् | १४९ |
| न तु दृष्टान्तभावात् | २९८ | नाभाव उपलब्धेः | ३९४ |
| न तृतीये तथोपलब्धेः | ५५० | नाविशेषात् | ७२५ |
| न प्रतीके न हि सः | ७७५ | नासतोऽदृष्टत्वात् | ३९१ |
| न प्रयोजनवत्त्वात् | ३३९ | नित्यमेव च भावात् | ३७२ |
| न भावोऽनुपलब्धेः | ४०१ | नित्योपलब्ध्यनुपलब्धि० | ४६५ |
| न भेदादिति चेन्न... | ५८३ | नियमाच्च | ७२१ |

| | पृष्ठम् |
|---|---|
| निर्मातारं चैके पुत्रादयश्च | ५६२ |
| निशि नेति चेन्न... | ८१५ |
| नेतरोऽनुपपत्तेः | ५५ |
| नैकस्मिन्दर्शयतो हि | ८०४ |
| नैकस्मिन्नसंभवात् | ४०३ |
| नोपमर्देनातः | ८०८ |
| **प** | |
| पञ्चवृत्तिर्मनोवद्व्यपदिश्यते | ५०९ |
| पटवच्च | ३२५ |
| पत्यादिशब्देभ्यः | २२० |
| पत्युरसामञ्जस्यात् | ४०९ |
| पयोम्बुवच्चेत्तत्रापि | ३५४ |
| परं जैमिनिर्मुख्यत्वात् | ८३१ |
| परमतः सेतून्मानसंब० | ६०५ |
| परात्तु तच्छ्रुतेः | ४७५ |
| पराभिध्यानात्तु तिरो० | ५६७ |
| परामर्शं जैमिनिरचो० | ७२७ |
| परेण च शब्दस्य... | ६९७ |
| पारिप्लवार्था इति चेन्न... | ७३५ |
| पुंस्त्वादिवत्त्वस्य सतो० | ४६४ |
| पुरुषविद्यायामिव... | ६५२ |
| पुरुषार्थोऽतः शब्दा० | ७१७ |
| पुरुषाश्मवदिति चेत्तथापि | ३५८ |
| पूर्वं तु बादरायणो... | ६१३ |
| पूर्वविकल्पः प्रकरणा० | ६९१ |
| पूर्ववद्वा | ६०४ |
| पृथगुपदेशात् | ४५८ |
| पृथिव्यधिकाररूप० | ४३९ |
| प्रकरणाच्च | १०६ |
| प्रकरणात् | १५० |
| प्रकाशवच्चावैयर्थ्यात् | ५८५ |
| प्रकाशादिवच्चावैशेष्यं... | ६०२ |
| प्रकाशादिवन्नैवं परः | ४८१ |
| प्रकाशाश्रयवद्वा तेजस्त्वात् | ६०४ |
| प्रकृतिश्च प्रतिज्ञा० | २६८ |
| प्रकृतैतावत्त्वं हि प्रति० | ५९६ |
| प्रतिज्ञासिद्धेर्लिङ्गमा० | २६२ |
| प्रतिज्ञाहानिरव्यतिरेका० | ४२७ |
| प्रतिषेधाच्च | ६०४ |
| प्रतिषेधादिति चेन्न... | ८०८ |
| प्रतिसंख्याप्रतिसंख्या० | ३८६ |
| प्रत्यक्षोपदेशादिति... | ८५९ |

| | पृष्ठम् |
|---|---|
| प्रथमेऽश्रवणादिति... | ५३२ |
| प्रदानवदेव तदुक्तम् | ६८७ |
| प्रदीपवदावेशस्तथाहि... | ८५६ |
| प्रदेशादिति चेन्नान्त० | ४८८ |
| प्रवृत्तेश्च | ३५२ |
| प्रसिद्धेश्च | १७१ |
| प्राणगतेश्च | ५३१ |
| प्राणभृच्च | १४९ |
| प्राणवता शब्दात् | ५१३ |
| प्राणस्तथानुगमात् | ८२ |
| प्राणादयो वाक्यशेषात् | २४७ |
| प्रियशिरस्त्वाद्यप्राप्ति० | ६३४ |
| **फ** | |
| फलमत उपपत्तेः | ६११ |
| **ब** | |
| बहिस्तूभयथापि स्मृते... | ७५० |
| बुद्ध्यर्थः पादवत् | ६०८ |
| ब्रह्मदृष्टिरुत्कर्षात् | ७७६ |
| ब्राह्मेण जैमिनिरुप० | ८५० |
| **भ** | |
| भाक्तं वानात्मवित्त्वा० | ५३५ |
| भावं जैमिनिर्विकल्पा० | ८५४ |
| भावं तु बादरायणो० | २०४ |
| भावशब्दाच्च | ७३५ |
| भावे चोपलब्धेः | ३१७ |
| भावे जाग्रद्वत् | ८५६ |
| भूतादिपादव्यपदेशो... | ८० |
| भूतेषु तच्छ्रुतेः | ८०३ |
| भूमा संप्रसादाद० | १५२ |
| भूम्नः क्रतुवज्ज्यायस्त्वं... | ७०४ |
| भेदव्यपदेशाच्च | ५६ |
| भेदव्यपदेशाच्चान्यः | ६७ |
| भेदव्यपदेशात् | १५० |
| भेदश्रुतेः | ५१६ |
| भेदान्नेति चेन्नैकस्यामपि | ६२० |
| भोक्त्रापत्तेरविभाग० | ३०६ |
| भोगमात्रसाम्यलिङ्गाच्च | ८६० |
| भोगेन त्वितरे क्षपयि० | ७९६ |
| **म** | |
| मध्वादिष्वसंभवादन० | २०२ |
| मन्त्रवर्णाच्च | ४८० |
| मन्त्रादिवद्वाविरोधः | ७०३ |

| | पृष्ठम् | | पृष्ठम् |
|---|---|---|---|
| महद्दीर्घवद्वा ह्रस्वपरि... | ३६४ | **र** | |
| महद्वच | २३९ | रचनानुपपत्तेश्च नानु० | ३५० |
| मांसादि भौमं यथा... | ५२० | रश्म्यनुसारी | ८१४ |
| मान्त्रवर्णिकमेव च गीयते | ५४ | रूपादिमत्त्वाच्च विप० | ३७२ |
| मायामात्रं तु कार्त्स्न्येना० | ५६३ | रूपोपन्यासाच्च | १२८ |
| मुक्तः प्रतिज्ञानात | ८४८ | रेतःसिग्योगोऽथ | ५५७ |
| मुक्तोपसृप्यव्यपदेशात् | १४८ | **ल** | |
| मुग्धेऽर्धसंपत्तिः... | ५७९ | लिङ्गभूयस्त्वात्तद्धि... | ६९० |
| मौनवदितरेषामप्युपदेशात् | ७५५ | लिङ्गाच्च | ७६७ |
| **य** | | लोकवत्तु लीलाकैवल्यम् | ३४० |
| यत्रैकाग्रता तत्राविशेषात् | ७८४ | **व** | |
| यथा च तक्षोभयथा | ४६९ | वदतीति चेन्न प्राज्ञो... | २३४ |
| यथा च प्राणादि | ३२६ | वाक्यान्वयात् | २६० |
| यदेव विद्ययेति हि | ७९३ | वाङ्मनसि दर्शनाच्छब्दाच्च | ७९९ |
| यावदधिकारमवस्थिति० | ६६७ | वायुमब्दादविशेषविशेषा० | ८२३ |
| यावदात्मभावित्वाच्च... | ४६२ | विकरणत्वान्नेति चेत्तदुक्तम् | ३३८ |
| यावद्विकारं तु विभागो० | ४३१ | विकल्पोऽविशिष्टफलत्वात् | ७०९ |
| युक्तेः शब्दान्तराच्च | ३१९ | विकारावर्ति च तथाहि... | ८५९ |
| योगिनः प्रति च स्मर्यते | ८१७ | विकारशब्दान्नेति चेन्न... | ५३ |
| योनिश्च हि गीयते | २७३ | विज्ञानादिभावे वा... | ४१६ |
| योनेः शरीरम् | ५५७ | विद्याकर्मणोरिति तु... | ५४८ |

| | पृष्ठम् |
|---|---|
| विद्यैव तु निर्धारणात् | ६९२ |
| विधिर्वा धारणवत् | ७३० |
| विपर्ययेण तु क्रमोऽत० | ४४२ |
| विप्रतिषेधाच्च | ४१८ |
| विप्रतिषेधाच्चासमञ्जसम् | ३६० |
| विभागः शतवत् | ७२४ |
| विरोधः कर्मणीति चेन्ना० | १८७ |
| विवक्षितगुणोपपत्तेश्च | ९८ |
| विशेषं च दर्शयति | ८४३ |
| विशेषणभेदव्यपदेशाभ्यां... | १२७ |
| विशेषणाच्च | १०९ |
| विशेषानुग्रहश्च | ७४६ |
| विशेषितत्वाच्च | ८२९ |
| विहारोपदेशात् | ४६६ |
| विहितत्वाच्चाश्रमकर्मापि | ७४३ |
| वृद्धिह्रासभाक्त्वमन्त० | ५८८ |
| वेधाद्यर्थभेदात् | ६५४ |
| वैद्युतेनैव ततस्तच्छ्रुतेः | ८२८ |
| वैधर्म्याच्च न स्वप्नादिवत् | ४०० |
| वैलक्षण्याच्च | ५१६ |
| वैशेष्यात्तु तद्वादस्तद्वादः | ५२१ |
| वैश्वानरः साधारणशब्द० | १३० |
| वैषम्यनैर्घृण्ये न सापे० | ३४१ |
| व्यतिरेकस्तद्भावाभा० | ७०० |
| व्यतिरेकानवस्थितेश्चा० | ३५५ |
| व्यतिरेको गन्धवत् | ४५७ |
| व्यतिहारो विशिंषन्ति.... | ६७६ |
| व्यपदेशाच्च क्रियायां... | ४६७ |
| व्याप्तेश्च समञ्जसम् | ६२८ |
| **श** | |
| शक्तिविपर्ययात् | ४६८ |
| शब्द इति चेन्नातः... | १८९ |
| शब्दविशेषात् | १०० |
| शब्दश्चातोऽकामकारे | ७४२ |
| शब्दाच्च | ४२४ |
| शब्दादिभ्योऽन्तःप्रति० | १३४ |
| शब्दादेव प्रमितः | १८३ |
| शमदमाद्युपेतः स्यात्त० | ७३८ |
| शारीरश्चोभयेऽपि हि... | १२१ |
| शास्त्रदृष्ट्या तूपदेशो... | ८६ |
| शास्त्रयोनित्वात् | १३ |
| शिष्टेश्च | ७११ |

| | पृष्ठम् | | पृष्ठम् |
|---|---|---|---|
| शुगस्य तदनादरश्रव० | २०८ | समवायाभ्युपगमाच्च | ३७० |
| शेषत्वात्पुरुषार्थवादो... | ७१८ | समाकर्षात् | २५३ |
| श्रवणाध्ययनार्थप्रति० | २१२ | समाध्यभावाच्च | ४६९ |
| श्रुतत्वाच्च | ४८ | समान एवं चाभेदात् | ६४६ |
| ,, | ६१२ | समाननामरूपत्वाच्च... | १९७ |
| श्रुतेश्च | ७५२ | समाना चासृत्युप० | ८०५ |
| श्रुतेस्तु शब्दमूलत्वात् | ३३४ | समाहारात् | ७११ |
| श्रुतोपनिषत्कगत्यभि० | ११६ | समुदाय उभयहेतुके... | ३८१ |
| श्रुत्यादिबलीयस्त्वाच्च न...६९३ | | संपत्तेरिति जैमिनिस्तथा० | १३९ |
| श्रेष्ठश्च | ५०४ | संपद्याविर्भावः स्वेन... | ८४७ |
| **स** | | संबन्धादेवमन्यत्रापि | ६४८ |
| संज्ञातश्चेत्तदुक्तमस्ति तु... | ६२७ | संबन्धानुपपत्तेश्च | ४११ |
| संज्ञामूर्तिक्लृप्तिस्तु त्रिवृ० | ५१७ | संभृतिद्युव्याप्त्यपि चातः | ६५१ |
| संयमने त्वनुभूयेतरेषामा० | ५४७ | संभोगप्राप्तिरिति चेन्न... | १०३ |
| संस्कारपरामर्शात्तद० | २११ | सर्वत्र प्रसिद्धोपदेशात् | ९५ |
| स एव तु कर्मानुस्मृ० | ५७६ | सर्वथानुपपत्तेश्च | ४०३ |
| संकल्पादेव तु तच्छ्रुतेः | ८५२ | सर्वथापि त एवो० | ७४४ |
| सत्त्वाच्चावरस्य | ३१८ | सर्वधर्मोपपत्तेश्च | ३४५ |
| संध्ये सृष्टिराह हि | ५६१ | सर्ववेदान्तप्रत्ययं चोद० | ६१९ |
| सप्त गतेर्विशेषितत्वाच्च | ४९८ | सर्वान्नानुमतिश्च प्राणा० | ७४० |
| समन्वारम्भणात् | ७२० | सर्वापेक्षा च यज्ञादि० | ७३७ |

| | पृष्ठम् | | पृष्ठम् |
|---|---|---|---|
| सर्वाभेदादन्यत्रेमे | ६३१ | स्थानविशेषात्प्रकाशादिवत् | ६०९ |
| सर्वोपेता च तद्दर्शनात् | ३३८ | स्थानादिव्यपदेशा | ११३ |
| सहकारित्वेन च | ७४३ | स्थित्यदनाभ्यां च | १५१ |
| सहकार्यन्तरविधिः... | ७५२ | स्पष्टो ह्येकेषाम् | ८०९ |
| साक्षाच्चोभयाम्नानात् | २७२ | स्मरन्ति च | ४८२ |
| साक्षादप्यविरोधं जैमिनिः | १३७ | ,, ,, ,, | ५४७ |
| सा च प्रशासनात् | १६० | ,, ,, ,, | ७८४ |
| साभाव्यापत्तिरुपपत्तेः | ५५२ | स्मर्यते च | ८११ |
| सामान्यात्तु | ६०७ | स्मर्यतेऽपि च लोके | ५५१ |
| सामीप्यात्तु तद्व्यपदेशः | ८३० | स्मर्यमाणमनुमानं... | १३३ |
| सांपराये तर्तव्याभावा० | ६६२ | स्मृतेश्च | १०१ |
| सुकृतदुष्कृते एवेति... | ५४५ | ,, ,, ,, | ८३१ |
| सुखविशिष्टाभिधानादेव च | ११४ | स्मृत्यनवकाशदोषप्रसङ्ग० | २८२ |
| सुषुप्त्युत्क्रान्त्योर्भेदेन | २१८ | स्याच्चैकस्य ब्रह्मशब्दवत् | ४२५ |
| सूक्ष्मं तु तदर्हत्वात् | २२९ | स्वपक्षदोषाच्च | ३०१ |
| सूक्ष्मं प्रमाणतश्च तथो० | ८०७ | ,, ,, ,, | ३३७ |
| सूचकश्च हि श्रुतेराचक्ष० | ५६५ | स्वशब्दोन्मानाभ्यां च | ४५४ |
| सैव हि सत्यादयः | ६७८ | स्वात्मना चोत्तरयोः | ४५३ |
| सोऽध्यक्षे तदुपगमादिभ्यः | ८०२ | स्वाध्यायस्य तथात्वेन... | ६२१ |
| स्तुतयेऽनुमतिर्वा | ७२५ | स्वाप्ययसंपत्त्योरन्यतरापे० | ८५७ |
| स्तुतिमात्रमुपादाना० | ७३४ | स्वाप्ययात् | ४६ |

| | पृष्ठम् |
|---|---|
| स्वामिनः फलश्रुते० | ७५० |
| **ह** | |
| हस्तादयस्तु स्थितेऽतो... | ४९९ |
| हानौ तूपायनशब्दशे० | ६५८ |
| हृद्यपेक्षया तु मनु० | १८५ |
| हेयत्वावचनाच्च | ४५ |

परिग्रहण सं ...10365...
ग्रन्थालय, के. उ. ति. शि. सं
सारनाथ, वाराणसी